Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

अथकर्म विपाक संहिता

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ ईश्वरउवाच ॥ ॥ शृणुदेविवरारोहेनृणांकर्मविपाकजम् ॥ तदहंसंप्रवक्ष्यामियथाकर्मानुसार
तः ॥ १ ॥ पुत्राबहुविधादेविलौकिकावैविचक्षणाः ॥ जायंतेनात्रसंदेहस्तत्सर्वंशृणुवल्लभे ॥ २ ॥
प्रथमःपुण्यसंबन्धीमातृपितृप्रियःसदा ॥ सुखेवानिरतोनित्यंपितुर्मातुश्चयत्नतः ॥ ३ ॥ आ
जन्ममरणाद्देविपितुराज्ञांकरोतिच ॥ मरणेपितृमात्रोश्चश्राद्धंकुर्याद्दिनेदिने ॥ ४ ॥ पितृश्राद्धं
विनादेविभोजनंनकरोतिहि ॥ द्वितीयःशत्रुसंबंधीतस्यचेष्टांचमेशृणु ॥ ५ ॥ पूर्वजन्मप्रसंगेन
शत्रुपुत्रःप्रजायते ॥ ॥ जन्मतःशत्रुरूपेणमातृपित्रोर्विरोधकृत् ॥ ६ ॥ तत्कर्मकुरुतेयेनतयोः
क्लेशोभिजायते ॥ तृतीयऋणसंबन्धान्मतःशृणुवरानने ॥ ७ ॥ ऋणंयस्यगृहीतंतुनदत्तंहठ
तः प्रिये ॥तदापुत्रत्वमाप्नोतिद्रव्यदातानसंशयः ॥ ८ ॥ पितृद्रव्यंप्रयत्नेनगृह्णातिहठतः प्रिये ॥
द्यूतवेश्याप्रदानेन व्ययंकुर्याद्दिनेदिने ॥ ९ ॥ यदाद्रव्यविहीनश्चपिताभवतिवैप्रिये ॥ तदामृत्यु
मवाप्नोतियुवरूपोनसंशयः ॥ १० ॥ चतुर्थोमित्ररूपेणगृहेद्रव्यंचसंस्थितम् ॥ स्थापितंद्रव्यम
न्यस्यनदत्तंपूर्वजन्मनि ॥ ११ ॥ तत्संबन्धस्वरूपेणपुत्रोजातस्तदाशिवे ॥ बहुप्रीतिःपितृभ्यां
चापितृव्येगोत्रजेतथा ॥ १२ ॥ बहुधर्मीगुणीभोक्तापितुःशिक्षासुतत्परः ॥ यत्करोतिगृहेकर्म
सुखदंजायतेततः ॥ १३ ॥ पूर्वरूपोयदादेविपत्नीपुत्रसमन्वितः ॥ ततःशरीरंवैत्यक्त्वाधनं

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

गृह्यततःप्रिये ॥ १४ ॥ अथवक्ष्यामितेदेविचतुर्थंचरणंशिवे ॥ नक्षत्रतुरगस्यैवप्राणिनांनियतःशृ
णु ॥ १५ ॥ कोशलापुरतोदेविसरय्वाउत्तरेतटे ॥ तत्रक्षत्रीवसत्येकोनगरेनन्दनेतदा ॥ १६ ॥
तत्रधर्मविहीनस्तुलक्ष्मणेतिचनामतः ॥ तस्यभार्याविशालाक्षीकल्याणीनामसाप्रिये ॥ १७ ॥
कुलटायौवनोन्मत्तापरपुंसिरतासदा ॥ व्यापारंकारयामासवस्त्रहेमादिकस्यहि ॥ १८ ॥ उद्यमं
बहुधाकृत्वाद्विजैःसहवरानने ॥ एवंबहुतिथेकालेविप्रद्रव्यंविचोरितम् ॥ १९ ॥ तेनशोकेनवि
प्रस्तुशीघ्रंपञ्चत्वमागतः ॥ ततोबहुतिथेकालेराजपुत्रस्यपञ्चता ॥ २० ॥ गतःसनरकंघोरंनि
रुच्छ्वासंसुदारुणम् ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकयातनाम् ॥ २१ ॥ नरकान्निःसृतोदे
विवृषयोनिःपुराभवत् ॥ ततोवैराजपुत्रस्तुमानुषत्वमुपागतः ॥ २२ ॥ पुरातुयत्कृतंपापंतदि
हैवप्रभुज्यते ॥ मित्रस्यवंचनाद्देविपुत्रस्यैवचपंचता ॥ २३ ॥ काकवन्ध्याभवत्पत्नीदुःखशो
कसमन्विता ॥ तस्यपुण्यंप्रवक्ष्यामिपूर्वपापस्यनिग्रहम् ॥ २४ ॥ गायत्रीलक्षजाप्येनसर्वपापं
प्रणश्यति ॥ कूष्मांडंनालिकेरंचस्वर्णयुक्तंसहाम्बरम् ॥ २५ ॥ गङ्गामध्ये प्रदातव्यंसंतानार्थं
वरानने ॥ वर्तुलाकारकुंडेहिहोमंचैवतुकारयेत् ॥ २६ ॥ स्वर्णशृङ्गीरौप्यखुरांपट्टवस्त्रसमन्वि
ताम् ॥ आचार्यायप्रदद्याच्चसपात्रांविधिवत्प्रिये ॥ २७ ॥ एवंकृतेनसंदेहोवंध्यात्वंचप्रणश्यति ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

पुत्रपौत्राश्चवर्धन्तेनसन्देहोवरानने ॥ २८ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेऽश्वि
नीनक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामषष्ठोऽध्यायः ॥ ६ ॥

॥ पार्वत्युवाच ॥ ॥ देवदेवमहादेवसृष्टिस्थितिलयात्मक ॥ स्त्रीणांचकर्मसंब्रूहिदयांकृत्वाममो
परि ॥ १ ॥ ॥ ईश्वरउवाच ॥ नारीणांशृणुमेसर्वंयत्कृतंपूर्वजन्मनि ॥ ततोऽहंसंप्रवक्ष्यामि
समासेनवरानने ॥ २ ॥ पूर्वजन्मनियानारीपतिनिन्दांचकारह ॥ तेनपापेनभोदेविनस्त्रीपुष्प
वतीभवेत् ॥ ३ ॥ तदारौप्यस्यवैवृक्षंस्वांगुष्ठपरिमाणकम् ॥ पलपञ्चमितंदेविदद्याद्वेदविदेप्रि
ये ॥ ४ ॥ तदापुष्पंभवेद्देविनात्रकार्याविचारणा ॥ पतिंसुप्तंपरित्यज्यपरेपुंसिरताभवेत् ॥
॥ ५ ॥ तेनपापेनभोदेविवन्ध्यानारीप्रजायते ॥ सुवर्णस्यकृतंवृक्षंफलपुष्पसमन्वितम् ॥ ६ ॥
दद्याद्वेदविदेनारीपतिसेवासुतत्परा ॥ ततः पुत्रंप्रसूयेतसुवर्णपलतोदश ॥ ७ ॥ परपुंसिरताना
रीस्वपतिमिष्टवादिनी ॥ तेनपापेनभोदेविकन्यापत्यंचजायते ॥ ८ ॥ रौप्यस्यैवकृतांलिङ्गंप
लपञ्चदशेनतु ॥ पूजयित्वाप्रयत्नेनदद्याद्विप्रायश्रोत्रिये ॥ ९ ॥ ततः कन्याहिनभवेच्छीघ्रंपु ॥ ७
त्रंप्रसूयते ॥ सततंवैयदानारीकुलटाधर्मचारिणी ॥ १० ॥ तेनकर्मविपाकेननारीगर्भोविनश्य
ति ॥ ततः प्रपूजयेद्देवंशंखचक्रगदाधरम् ॥ ११ ॥ प्रयागेमकरेस्नानंपतिनातुसहाचरेत् ॥ स्व

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

र्णश्रृङ्गंरौप्यखुरंमुक्तालांगूलग्रंथितम् ॥ १२ ॥ दद्यात्सदक्षिणं देविवृषभंविदुषेतथा ॥ यापातिं
दुर्बलंत्यक्त्वापरेणसहसंगता ॥ १३ ॥ तेनपापेनभोदेविदरिद्रापुत्रवर्जिता ॥ ततःकुमारींसंपू
ज्यब्रह्मविष्णुमहेश्वरम् ॥ १४ ॥ पूजयेदब्दमेकंतुप्रत्यहंनियतःप्रिये ॥ वर्षेपूर्णेततस्तस्यैवस्त्रं
दत्त्वा विसर्जयेत् ॥ १५ ॥ व्रतंसूर्य्यस्यवैकुर्य्यात्प्रणम्यप्रतिवासरम् ॥ तदानारीपूर्वपापंदह
त्येवनसंशयः ॥ १६ ॥ मिष्टंभुनक्तियानारीपत्युर्मिष्टंददातिन ॥ तेनपापेनसानारीमुखेदौर्गन्ध्यगा
मिनी ॥ १७ ॥ गुडंचमधुवाखण्डंविप्रायप्रयतःसदा ॥ प्रयच्छतियदादेविमुखेशुद्धिश्चजायते ॥
॥ १८ ॥ स्वपतिर्म्रीचयथानारीरण्डाभवतिनान्यथा ॥ तयानित्यंप्रपूज्याचतुलसीभक्तिभाव
तः ॥ १९ ॥ ऊर्ज्जेमाघेचवैशाखेप्रातःस्नानंसमाचरेत् ॥ एकादशीव्रतंनित्यंद्वादशाक्षरविद्य
या ॥ २० ॥ जपंकृत्वाप्रयत्नेनपतिरूपायविष्णवे ॥ समर्पणंततःकुर्यात्ततः पापंप्रणश्यति ॥
॥ २१ ॥ यदापापयुतानारीगर्भघातंचकारयेत् ॥ तेनदुश्चरितेनेहज्वरकुक्षिप्रपीडनम् ॥ २२ ॥
योनिशूलंभवेद्देविगुदरोगोभगन्दरः ॥ तदाकुर्यात्प्रयत्नेनब्राह्मणींब्राह्मणंतथा ॥ २३ ॥ रौप्य
स्यचमहादेविदशनिष्कस्यभक्तितः ॥ प्रत्यहंपूजयेद्देविपत्युराज्ञांसमाचरेत् ॥ २४ ॥ भो
जयेद्विविधैश्चान्नैर्घृतखण्डसमन्वितैः ॥ गोदानंचततःकुर्य्याद्दत्त्याविद्योपजीविने ॥ २५ ॥ य

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

 दानारीचदुष्टात्मास्वपतौदुर्वचोवदत् ॥ तदाकण्ठभवेद्रोगोनासिकायांचपीनसम् ॥ २६ ॥
 तिलगुल्मंवापिशिवेश्वेतपुष्पंप्रजायते ॥ रौप्यंपुष्पयुतंदेविसुवर्णेनसमन्वितम् ॥ २७ ॥ दद्या
द्विप्रायविदुषेतदासप्तपलंशुभे ॥ कन्यकांकलहाद्दुष्टाहन्तिनारीयदाहठात् ॥ २८ ॥ तदाकुष्ठंभ
वेद्देविजन्मजन्मदरिद्रता ॥ सूर्यस्यपूजनंकार्यंतेसदानारीव्रतंचरेत् ॥ २९ ॥ मासेमासेशनैवारे
वृक्षेविष्णुस्वरूपिणि ॥ विधिवत्पूजनंकुर्यात्पूर्वपापंविशुध्यति ॥ ३० ॥ श्वश्रूंचश्वशुरंचैव
नित्यंक्रूरवचोवदेत् ॥ तेनपापेनभोदेविश्वेतपुष्पंतनौभवेत् ॥ ३१ ॥ सूर्यस्यप्रतिमांदेविसुव
र्णत्रिपलस्यच ॥ दद्याद्वेदविदेदेविसूर्यस्यैवव्रतंचरेत् ॥ ३२ ॥ ततःपापंक्षयंयातिश्वेतपुष्पंवि
नश्यति ॥ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेस्त्रीकर्मकथनंनामसप्तमोऽध्यायः ॥ ७ ॥
॥ शिवउवाच ॥ ॥ भरण्याः प्रथमेपादेनीलकण्ठोभवद्द्विजः ॥ ब्रह्मकर्मपरिभ्रष्टः काकुत्स्थ
नगरेशुभे ॥ १ ॥ वैश्येनसहमित्रत्वंक्रयंकृत्वादिनेदिने ॥ ब्राह्मणीतत्रवृद्धासीत्पतिपुत्रविवर्जि
ता ॥ २ ॥ तस्याद्रव्यंगृहीतंचविक्रयार्थंद्विजेनतु ॥ ततोबहुदिनंयातंतस्याद्रव्यंनदत्तवान् ॥
॥ ३ ॥ एवंबहुतिथेकालेतस्यमृत्युरजायत ॥ ब्रह्मकर्मपरिभ्रंशान्नरकेपतनंप्रिये ॥ ४ ॥ न
रकान्निःसृतोदेविसर्पयोनिरजायत ॥ सर्पयोनिफलंभुक्त्वागर्दभत्वमुपागतः ॥ ५ ॥ पुनःस

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

प्राप्तवान्देविमध्यदेशेचमानुषम् ॥ धनधान्यसमायुक्तः पुत्रकन्याविवर्जितः ॥ ६ ॥ ततोबहु
तिथेकालेतदाकन्याभवत्प्रिये ॥ स्वर्णपूर्वंहृतंदेविस्वर्णसंबन्धजासुता ॥ ७ ॥ ततःसावर्द्धिताक
न्याविवाहश्चाभवत्खलु ॥ पितृमातृप्रियानित्यंयुवतीतुयदाभवत् ॥ ८ ॥ तदासाविधवाजा
तामातापित्रोश्चदुःखदा ॥ पुनःपुत्रविहीनत्वंप्रायश्चित्तमतःशृणु ॥ ९ ॥ सूर्यमंत्रस्यजाप्येनलक्ष
मेकंवरानने ॥ पार्थिवस्यार्चनंसम्यक्त्र्यंबकेतिततोजपेत् ॥ १० ॥ होमंचकारयेद्धीमान्शत
ब्राह्मणभोजनम् ॥ पायसंशर्करायुक्तंकारयेद्विधिपूर्वकम् ॥ ११ ॥ ततःकूपतडागौचवाटि
कांचमहापथे ॥ एवंकृतेनसंदेहोवंशलाभोवरानने ॥ १२ ॥ यदानाक्रियतेदेवितदावंशोनजाय
ते ॥ १३ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेभरणीनक्षत्रस्यप्रथमचरणप्रायश्चित्त
कथनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ छ ॥ ॥
॥ ईश्वरउवाच ॥ ॥ अथद्वितीयेवक्ष्यामिभरण्याश्चरणेप्रिये ॥ तस्यसर्वंप्रवक्ष्यामियत्कृतंपूर्व
जन्मनि ॥ १ ॥ अयोध्यापुरतोदेविक्रोशमात्रेप्रदक्षिणे ॥ जानकीनगरेशुभ्रेद्विजश्चासीत्सत
स्करः ॥ २ ॥ ब्रह्मकर्मपरिभ्रष्टोमद्यपानरतः सदा ॥ सवेश्यानिरतोनित्यंपत्नीतस्यपतिव्रता ॥
॥ ३ ॥ पतिभक्तिरतानित्यंदेवपूजासुतत्परा ॥ एकदाब्राह्मणोप्येकः क्षुधार्तोदुर्बलःप्रिये ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ ४ ॥ अन्नंचयाचयामासलंपटप्रातिवत्सले ॥ दुर्वचश्चावदद्देवि भिक्षुकंप्रतिदुर्बलम् ॥ ५ ॥ आ
त्मघातः कृतस्तेनदुर्बलब्राह्मणेनच ॥ ततोबहुतिथेकालेमरणंतस्यचाभवत् ॥ ६ ॥ पतिव्रतेन
तत्पत्नीसत्यलोकंजगामसा ॥ बहुवर्षसहस्राणिस्वर्गेवासोभवत्प्रिये ॥ ७ ॥ ततः पुण्यक्षयेजाते
मर्त्यलोकेसमानुषः ॥ पूर्वपापफलाद्देवि पुत्रकन्याविवर्जितः ॥ ८ ॥ तदुद्देशेनमरणंब्राह्मणस्या
भवत्पुरा ॥ मद्यपानंकृतंतेनततःकुष्ठीप्रजायते ॥ ९ ॥ तस्यशान्तिंप्रवक्ष्यामियतःपापात्प्रमुच्य
ते ॥ गायत्रीमूलमंत्रेणलक्षजाप्यंप्रयत्नतः ॥१०॥ दशांशहोमः कर्त्तव्योविप्राणांभोजनंशतम् ॥
विधिवत्पूजयेद्देविकपिलांस्वर्णभूषिताम् ॥ ११ ॥ दद्याद्विप्रायतां देविविदुषेज्ञानरूपिणे ॥ त
तः पुत्रः प्रजायेतरोगनाशोभवेदनु ॥ १२ ॥ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेभरणी
नक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामनवमोऽध्यायः ॥ ९ ॥
॥ शिवउवाच ॥ ॥ एकोवणिग्जनोदेविकाकुत्स्थनगरेशुभे ॥ अग्निकोणेशिवपुरेयोजनार्द्ध
प्रमाणके ॥ १ ॥ धनाढ्योह्यवसद्देविवैश्यवृत्तिरतः सदा ॥ विक्रयंकुरुतेदेविगुडमन्नंरसादिक
म् ॥ २ ॥ एकस्मिन्समयेदेविगुडमादायगच्छतः ॥ वृषभंभारसंपन्नंकरोतिस्मवरानने ॥ ३ ॥
भारेणपीडितोनड्वान्मृतः पथिगतः शिवे ॥ नज्ञातंतस्यवैपापंवृषभार्तिसमुद्भवम् ॥ ४ ॥ एवंब

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

हुतिथेकालेबिल्वमङ्गलकेपुरे ॥ वैश्यस्यमरणंजातंसरय्वांसहभार्यया ॥ ५ ॥ स्वर्गलोकेगतौद्वौ चतौतुक्षेत्रप्रभावतः ॥ षष्टिवर्षसहस्राणिस्वर्गेभुक्तंशुभंफलम् ॥ ६ ॥ ततः पुण्यक्षयेजातेमर्त्ये लोकेवरानने ॥ अवंतीनगरेजातौधनधान्यसमान्वितौ ॥ ७ ॥ मध्यदेशेविशालाक्षीपूर्वकर्मफले नाहि ॥ पुत्रोनजायतेदेविगर्भपातस्तथाशिवे ॥ ८ ॥ कन्यकावैप्रजायेतपुनःपुनर्वरानने ॥ शरी रेचज्वरोत्पत्तिर्मध्येमध्येप्रजायते ॥ ९ ॥ प्रायश्चित्तंप्रवक्ष्यामिपूर्वपापविशुद्धये ॥ सुवर्णस्य वृषंशुभ्रंपलपञ्चमितंतथा ॥ १० ॥ प्रतिमांकारयेद्देविवृषमेकंविभूषितम् ॥ प्रपूज्यशिवमंत्रेण वैदिकेनयथाविधि ॥ ११ ॥ प्रदद्याद्विदुषेतस्मैज्ञानिनेशुद्धबुद्धये ॥ नमःशिवायमंत्रेणलक्षंजा प्यप्रयत्नतः ॥ १२ ॥ रोगतोमुच्यतेदेविनात्रकार्याविचारणा ॥ इतिश्रीकर्मविपाकसंहितायां पार्वतीहरसंवादेभरण्यास्तृतीयचरणप्रायश्चित्तकथनंनामदशमोऽध्यायः ॥ १० ॥

॥ शिवउवाच ॥ ॥ शृणुदेविवरारोहेनृणांकर्मविपाकजम् ॥ प्रवक्ष्यामिनसंदेहोयादितेश्रवणेम तिः ॥ १ ॥ उत्तरेचाप्ययोध्यायास्ततः क्रोशत्रयोपरि ॥ तत्रतस्थौचभोदेविलोकशर्मेतिनाम तः ॥ २ ॥ तस्यपत्नीशुभाङ्गीवैलीलानाम्नीतिविश्रुता ॥ ब्राह्मणः कर्मविभ्रष्टोव्याधरूपोवरान ने ॥ ३ ॥ मृगान्सबालकान्हत्वापक्षिणोविविधानपि ॥ बुभोजपत्नीयुक्तस्तुतुतोषबहुधातदा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ ४ ॥ तस्यपत्नीमहादुष्टामुखराचचलातथा ॥ परपुंसिरतानित्यंधर्मकर्मविवर्जिता ॥ ५ ॥
एवंसर्ववयोजातंवृद्धेसातिवरानने ॥ मरणंतस्यवैदेविस्वपुरेसर्पतस्तथा ॥ ६ ॥ पत्नीचैवतदात
स्यदुष्टावैव्यभिचारिणी ॥ उभौचनरकेयातौस्वकर्मवशतःप्रिये ॥ ७ ॥ कुम्भीपाकेमहाघोरेना
नानरकयातनाम् ॥ भुक्त्वाबहुसहस्राणिपुनर्जातश्चसूकरः ॥ ८ ॥ योनिंचसूकरींभुक्त्वाबिडाल
त्वंपुनःप्रिये ॥ ततोबिडालयोनिंचभुक्त्वागृध्रस्ततोभवत् ॥ ९ ॥ पुनःकर्मवशाद्देविमानुष
त्वंततोलभत् ॥ इहलोकेवरारोहेपूर्वकर्मप्रभावतः ॥ १० ॥ मृतवत्साभवेन्नारीपुत्रश्चैवनजीव
ति ॥ बहुरोगीभवेद्देविज्वरेणैवप्रपीडितः ॥ ११ ॥ पूर्वजन्मकृतंपापमिहजन्मनिभुज्यते ॥ इह
लोकेकृतंकर्मजन्मजन्मनिभुज्यते ॥ १२ ॥ अथशान्तिंप्रवक्ष्यामिशृणुत्वंगिरिजेमम ॥ वंशगो
पालमंत्रेणलक्षंजाप्यंवरानने ॥ १३ ॥ दशांशहोमःकर्तव्योविप्राणांभोजनंशतम् ॥ मंत्रंचत
त्प्रवक्ष्यामिकृष्णमन्त्रमनुत्तमम् ॥ १४ ॥ येनजाप्येनभोदेविशीघ्रंपुत्रमवाप्स्यति ॥ ॐ देवकी
सुतगोविन्दवासुदेवजगत्पते ॥ १५ ॥ देहिमेतनयंकृष्णत्वामहंशरणंगतः ॥ ततोवैसमृगान्हत्वा
मृगबालान्सपक्षिणः ॥ १६ ॥ स्वर्णपञ्चपलेनैवमृगान्कृत्वासबालकान् ॥ रौप्यस्यैववरारोहेप
क्षिणःपञ्चकारयेत् ॥ १७ ॥ पूजनंविधिवत्कुर्यात्संप्रार्थ्यपरमेश्वरम् ॥ स्रष्टारंसर्वलोकानांसर्वकर्म

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

प्रदंसताम् ॥ १८ ॥ देवदेवजगन्नाथशरणागतवत्सल ॥ त्राहिमांकृपयादेवपूर्वकर्मविपाकतः ॥
॥ १९ ॥ एवंसंपूज्यदेवेशंततोविप्रंप्रपूजयेत् ॥ सुवर्णेनवरारोहेसर्पांदिवाहनेनवै ॥ २० ॥ प्रति
मामर्पयेच्चैवविप्रायज्ञानरूपिणे ॥ वाटिकाकूपखातंचपथिमध्येशुभानने ॥ २१ ॥ प्रकरोतिय
दादेवितदापुत्रःप्रजायते ॥ रोगात्प्रमुच्यतेदेवीजीवेत्पुत्रोनसंशयः ॥ २२ ॥ इतिश्रीकर्मविपाकसं
हितायांपार्वतीहरसंवादेभरण्याश्चतुर्थचरणप्रायश्चित्तकथनंनामैकादशोऽध्यायः ॥ ११ ॥
॥ ईश्वरउवाच ॥ ॥ कृत्तिकायांवरारोहेपूर्वजन्मनिसाश्रितम् ॥ नामतोह्यहिशर्मेतिशुभाशुभ
विचेष्टितम् ॥ १ ॥ ईशानेपिततोदेविकोशलापुरतोनघे ॥ राजपुत्रोवसत्कश्चिन्नगरेगूढसंज्ञके
॥ २ ॥ नामतोह्यहिशर्मेतितस्यपत्नीकलाशुभा ॥ धनधान्यसमायुक्तोरूपवान्मन्मथोयथा ॥
॥ ३ ॥ यातिचाखेटकंनित्यंमृगींहत्वाचगर्भिणीम् ॥ प्रत्यहंमृगमांसेनपोषयेत्स्वतनुंतथा ॥ ४ ॥
शरीरेवृद्धताजातादयातस्यनचाभवत् ॥ ततोवैमरणाद्देविसती भार्याततोभवत् ॥ ५ ॥ सत्य
लोकंगतस्तेनभार्यायाःसुकृतेनतु ॥ भुक्तंकल्पमितंपुण्यंसत्यलोकेवरानने ॥ ६ ॥ पुनःपुण्यक्ष
येजातेमानुषत्वमुपागतः ॥ पत्न्यासहततोदेविकुलेमहतिपूजिते ॥ ७ ॥ पूर्वजन्मविपाकेनमृतव
त्सत्वमाप्नुयात् ॥ मृगींसगर्भांहत्वावैपूर्वजन्मनिसुव्रते ॥ ८ ॥ तेनकर्मविपाकेनमर्त्यलोकेह्यपुत्र

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

कः ॥ तस्यशांतिंप्रवक्ष्यामियतःपुत्रोपिजायते ॥ ९ ॥ गायत्रीजातवेदाभ्यांलक्षमेकंजपंतथा ॥
दशांशहोमःकर्तव्योविप्राणांभोजनंततः ॥ १० ॥ सौवर्णंनमृगींकृत्वामृगबालंतथैव च ॥ पूज
यित्वाविधानेनकपिलांचततःप्रिये ॥ ११ ॥ प्रदद्याद्देदविदुषेब्राह्मणायसुतेजसे ॥ हरिवंशस्यश्र
वणंचण्डीपाठंशिवार्चनम् ॥ १२ ॥ एवंकृत्वाविधानेनशीघ्रंपुत्रः प्रजायते ॥ कन्यकानभवेत्त
स्यगर्भपातोनजायते ॥ १३ ॥ रोगात्प्रमुच्यतेरोगीसर्वकामःप्रजायते ॥१४॥ इतिश्रीकर्मविपाकसं
हितायांपार्वतीहरसंवादेकृत्तिकानक्षत्रस्यप्रथमपादप्रायश्चित्तकथनंनामद्वादशोऽध्यायः ॥ १२ ॥
॥ शिवउवाच ॥ ॥ नराणांपुण्यशीलानामिहजन्मसमुद्भवम् ॥ सुखंवक्ष्याम्यहंदेविपूर्वंकर्मफलं
यतः ॥ १ ॥ येनदत्तंपुरादानंगोसुवर्णगजादिकम् ॥ तत्फलेनमहादेविइहतस्मात्सुखंभवेत् ॥
॥ २ ॥ शरीरेजन्मतः कांतिर्लक्ष्मीवान्गुणवानपि ॥ सौख्यंप्रभुज्यतेनित्यंपुत्रताधनतातथा ॥
॥ ३ ॥ नरोगोजायतेदेविदुःखंनैवकदाचन ॥ इहलोकेसुखंभुक्त्वाकीर्तिमान्सुखमेधते ॥ ४ ॥
अथवक्ष्याम्यहंदेविनक्षत्रेकृत्तिकाह्वये ॥ द्वितीयचरणेदेविपूर्वंयत्फलमुच्यते ॥ ५ ॥ कान्यकु
ब्जोद्विजःकश्चिदिन्द्रशर्मेतिनामतः ॥ पत्नीरुद्रमतिर्देविकुशीलाकलहप्रिया ॥ ६ ॥ वेदपाठर
तोनित्यंषडङ्गस्यचपाठकः ॥ एकदातत्रवैदेशेकश्चित्क्षत्रीनराधिपः ॥ ७ ॥ मरणेतस्यवैयातेत

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

द्विप्रस्यानमन्त्रणम् ॥ भुक्तंतेनतदादेविक्षत्रियस्यक्रियासुच ॥ ८ ॥ गृहीतंतस्यवैदानंशय्याचै
वगजादिकम् ॥ सर्वंगृह्यगृहंगत्वाभुक्तंबहुदिनंप्रिये ॥ ९ ॥ ततोबहुगतेकालेतस्याविप्रस्यपञ्च
ता ॥ यातोवैयमलोकेवैनरकेवैसुदारुणे ॥ १० ॥ भुक्तंस्वकर्मजंदुःखंयुगमेकंवरानने ॥ गज
व्याघ्रक्रमेयोनिंततोभुक्तेपृथक्पृथक् ॥ ११ ॥ मनुष्यत्वंततःप्राप्यपूर्वकर्मविपाकतः ॥ पुत्रोन
जायतेदेविकन्यकाविविधास्तदा ॥ १२ ॥ मृतवत्साभवन्नारीरोगाश्चविविधाःप्रिये ॥ शांतिंत
स्यप्रवक्ष्यामियतःपुत्रमवाप्स्यते ॥ १३ ॥ गायत्रीलक्षजाप्येनत्र्यम्बकेनतथाप्रिये ॥ होमंचका
रयामासषडंशंदानमेवच ॥ १४ ॥ दशवर्णांततोदद्याद्विधिवद्ब्राह्मणायवै ॥ भोजयेच्छतसंख्यं
चब्राह्मणंवेदपारगम् ॥ १५ ॥ एवंकृतेनभोदेविपुत्रश्चैवप्रजायते ॥ रोगाणांचनिवृत्तिःस्यात्पूर्व
पापक्षयोभवेत् ॥ १६ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेकृत्तिकानक्षत्रस्यद्विती
यचरणप्रायाश्चित्तकथनंनामत्रयोदशोऽध्यायः ॥ १३ ॥

॥ शिवउवाच ॥ ॥ तृतीयंतस्यवैदेविचरणंवदतःशृणु ॥ कान्यकुब्जकुलेकश्चिन्नगरेसूर्यसंज्ञके
॥ १ ॥ उद्द्योतशर्मांविख्यातस्तस्यस्त्रीगिरिजाभवत् ॥ वेदपाठरतोनित्यंदारिद्र्येणैवपीडितः ॥
॥ २ ॥ कर्कशाभामिनीतस्यानिष्ठुरंवदतिस्मता ॥ एकदासमयंग्रहणेतैलकारस्तदागतः ॥ ३ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

गंगामध्यततादानंतस्मैविप्रायवैशिवे ॥ प्रददौलक्षसंख्यां वैस्वर्णमुद्रांतुदक्षिणाम् ॥ ४ ॥ प्रति
गृह्यततोदानंगृहंगत्वाद्विजस्तदा ॥ व्ययंकरोतिस्मतदाभार्यापुत्रेणचैवहि ॥ ५ ॥ वेदपाठंतत
स्त्यक्त्वाप्रत्यहंससुखंशिवे ॥ मरणंवृद्धसमयेगृहेशय्योपरिस्थिते ॥ ६ ॥ स्वर्णमध्येचदानं वैनद
त्तंगिरिनन्दिनि ॥ सगतोनरकेघोरेयमराजेनप्रेरितः ॥ ७ ॥ भुंक्तेनरकजंदुःखंस्त्रीपुत्रेणचसंयुतः
॥ युगमेकंवरारोहेप्रेतत्वंकाकतांततः ॥ ८ ॥ ततःशृगालयोनिंचमानुषत्वंततोगतः ॥ पूर्वजन्म
कृतंकर्मइहलोकेप्रभुज्यते ॥ ९ ॥ पाठयामासवैवेदान्ब्राह्मणेभ्योवरानने ॥ तत्सञ्चितफलाद्देवि
महैश्वर्यमवाप्नुयात् ॥ १० ॥ भार्यामृताततःपुत्रोद्वितीयाचविवाहिता ॥ शरीरेबहवोरोगाःसु
खंतस्यनजायते ॥ ११ ॥ वृद्धेसतिवरारोहेपुत्रःशत्रुर्भवेदिति ॥ मृतवत्साभवेन्नारीपूर्वजन्मवि
पाकतः ॥ १२ ॥ तस्यपुण्यमहंवक्ष्येयतोरोगीनिवर्तते ॥ पुनःपुत्रोभवेद्देविकन्यकानैवजायते ॥
॥१३॥ जातवेदादिमन्त्रेणजपं वैकारयेद्बुधः॥लक्षत्रयंप्रयत्नेनततोहोमंतिलादिभिः॥१४॥ चतुर
स्रेशुभेकुण्डेहरिवंशश्रवंततः ॥ भूदानंविधिवत्कुर्याच्छय्यांपात्रायदापयेत् ॥ १५ ॥ एवंकृतेनसं
देहोरोगनाशोभविष्यति ॥ पुत्रश्चजायतेदेविनात्रकार्याविचारणा ॥ १६ ॥ इतिश्रीकर्मविपाकसंहि
तायां पार्वतीहरसंवादेकृत्तिकानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामचतुर्दशोऽध्यायः ॥१४॥ ॥१२॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ शिवउवाच ॥ ॥ कान्यकुब्जाद्द्विजः कश्चिन्नर्मदादक्षिणेतटे ॥ माहिष्मत्यांवसत्येकोद्विजः
परमवैष्णवः ॥ १ ॥ नामतोयोधशर्मेतितस्यभार्यातुदानवी ॥ प्रत्यहंवैश्यवृत्तिस्तुविक्रयंचाक
रोत्सदा ॥ २ ॥ तत्रवैश्यउवासैकोधनधान्यसमन्वितः॥वैश्यतस्तेनविप्रेणस्वर्णनीतमृणंबहु ॥३॥
ततोबहुतिथेकालेसविप्रोमृत्युमागतः ॥ ऋणंतस्मैनदत्तंवैवैश्यायतुस्वकर्मणे ॥ ४ ॥ मरणेस
तिविप्रस्तुरौरवंनरकंगतः ॥ वैश्यकर्मकृतंतेनस्वकर्मपरिमुच्यते ॥ ५ ॥ विंशद्वर्षसहस्राणिना
गलोकेवसत्यसौ ॥ नरकान्निःसृतोदेवियातोवृषभसूकरौ ॥ ६ ॥ योनिद्वयंफलंभुक्त्वामनुष्य
त्वमवाप्तवान् ॥ धनधान्यसमायुक्तस्तत्पुण्यस्यप्रभावतः ॥ ७ ॥ ऋणसंबन्धतोदेविवैश्यपुत्र
त्वमागतः ॥ प्रत्यहंतस्यवैद्रव्यंव्ययंकुर्याद्दिनेदिने ॥ ८ ॥ मद्यवेश्याप्रदानेनधनंसर्वंव्ययंकृतम् ॥
यदापुत्रः समुत्पन्नोयुवारूपोभवत्प्रिये ॥ ९ ॥ तदामृत्युमवाप्नोतिशोकंदत्वातयोस्तदा ॥ पुनः
पुत्रोनजातोवैपूर्वजन्मविपाकतः ॥ १० ॥ प्रायश्चित्तंप्रवक्ष्यामिपूर्वपापविशुद्धये ॥ गायत्रीलक्ष
जाप्येनतदर्थंवाटिकांपथि ॥ ११ ॥ कूपंप्रयत्नतःकुर्यात्तडागंविधिपूर्वकम् ॥ होमंवैकारयेच्चै
वविधिपूर्वंवरानने ॥ १२ ॥ पलपञ्चसुवर्णस्यदानंदद्याद्विशेषतः ॥ दशवर्णाप्रदातव्यास्वर्णयु
क्तासहाम्बरा ॥ १३ ॥ भोजयेच्छताविप्रांस्तुयथाशक्तिसदक्षिणान् ॥ एवंकृतेनसंदेहोरोगना

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

शोभवेदनु ॥ १४॥ पुत्रपौत्राविवर्द्धंतेममवाक्यंनचान्यथा ॥ १५ ॥ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादेकृत्तिकानक्षत्रस्यचतुर्थंचरणप्रायाश्चित्तकथनंनामपंचदशोऽध्यायः ॥ १५ ॥

॥ महादेवउवाच ॥ ॥ अथातःसंप्रवक्ष्यामिब्रह्मनक्षत्रजंफलम् ॥ रोहिण्याःप्रथमेपादेयस्यजन्मचजायते ॥ १ ॥ तस्यकर्मपुरोदेविसंचितंसंब्रवीम्यहम् ॥ अन्तर्वेद्यांद्विजः कश्चिद्गोपनामावसत्प्रिये ॥ २ ॥ पुण्यकर्मविहीनश्चचौरकर्मरतः सदा ॥ सार्द्धंचोरेणभोदेविबहुद्रव्यमुपार्जितम् ॥ ३ ॥ परस्त्रीलंपटोदेविस्वभार्यांपरिमुच्यच ॥ एवंबहुगतेकालेकालवश्यस्ततोभवत् ॥ ४ ॥ यमाज्ञयायमदूतैर्नरकेनामकर्दमे ॥ वासयामासभोदेविषष्टिवर्षसहस्रकम् ॥ ५ ॥ नरकान्निःसृतोदेविकुक्कुटत्वंप्रजायते ॥ ततोयातोमहादेविनरयोनिंचदुर्लभाम् ॥ ६ ॥ पाण्डुरोगेणसंयुक्तः पुत्रोनैवप्रजायते ॥ वेश्याः कन्याः प्रजायंतेपुत्रस्यमरणंभवेत् ॥७॥ तस्योपदानंवक्ष्यामितत्सर्वंशृणुमेप्रिये ॥ ॐनमःशिवायमंत्रेणलक्षजाप्यंचकारयेत् ॥ ८ ॥ पार्थिवंतिलपिष्टेनगोमयेनतथाप्रिये ॥ पूजयामासविधिवद्भक्तियुक्तेनचेतसा ॥ ९ ॥ होमंचिकारयेद्देविषडंशंदक्षिणांततः ॥ आचार्यायसुवर्णंचपूर्वपापविशुद्धये ॥ १० ॥ कूपंखात्वाततोदेविवाटिकांचैवकारयेत् ॥ एवंकृतेनसंदेहोरोगनाशोभवेदनु ॥ ११ ॥ कन्यकानभवेद्देविपुत्रश्चैवप्रजायते ॥ मृतवत्सालभेत्पुत्रंचिरजीविनमुत्त

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

मम् ॥ १२ ॥ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेरोहिणीनक्षत्रस्यप्रथमचरण प्रायश्चित्तकथनंनामषोडशोऽध्यायः ॥ १६ ॥

॥ शिवउवाच ॥ ॥ द्वितीयचरणेदेविरोहिण्याःशृणुविस्तरम् ॥ गंगायाउत्तरेकूलेपुरं वैमानिकं शुभम् ॥ १ ॥ वासुदेवश्चनाम्नाहिब्राह्मणोवेदपारगः ॥ लीलावतीपवित्राचतस्यपत्नीशुभातथा ॥ ॥ २ ॥ युवतीरूपसंपन्नास्वैरिणीचसदाप्रिये ॥ बहुद्रव्यंतयालब्धंपरपुंसःप्रसंगतः ॥ ३ ॥ पा पादुपार्जितंद्रव्यंभुज्यतेपतिनासह ॥ गंगायांमरणंतस्यविप्रस्यभार्ययासह ॥ ४ ॥ स्वर्गवासोहि दंपत्योःषष्टिवर्षसहस्रकम् ॥ ततःपुण्यक्षयेजातेमर्त्यलोकेवरानने ॥ ५ ॥ धनधान्यसमायुक्तो धर्मेमतिरथाधिका ॥ पुत्राश्चबहवस्तेषांमरणंचैवजायते ॥ ६ ॥ कन्यकाविविधास्तासांमृत्यु श्चैवप्रजायते ॥ पुनश्चतस्यहानिश्चबहुरोगःप्रजायते ॥ ७ ॥ तस्यशांतिंप्रवक्ष्यामियत्कृतंपूर्वज न्मनि ॥ त्र्यंबकेतिचमंत्रेणलक्षजाप्यंचकारयेत् ॥ ८ ॥ देवस्यप्रतिमांकृत्वापूजयेच्चैवशास्त्रतः ॥ सुवर्णस्यशिवंकुर्यात्पलपञ्चप्रमाणकम् ॥ ९ ॥ धूपैर्दीपैश्चनैवेद्यैर्मंत्रेणानेनपूजयेत् ॥ ॐ ह्रौं ह्रींजूंसःहरायनमःइतिप्रतिमास्थापनं रौप्यपात्रे ॥ ॐ ह्रौंह्रींजूंसःमहेश्वरायनमः इति उप करणानिसंगृह्यस्थापयेत् ॥ ॐह्रौंह्रींजूंसः पिनाकधृतेनमः इतिप्रतिमांसंस्पृश्यावाहनंच ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

आवाहयेमहादेवंदेवदेवंसनातनम् ॥ इमांपूजांगृहाणत्वंममपापंव्यपोहतु ॥ १० ॥ ॐ ह्रौंह्रीं
जूंसःयंरंलंवंशंषंसंहंक्षंसोहंशंकरस्यसर्वेन्द्रियवाङ्मनश्चक्षुःश्रोत्रघ्राणाइहागत्यइहजीवस्थितिसुखं
चिरंतिष्ठंतुस्वाहा ॥ इतिप्राणप्रतिष्ठांविधायाशिवंध्यायन्पूजयेत् ॥ ॐ ह्रौंह्रींजूंसः पशुपत
येनमः इतिपञ्चामृतेनस्नानम् ॥ ॐ ह्रौंह्रींजूंसः शिवायनमः इतिचन्दनादिभिः पूजनम् ॥ ॐ
ह्रौंह्रींजूंसः महादेवायनमः इतिविसर्जनम् ॥ गोदानंचततः कुर्यात्कृष्णांचकपिलांततः ॥ वि
प्रायवेदविदुषेसुवर्णंदक्षिणांततः ॥ प्रदक्षिणांततःकुर्याद्विप्रस्येशानरूपिणः ॥ शतसंख्यद्विजां
श्चैवभोजयित्वाविसर्जयेत् ॥ ११ ॥ प्रयागेमकरेमाघेपत्न्यासहवरानने ॥ स्नानंकुर्याच्चभोदेविव्रत
मेकादशींचरेत् ॥ १२ ॥ एवंकृतेनसंदेहोरोगनाशश्चजायते ॥ पुत्रंचापिलभेद्देविचिरंजीविनमु
त्तमम् ॥ १३ ॥ यद्येवंनप्रकुरुतेसप्तजन्मस्वपुत्रकः ॥ १४ ॥ इति श्रीकर्मविपाकसंहितायांपा
र्वतीहरसंवादेरोहिणीद्वितीयचरणप्रायश्चित्तकथनंनामसप्तदशोऽध्यायः ॥ १७ ॥

॥ शिवउवाच ॥ ॥ गोमत्याउत्तरेकूलेक्रोशद्वयप्रमाणतः ॥ विष्णुदासेतिविख्यातोदेविपुत्रोव
रानने ॥ १ ॥ शङ्करेवैपुरेशुभ्रेतस्यभार्याचसुन्दरी ॥ कर्कशाकुलटासावैपतिविद्वेषकारिणी ॥ २ ॥
शुश्रूषांकुरुतेनैवश्वश्रवोश्चैववरानने ॥ स्वधर्मनिरतोनित्यंशिवभक्तिपरायणः ॥ ३ ॥ कृषिंवै

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

सोकरोच्चैवविप्राणांचैवसेवकः ॥ पित्रोश्वपरमोदासःसदाचप्रियभाषणः ॥ ४ ॥ एतस्मिन्नगरे देविव्रतीकाश्चित्समागतः ॥ भिक्षार्थमागतोद्वारेतयाभिक्षाददेनच ॥ ५ ॥ अपभ्रंशमवोचत्तु भिक्षुकंप्रतिसुंदरी ॥ विष्णुदासोगृहेनासीत्तद्दिनेकुत्रचिद्गतः ॥ ६ ॥ एवंबहुगतेकालेतस्यमृत्यु र्बभूवह ॥ भक्तत्वान्ममभोदेवियक्षलोकेगतःसवै ॥ ७ ॥ त्रिंशद्वर्षसहस्राणियक्षेणसहभोगवान् ॥ तस्यभार्यामृताक्रूराश्वश्वोश्वदुःखदायिनी ॥ ८ ॥ सागतानरकेघोरेरौरवेनाम्निभामिनि ॥ भु क्त्वानरकजंदुःखंपुनर्व्याघ्रीबभूवह ॥ ९ ॥ पुनःशृगालीवैजातामानुषीचततोभवत् ॥ पुनर्वि वाहितासावैमर्त्यलोकेवरानने ॥ १० ॥ वंध्याचैवविशालाक्षिपूर्वजन्मविपाकतः ॥ रोगोबहुभवे देविसुखंवैनोपजायते ॥ ११ ॥ तस्याःपुण्यंप्रवक्ष्यामिसर्वपापप्रणाशनम् ॥ स्वपतिंप्रत्यहंमा घेस्नापयेदुष्णवारिणा ॥ १२ ॥ श्वश्रूचरणयोःप्रातर्नमस्कुर्यात्प्रयत्नतः ॥ अलाबुंनैवखादेत्तु षड्दशाब्दप्रमाणतः ॥ १३ ॥ माघेनियमतोदेविपतिनासहसुव्रते ॥ स्नानंनियमतोदेविदीपंदद्या द्यथाविधि ॥ १४ ॥ ततः कृत्वासुवर्णस्यवृक्षंवैद्विपलस्यच ॥ रौप्यांदशपलां देविवेदींशुभ्रांच कारयेत् ॥ १५ ॥ वृक्षंतस्यांचसंस्थाप्यकल्पवृक्षस्वरूपिणम् ॥ पूजयित्वाततोदेवंशंखचक्र गदाधरम् ॥ १६ ॥ सगणंदेवदेवेशंवृषकेतुंवरप्रदम् ॥ ततोवैपूजयेद्देविविधिवद्ब्रह्मरूपिणम् ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ १७ ॥ वस्त्रकाञ्चनकेयूरैः कुण्डलाभ्यांविशेषतः ॥ तद्वृक्षं वेदिकायुक्तंतस्मैविप्रायदापयेत् ॥
॥ १८ ॥ अन्यान्विप्रान्वरारोहेभोजयेद्विविधैरसैः ॥ पायसैर्मोदकैःशुभ्रैःषट्षष्टिप्रमितान्प्रिये ॥
॥ १९ ॥ ततोगांकपिलांदद्यात्स्वर्णशृङ्गींसनूपुराम् ॥ सप्तम्यांरवियुक्तायांव्रतंकुर्यान्ममाप्रिये ॥
॥ २० ॥ गोपालस्यचमंत्रेणलक्षजाप्यंचकारयेत् ॥ होमस्तत्तद्दशांशेनमार्जनंतर्पणंतथा ॥ २१ ॥
एवंकृतेनसंदेहःशीघ्रंपुत्रअवाप्यते ॥ कन्यकानैवजायंतेरोगश्चैवनिवर्त्तते ॥ २२ ॥ इतिश्रीक०
सं० पार्वतीहरसंवादेरोहिणीनक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामाष्टादशोऽध्यायः ॥ १८ ॥
॥ शिवउवाच ॥ ॥ रोहिण्याश्चरणंदेविचतुर्थंसांप्रतंशृणु ॥ यत्कृतंसञ्चितंपूर्वमिहजन्मानितत्फ
लम् ॥ १ ॥ बुद्धिशर्माद्विजः कश्चिदन्तर्वेद्यांबभूवह ॥ पुरोहितोमहाभ्रष्टः परपाकेसदारतः ॥
॥ २ ॥ सास्त्रीपररतातस्यचञ्चलाचपलासदा ॥ धनंचसंचितं तेनप्रतिग्रहेणवैप्रिये ॥ ३ ॥ मरणं
तस्यवैजातंपश्चाद्भार्यामृतातुसा ॥ गतोसौनरकेघोरेपूर्वजन्मविपाकतः ॥ ४ ॥ युगमेकंवरारोहे
भुक्त्वानरकयातनाम् ॥ वृषयोनिंचसंप्राप्तोरासभत्वंततोलभत् ॥ ५ ॥ मानुषत्वंपुनर्यातोम
ध्यदेशेवरानने ॥ अपुत्रताभवेद्देविकन्यकाचैवजायते ॥ ६ ॥ शरीरेरोगउत्पन्नःसुखंनैवप्रजाय
ते ॥ प्रायश्चित्तंततोदेविप्रवक्ष्यामिवरानने ॥ ७ ॥ आकृष्णेतिजपेन्मंत्रंलक्षं वैविधिवत्प्रिये ॥ हो

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

मंतुकारयामासतिलाज्यमधुनासह ॥ ८ ॥ कुंडेवैवर्तुलाकारेदशांशंतर्पणंतथा ॥ मार्जनंतुविशे
षेणततोब्राह्मणभोजनम् ॥ ९ ॥ दशवर्णाप्रदातव्यागुडधेनुस्तथाप्रिये ॥ शय्यांदद्यात्प्रयत्नेन
विधिवद्ब्राह्मणायच ॥ १० ॥ भोजयेद्ब्राह्मणाञ्छुद्धान्वेदपाठरतान्प्रिये ॥ सप्तसप्ततिसंख्यान्वैदी
क्षिताञ्छुद्धमानसान् ॥ ११ ॥ प्रयागेमाघमासेवैप्रातः स्नानंसभार्यया ॥ एवंकृतेनसंदेहःपुत्रस्त
स्यप्रजायते ॥ १२ ॥ रोगःप्रमुच्यतेतस्यवंध्यात्वंचप्रणश्यति ॥ मृतवत्सालभेत्पुत्रंकन्यकानै
वजायते ॥ १३ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेरोहिणीनक्षत्रचतुर्थचरण
स्यप्रायश्चित्तकथनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ ॥

॥ शिवउवाच ॥ ॥ अथवक्ष्येमहादेविचंद्रनक्षत्रजंफलम् ॥ यत्कृतंमानुषैःपूर्वंतच्छृणुष्ववरान
ने ॥ १ ॥ मध्यदेशेपुरेशुभ्रेवसत्येकोद्विजः खलु ॥ ब्रह्मकर्मरतोनित्यंवेदवेदांगपारगः ॥ २ ॥
प्रत्यहंपाठयामासचतुर्वेदान्सविस्तरान् ॥ वेदशर्माद्विजःख्यातस्तस्यपत्नीसुशीलिका ॥ ३ ॥
प्रत्यहंपाठयेद्वेदंजीविकार्थंवरानने ॥ लोहकारोभवन्मित्रस्तस्यविप्रस्यसुव्रते ॥ ४ ॥ स्वर्णंशत
पलंदेविस्थापितंलोहकर्मणा ॥ तस्यविप्रस्यभवनेमित्रत्वाच्चवरानने ॥ ५ ॥ लोहकारस्यमरणं
ततःपूर्ववरानने ॥ नदत्तंतस्यवैस्वर्णंलोहकारायभामिनि ॥ ६ ॥ तत्स्वर्णंप्रत्यहंदेविबुभोजस

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

हभार्यया ॥ एवंबहुगतेकालेमरणंब्राह्मणस्यवै ॥ ७ ॥ सूर्यलोकोभवद्देवियतः सूर्यस्यसेवकः ॥
विंशद्वर्षसहस्राणिसूर्यलोकेवसत्प्रिये ॥ ८ ॥ ततःपुण्यक्षयेजातेमर्त्यलोकेचमानवः ॥ पुत्रक
न्याविहीनस्तुधनधान्यसमन्वितः ॥ ९ ॥ लोहकारस्यस्वर्णंहिगृहीतंनैवदत्तवान् ॥ तेनकर्म
विपाकेनलोहकारः सुतोभवत् ॥ १० ॥ प्रीतिमांश्चैवसर्वेषांपितृमातृप्रियंकरः ॥ पूर्वरूपंसमा
पन्नस्तदामृत्युर्भवेदनु ॥ ११ ॥ पुनः पुत्रस्यचाभावः कन्यकानेवजायते ॥ तस्याघस्यविशु
द्ध्यर्थंप्रायश्चित्तमतःशृणु ॥१२॥ गायत्रीलक्षजाप्येनदुर्गायाः पूजनेनच ॥ दशवर्णप्रदानेनभू
मिदानेनपार्वति ॥ १३ ॥ सर्वपापंक्षयंयातिपूर्वजन्मसमुद्भवम् ॥ गयाश्राद्धंप्रयत्नेनतदर्थंनिय
तः प्रिये ॥ १४ ॥ प्रयागेमकरेमासिस्नानंकुर्यात्प्रयत्नतः ॥ ततः पापंक्षयंयातिपुनः पुत्रश्चजीव
ति ॥ १५ ॥ रोगाःसर्वेक्षयंयांतिनात्रकार्याविचारणा ॥ १६ ॥ इति श्रीकर्मविपाकसंहितायांपा
र्वतीहरसंवादेमृगशिरोनक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामविंशोऽध्यायः ॥ २० ॥
॥ शिवउवाच ॥ ॥ कान्यकुब्जेशुभेदेशेनिकटेनन्दनेपुरे ॥ बोधशर्माद्विजश्चासीत्पुरेतस्मिन्हि ॥२१॥
निर्धनः ॥ १ ॥ परान्नंभुज्यतेनित्यंपरप्रेष्यरतः सदा ॥ तस्यपत्नीसमाख्यातावाधमानामवैपु
रा ॥ २ ॥ जन्मतोमरणंयावत्परान्नंभुज्यतेचवै ॥ नरकेपतनंतेनतयोर्जातंप्रतिग्रहात् ॥ ३ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

बहुवर्षसहस्राणिप्रवासोनरकेभवत् ॥ नरकान्निःसृतोदेविकाकश्चैवमृगोभवत् ॥ ४ ॥ पुनर्वैमे
षयोनिश्चपूर्वकर्मविपाकतः ॥ ततोवैमानुषोजातोमध्यदेशेवरानने ॥ ५ ॥ रोगवान्नृत्यशीलश्च
पुत्रकन्याविवर्जितः ॥ परान्नंप्रत्यहंभुंक्तेश्राद्धंनैवकृतंपुरा ॥ ६ ॥ अतोवंशस्यविच्छेदःफलंचैव
तुपूर्वजम् ॥ शांतितस्यप्रवक्ष्यामिपूर्वपापक्षयोयतः ॥ ७ ॥ गायत्रीजातवेदाभ्यांद्विलक्षंजा
पयेच्छिवे ॥ ततः पापविशुद्धिःस्याद्दशांशहवनंयदा ॥ ८ ॥ मार्जनंदेविकर्तव्यंब्राह्मणान्भो
जयेत्ततः ॥ शतसंख्यान्द्विजाञ्छुद्धान्गृहस्थानपिभक्तितः ॥ ९ ॥ वृषमेकंप्रदद्यात्तुनीलव
र्णविभूषितम् ॥ एवंकृतेनसंदेहोरोगनाशोभवेद्ध्रुवम् ॥ पुत्रस्तुजायतेदेविवन्ध्यात्वंचप्रणश्यति ॥
॥ १० ॥ ॥ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादेमृगाशिरोद्वितीयचरणप्रायश्चित्त
कथनंनामैकाविंशोऽध्यायः ॥ २१ ॥ ॥ ॥
॥ शिवउवाच ॥ नर्मदादक्षिणेतीरेपुरीकानामवैपुरी ॥ तस्यांपुर्यांविशालाक्षिकुलालोधनवानपि ॥
॥ १ ॥ कुलालकर्मतोदेविबहुद्रव्यमुपार्जितम् ॥ कर्मचन्द्रइतिख्यातस्तस्यपत्नीचदेवकी ॥ २ ॥
स्वकर्मनिरतोनित्यंपात्रंकृत्वादिनेदिने ॥ एवंसर्वव्ययंजातंवृद्धत्वंचततोभवत् ॥ ३ ॥ वृद्धेजा
महादेविदारिद्र्यत्वमजायतत ॥ शूर्पकारस्यवेतनं व्यवहारेकृतवान् ॥ ४ ॥ शतसंख्यामितंस्वर्ण

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanvantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

व्ययंसर्वंकृतंशिवे ॥ कुलालस्याभवन्मृत्युःपत्नीतस्यमृतापुरा ॥ ५ ॥ नर्मदायांमहादेवितावुभौ
मृत्युमापतुः ॥ तत्तीर्थस्यफलाद्देविस्वर्गलोकंगतावुभौ ॥ ६ ॥ बहुवर्षसहस्राणिताभ्यांभुक्तंशुभं
फलम् ॥ ततःपुण्यक्षयेजातेमृत्युलोकेचजायते ॥ ७ ॥ मानुषेपिशुभंजन्मधनधान्यसमन्वितः ॥
पुनर्विवाहितानारीपूर्वजन्मप्रसङ्गतः ॥ ८ ॥ ऋणसंबन्धतोदेविपुत्रोजातस्तदाशिवे ॥ शूर्प
काशेमहादेविविरुद्धंचबालतः कृतम् ॥ ९ ॥ प्रत्यहंवसुयच्छब्धंतत्सर्वंचव्ययंतथा ॥ द्यूतवेश्याप्र
दानेनधनंसर्वंव्ययंगतम् ॥ १० ॥ युवाजातोयदादेविपुत्रःकन्यासमन्वितः ॥ मरणंतस्यवैजातं
पुनः पुत्रोनजायते ॥ ११ ॥ अथशान्तिंप्रवक्ष्यामिशृणुसर्ववरानने ॥ गायत्रीलक्षजाप्येनत्र्यम्ब
केनतथाप्रिये ॥ १२ ॥ कर्त्तव्यंकुण्डमुग्रं वैत्रिकोणंविधिवत्प्रिये ॥ होमंचकारयेद्देविदशांशंतर्प
णंततः ॥ १३ ॥ ततोवैकपिलांदद्याद्धेमशृंगींसहाम्बराम् ॥ एवंकृत्वावरारोहेपुनःपुत्रःप्रजाय
ते ॥ १४ ॥ शूर्पंकारस्यप्रतिमांपलसप्तदशस्यतु ॥ सुवर्णस्यैवभोदेविरचितांवस्त्रछादिताम् ॥
॥ १५ ॥ शूर्परौप्यस्यवैकुर्यात्पलषष्टिप्रमाणतः ॥ प्रदद्याद्देदविदुषेब्राह्मणायसुतेजसे ॥ १६ ॥ त ॥१७
स्योद्देशेनभोदेविऋणबन्धात्प्रमुच्यते ॥ पुत्रश्चजायतेदेविनात्रकार्याविचारणा॥१७॥ इतिश्रीक०
सं० पार्वतीहरसंवादे[illegible]ऽध्यायः ॥२२॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ शिवउवाच ॥ अथवक्ष्याम्यहंदेविचतुर्थंचरणंतथा ॥ मृगशिरोनामनक्षत्रंतस्यपूर्वंचसञ्चितम् ॥
॥ १ ॥ अवंतीपुरतोदेविदक्षिणेक्रोशपञ्चके ॥ पुरंतच्चैवविख्यातंकेशवंनामशोभनम् ॥ २ ॥
वसत्येकोहिदेवेशिब्राह्मणोवेदपारगः ॥ किशोरशर्माविख्यातोमृतगेहेप्रभुज्यते ॥ ३ ॥ कष्टेनै
वमहादेविव्ययंकुर्याद्दिनेदिने ॥ धनंचबहुधाकृत्वापुण्यकर्मनकारयेत् ॥ ४ ॥ ततोभ्रातुः कनिष्ठ
स्यभागंनैवददातिसः ॥ त्रिकोटिप्रमितंद्रव्यंस्वगृहेचैवसञ्चितम् ॥ ५ ॥ द्रव्यस्यैवविभागायम
रणंब्राह्मणोपरि ॥ कृतंभ्रात्राकनिष्ठेनद्रव्यंतस्मैनदत्तवान् ॥ ६ ॥ एवंबहुतिथेकालेकिशोरः
समृतस्तुवै ॥ गतोवैनरकेघोरेयुगान्येकोनविंशतिम् ॥ ७ ॥ पुनःकर्मवशाद्देविगर्दभत्वंचजायते ॥
वृकयोनिस्ततोजातोमानुषत्वंभवेत्पुनः ॥ ८ ॥ मध्यदेशेवरारोहेपुत्रोनैवप्रजायते ॥ कन्य
काबहवोगर्भाविनश्यंतिवरानने ॥ ९ ॥ पूर्वजन्मकृतंकर्मभुज्यतेदेविमानवैः ॥ इहलोकेवरा
रोहेपुण्यंपापंचपूर्वजम् ॥ १० ॥ भ्रातुस्तस्यकनिष्ठस्यमरणंजन्मजन्मनि ॥ तदुद्देशेनभोदेवि
तस्माद्रोगश्चजायते ॥ ११ ॥ तस्यपापस्यशुद्धिंचशृणुदेविप्रयत्नतः ॥ गायत्रीमूलमंत्रेणलक्ष
जाप्यंचकारयेत् ॥ १२ ॥ गृहवित्तषडंशंचपुण्यकार्यंचकारयेत् ॥ गायत्रीजातवेदेनत्र्यम्बके
नतथैवच ॥ १३ ॥ लक्षत्रयंजपंचैवदशवर्णाप्रदापयेत् ॥ हवनंविधिवत्कुर्यात्तर्पणंमार्जनंतथा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ १४ ॥ सौवर्णस्यवरारोहेसूर्यंकुर्यात्प्रयत्नतः ॥ पलपंचप्रमाणेनद्विगुणंचन्द्रमेवच ॥ १५ ॥

रौप्यस्यैवप्रकुर्यात्तुयथाशास्त्रंप्रपूजयेत् ॥ मन्त्रेणानेनभोदेविदद्याद्विप्रायतद्द्वयम् ॥ १६ ॥
॥ ॐह्रींमार्तंडभैरवायस्वाहा ॥ सूर्यदेवमहाभागत्रैलोक्यतिमिरापह ॥ ममपूर्वकृतंपापंक्षम्य
तांपरमेश्वर ॥ १७ ॥ ॐश्रींसोमायस्वाहा ॥ सौम्यरूपमहादेवमन्त्रराजद्विजोत्तम ॥ ममपूर्व
कृतंपापमोषधीशक्षमस्वमे ॥ १८ ॥ ततश्चब्राह्मणान्पूज्यभोजयित्वाविसर्जयेत् ॥ एवंकृतेन
सन्देहोविद्वान्पुत्रोभिजायते ॥ रोगाः सर्वेक्षयंयांतिनात्रकार्याविचारणा ॥ १९ ॥ इति
श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे मृगशिरोनक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामत्रयो
विंशोऽध्यायः ॥ २३ ॥

शिवउवाच ॥ अथातः संप्रवक्ष्यामिरौद्रर्क्षस्यचयत्फलम् ॥ येनकर्मविपाकेनमर्त्यलोकेचभु
ज्यते ॥ १ ॥ अवन्तीपुर्यंथोदेविरंगकारश्चतिष्ठति ॥ रंजयेद्द्विविधान्वस्त्रान्स्वधर्मंपालयेत्सदा
॥ २ ॥ कुबेरइतितन्नामलोलासेव्याचतस्यसा ॥ पतिव्रताप्रियादेविरंगकारश्चतांत्यजत् ॥ ३ ॥
ब्राह्मणीनगरस्थैकातयाप्रीतिंसमुद्वहन् ॥ त्यक्त्वापातिव्रतांभार्यांब्राह्मणींप्रतिसोभजत् ॥ ४ ॥
द्रव्यंबहुसंचितंतेनरंगकारेणवैशिव ॥ भूमिमध्येस्थितंद्रव्यंकृतंतेनैवसुन्दरि ॥ ५ ॥ किंचिद्दानंकृतं

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तेनगंगायमुनसंमितौ ॥ मरणंतस्यवैजातंतस्ययाताविवाहिता ॥ ६ ॥ तत्पुरेवसतीबालाली
लानामपतिव्रता ॥ सत्यलोकंगतः सोपिलक्षद्वयमितंप्रिये ॥ ७ ॥ पुनः पुण्यक्षयेजातेनरोभव
तिवैशिवे ॥ मध्यलोकेचविख्यातोधनधान्यसमन्वितः ॥ ८ ॥ पुत्राश्चबहवोजाताःकोपितेषां
नजीवति ॥ शरीरेआमयोत्पत्तिः खंजत्वंचरणेतथा ॥ ९ ॥ ब्राह्मणीगमनंदेविपूर्वजन्मनिवैकृत
म् ॥ तेनपापेनभोदेविवंशोह्यस्यनजीवति ॥१० ॥ अस्यशांतिंप्रवक्ष्यामि तच्छृणुष्ववरानने ॥
दशायुतंजपेद्देविगायत्रीं वेदमातरम् ॥ ११ ॥ हवनंतद्दशांशेनतर्पणंमार्जनंतथा ॥ षडंशंचैव
दानंवैदद्याद्वेदविदेशिवे ॥ १२ ॥ ब्राह्मणान्भोजयेत्पश्चान्नवर्तिपायसेनच ॥ गांचैवविधिवद्दद्या
त्ताम्रवर्णांसुभूषिताम् ॥१३॥ एवंकृतेनसंदेहोबहुपुत्रश्चजायते ॥ रोगस्यैवविमुक्तिःस्यान्नात्रकार्या
विचारणा ॥ १४ ॥ इतिश्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेरौद्रनक्षत्रस्यप्रथमचरणाविव
रणंनामचतुर्विंशोऽध्यायः ॥ २४ ॥

॥ श्रीशिवउवाच ॥ शृणुदेविवरारोहेनृणां वैपूर्वजन्मनि ॥ यत्कृतेनमहाघोरेनरकेपरिपच्यते ॥
॥ १ ॥ उज्जयिन्यांपश्चिमेद्वारेवैश्योवसतिभाग्यवान् ॥ धनधान्यसमायुक्तःस्वधर्मनिरतः स
दा ॥ २ ॥ एवमर्धवयोजातंदारिद्र्यत्वंततोभवत् ॥ व्यापारार्थंततोदेविविप्रस्वर्णंगृहीतवान् ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ ३ ॥ पलविंशप्रमाणेनव्ययंयातंवरानने ॥ ततोवैश्यस्यमृत्युर्वैभार्ययासहितस्यवै ॥ ४ ॥
स्वर्गंयातस्ततोदेविनर्मदामरणादपि ॥ षष्टिवर्षसहस्राणिस्वर्गस्यैवशुभंफलम् ॥ ५ ॥ भुक्तं
बहुविधंदेविभार्ययासहितेनवै ॥ ततः पुण्यक्षयेजातेपुनर्मर्त्यौबभूवतुः ॥ ६ ॥ धनधान्यसमा
युक्तौपुत्रकन्याविवर्जितौ ॥ रुग्णौदुर्बलगात्रौचपूर्वकर्मफलेनतौ ॥ ७ ॥ ऋणसम्बन्धतोदेविवि
प्रः पुत्रोभवत्तदा ॥ ऋणंयावत्प्रमाणंवैगृहीतंपूर्वजन्मनि ॥ ८ ॥ तावन्मात्रंगृहीत्वातुततोवैम
रणंभवेत् ॥ पुनःपुत्रोनतस्यैवविंशद्वर्षेगतेसति ॥ ९ ॥ तस्यदानंशृणुष्वादौपूर्वपापक्षयोयतः ॥
गृहवित्ताष्टमंभागंब्राह्मणायसमर्पयेत् ॥ १० ॥ स्वर्णपञ्चपलैनैवपुष्पंचकमलाकृति ॥ प्रद
द्याद्देवविदुषेपूर्वपापक्षयोभवेत् ॥ ११ ॥ पुनः पुत्रः प्रसूयेतनात्रकार्याविचारणा ॥ १२ ॥ इ
तिश्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे रौद्रनक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नामपं
चविंशोऽध्यायः ॥ २५ ॥ ॥ ॥

॥ श्रीशिवउवाच ॥ ॥ अवन्तीनगरीनाम्नाततः क्रोशद्वयोपरि ॥ १ ॥ आग्नेकोणेमहादेविमंगलं ॥१९॥
नामवैपुरम् ॥ तस्मिन्ग्रामेवसत्येकोब्राह्मणोद्यूततत्परः ॥ २ ॥ मद्यपानरतोनित्यंचौरविद्या
सुतत्परः ॥ परस्त्रीलंपटोदेविवेश्यायांनिरतः सदा ॥ ३ ॥ प्रत्यहंकुरुतेदेविद्विजरूपोनराधमः ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE
चौरत्वाद्द्रव्यमुत्पाद्यनैवदानंसमाचरत् ॥ ४ ॥ एवंबहुधनंजातंतस्यमृत्युर्बभूवह ॥ नरकेपा
तयामासयमदूतोयमाज्ञया ॥ ५ ॥ सप्ततिर्वैसहस्राणिरौरवेपरिपच्यते ॥ महाकष्टंलभेद्देवि
सूचीमुखकुम्भ्यादिभिः ॥ ६ ॥ पुनःकर्मवशाद्देविनरकान्निर्गतोयदा ॥ बिडालकाकयोर्निच
तदाप्राप्तोद्वयंहिच ॥ ७ ॥ योनिद्वयफलंभुक्तंमानुषत्वंततोलभत् ॥ मध्यदेशेवरारोहेततः पी
डामहत्यापि ॥ ८ ॥ वंशच्छेदोभवेद्देविपूर्वकर्मविपाकतः ॥ तस्योपरिविशालाक्षिशांतिंशृणु
वरानने ॥ ९ ॥ गायत्रीजातवेदाभ्यांत्र्यम्बकेनयथाविधि ॥ जपंवैकारयामासहवनंतर्पणंतथा
॥ १० ॥ लक्षत्रयंजपेद्देवि पूर्वपापविशुद्धये ॥ ततोवैपूजयेद्देवितुलसींविष्णुरूपिणीम् ॥
॥ ११ ॥ पूजयेद्विविधैश्चान्नैर्धूपनैवेद्यदीपकैः ॥ भूमिदानंततोदेवियथाशक्तिप्रदापयेत् ॥
॥ १२ ॥ एवंकृतेमहादेविसर्वरोगक्षयोभवेत् ॥ पुत्रश्चजायतेदेविवन्ध्यत्वंचप्रणश्यति ॥ १३ ॥
इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादे रौद्रनक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनं नाम
षड्विंशोऽध्यायः ॥ २६ ॥ ॥ ॥
॥ श्रीशिवउवाच ॥ अथातः संप्रवक्ष्यामिशृणुदेवियथापुरा ॥ नरेणयत्कृतंपूर्वंपूर्वजन्मनिकि
ल्बिषम् ॥ १ ॥ अवन्तीपुरतोवात्सीच्छूद्रएकोमहाधनः ॥ कृषिकर्मरतश्चैवक्रयविक्रयतत्प
CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

रः ॥ २ ॥ व्यापारेसर्ववस्तूनिछागमेषपशूनिच ॥ सततंभोक्ष्यतेदेविच्छागमांसंविशेषतः ॥
॥ ३ ॥ विक्रयः क्रियतेच्छागमेषयोर्गृहवासिनोः ॥ गजमश्वंतथारत्नंवस्त्राणिविविधानिच ॥ ४ ॥
एकदासूर्यग्रहणंदृष्टं तेनवरानने ॥ गोसहस्रंकृतंदानं भार्ययासहितेनवै ॥ ५ ॥ नर्मदायांविशा
लाक्षिस्वर्णवस्त्रयुतंतथा ॥ सुखंचवहुधाभुक्त्वामृत्युलोकसमुद्भवम् ॥ ६ ॥ स्वर्णकारस्यवैद्र
व्यंव्यवहारनिमित्तकम् ॥ गृहीतंचैवनोदत्तंततः शृणुवरानने ॥ ७ ॥ ततोबहुगतेकालेशूद्र
स्यमरणंह्यभूत् ॥ ततोसौनरकेघोरेवर्षलक्षद्वयंतथा ॥ ८ ॥ तत्रैवबहुधापीडांभुक्त्वाचैवस्वक
र्मतः ॥ पुनर्जातोमृत्युलोकेकाकश्चमहिषोबकः ॥ ९ ॥ मानुषत्वंततोदेविकुलेमहतिवैशुभे ॥
स्वर्णकारस्यद्रव्यं वैगृहीतंपूर्वजन्मनि ॥ १० ॥ नदत्तं वैऋणं देविपुत्रस्यमरणंततः ॥ युवरूपो
यदाजातोव्याधिग्रस्ततनुस्तदा ॥ ११ ॥ देहार्धवातरोगश्चपुत्रस्यमरणंततः ॥ भार्याद्वयसमा
युक्तएकाप्रीतिमतीभवेत् ॥ १२ ॥ पूर्वजन्मनियत्कर्मशुभाशुभशरीरतः ॥ मृत्युलोकेमनुष्ये
णभुज्यतेनात्रसंशयः ॥ १३ ॥ अथतेसंप्रवक्ष्यामिपापनिग्रहहेतवे ॥ गायत्रीलक्षजाप्येनहरिवं
शश्रवणेनच ॥ १४ ॥ रथाश्ववस्त्रदानेनग्रामदानेनवैतथा ॥ तिलधेनुप्रदानेनसर्वपापक्षयोभवे
त् ॥ १५ ॥ स्वर्णमुद्रासहस्रस्यप्रतिमांकारयेद्बुधः ॥ पूर्वोक्तेनविधानेनपूजयित्वाप्रदापयेत् ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ १६ ॥ पार्थिवंपूजयामासतथागोमयनिर्मितम् ॥ लक्षत्रयप्रमाणंचपंचगव्येनपूजयेत् ॥
॥ १७ ॥ पञ्चामृतेनवादेविगोदुग्धेनैवपूजयेत् ॥ तथाचविविधैर्मन्त्रैःषडङ्गैर्वेदसंभवैः ॥ १८ ॥
अर्द्धांगमुच्यतेरोगोनात्रकार्याविचारणा ॥ वन्ध्यत्वंप्रशमंयातिलभेत्पुत्रंनसंशयः ॥ १९ ॥ मृ
तवत्सालभेत्पुत्रंचिरजीविनमुत्तमम् ॥ २० ॥ इतिश्रीकर्मविपाकसंहितायां पार्वतीहरसंवा
दे रौद्रनक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामसप्तविंशोऽध्यायः ॥ २७ ॥
॥ श्रीशिवउवाच ॥ ॥ येनराःपरद्रव्यंचहरन्तिसततंप्रिये ॥ तेनरादुःखतांयांतिरोगेणैवप्रपीडि
ताः ॥ १ ॥ ऋणंयस्यगृहीतंवैतदृणंनददातिच ॥ ऋणसंबंधतोदेविपुत्रोभवतिदारुणः ॥ २ ॥
तस्यगात्रंचवैभग्नंधातुश्छिन्नंतथानरः ॥ कन्याजातातुपूर्वंहिफलंभवतितादृशम् ॥ ३ ॥ अवं
तीपुरतोदेविख्यातंचैवसुशोभनम् ॥ क्रोशमात्रंततोदेविचोत्तरेनगरंतथा ॥ ४ ॥ वसंतपुरमित्या
ख्यंवसन्तिबहवोजनाः ॥ नाम्नातन्मध्यआभीरोनन्दनोवसतिप्रिये ॥ ५ ॥ तस्यभार्यातुविख्या
तानाम्नावैसुन्दरीप्रिये ॥ सर्वथाचमहादेविकृपणःसहभार्यया ॥ ६ ॥ मित्रंतस्यमहादेविब्राह्मणो
वेदपारगः ॥ सतिष्ठतिपुरीमध्येधनंचबहुसंचितम् ॥ ७ ॥ प्रत्यहंचपरान्नेनभोजनंकुरुतेनरः ॥
यदासप्रौढतांयातस्तांपुरींचतदात्यजत् ॥ ८ ॥ आगतोमित्रपार्श्वेवैवसन्तेवैपुरेशुभे ॥ आभी

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

रोहिगृहेवासंमित्रत्वाद्दत्तवान्स्वयम् ॥ ९ ॥ बहुकालमवात्सीत्सततप्रीत्यासुरसुंदरि ॥ आभी
रेणततोदेविस्वर्णंदृष्ट्वाप्रधर्षितः ॥ १० ॥ तस्यस्वर्णंसमाहृत्यस्वगृहेस्थापितंतदा ॥ ब्राह्मणेन
महत्कष्टंकृतंद्रव्यस्यशोकतः ॥ ११ ॥ महाशोकसमायुक्तः काश्यांचैवसमागतः ॥ शरीरंच
ततस्त्यक्त्वास्वर्णशोकेनवैद्विजः ॥ १२ ॥ शूद्रेणैवमहादेवीतस्यस्वर्णंप्रभुज्यते ॥ ततोबहुग
तेकालेमरणंतस्यचाभवत् ॥ १३ ॥ नरकेपातयामासयमदूतैर्यमाज्ञया ॥ षष्टिवर्षसहस्राणिभु
क्त्वानरकयातनाम् ॥ १४ ॥ ततस्तेनतुप्रेतत्वंभुक्तंवर्षसहस्रकम् ॥ उलूकत्वंवरारोहेकौशि
क्यानिकटेततः ॥ १५ ॥ शरय्वाउत्तरेकूलेमानुषत्वंततोभवत् ॥ मध्यदेशेचभोदेविपत्न्या
सहवरानने ॥ १६ ॥ धनधान्यसमायुक्तोराजसेवासुतत्परः ॥ जातःपुनर्वसौदेविप्रथमेचरणेख
लु ॥ १७ ॥ पूर्वजन्मनिभोदेविदत्तवान्गोशतंयतः ॥ भूपतित्वंततोदेविधनाढ्यत्वंभवेत्ख
लु ॥ १८ ॥ ब्राह्मणस्यहृतंस्वर्णंस्वयंचौरेणयत्पुरा ॥ तेनपापेनभोदेविपुत्रस्यमरणंखलु ॥ १९ ॥
तस्यशांतिंप्रवक्ष्यामितत्सर्वंशृणुपार्वति ॥ गृहवित्ताष्टमंभागंपुण्यकार्यंचकारयेत् ॥ २० ॥ गा
यत्रीजातवेदाभ्यांयाःफलीतितथाप्रिये ॥ लक्षत्रयंजपंकुर्याद्दशांशहवनंततः ॥ २१ ॥ तर्पणंमा
र्जनंचैवदशांशक्रमतस्तथा ॥ हरिवंशस्यश्रवणंचण्डिकार्चनमेवच ॥ २२ ॥ शिवार्पणंविशेषे

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

णवापिकांचैवकारयेत् ॥ कूपंचैवतडागंचपथिमध्येचकारयेत् ॥ २३ ॥ कूष्माण्डंनारिकेरंचपं
चरत्नसमान्वितम् ॥ गङ्गामध्येप्रदातव्यंशनौचाश्वत्थपूजनम् ॥ २४ ॥ पलसप्तदशेनैवप्रतिमांका
रयेद्बुधः ॥ चतुष्कोणांततोवेदिंरौप्यदशपलान्विताम् ॥ २५ ॥ तन्मध्येप्रतिमांस्थाप्यसपुत्रस्य
द्विजस्यतु ॥ पूजयामासवैभक्त्यामंत्रेणानेनवैशिवे ॥ २६॥ॐनमोभगवतेवासुदेवाय॥ॐब्रह्मणेन
मः ॐअनन्तायनमः॥ ॐपुरुषायनमः ॥ ॐपुरुषोत्तमायनमः ॥ ॐशार्ङ्गिणेनमः ॥ ॐपी
ताम्बरायनमः ॥ ॐचक्रपाणयेनमः ॥ ॐअच्युतायनमः ॥ वासुदेवादिदशभिर्मंत्रैरेभिः पृथक्
पृथक् ॥पूजयेत्प्रतिमांतांतुततोदद्याद्विजन्मने ॥ २७ ॥ पूजयेद्देवदेवेशंसर्वपापापनुत्तये ॥ त
तः संप्रार्थ्य देवेशंशंखचक्रगदाधरम् ॥ २८॥ पीतांबरंचतुर्बाहुंपुण्डरीकानिभेक्षणम् ॥ वासुदेवं
जगन्नाथंधराधरगुरोहरे ॥ २९ ॥ ममपूर्वकृतंपापंक्षम्यतांपरमेश्वर ॥ ततोगांकपिलांदद्यात्स्वर्णशृं
गींसनूपुराम् ॥ ३० ॥ विधिवद्वेदविदुषेब्राह्मणायतपस्विने ॥ दशवर्णांततोदद्याद्ब्राह्मणान्भोजयेत्त
तः ॥३१॥भूमिदानंततोदद्याद्विप्रायविदुषेततः ॥ एवंकृतेनसंदेहःपूर्वपापंविनश्यति ॥ ३२ ॥ स
न्तानोजायतेदेविरोगाणांसंक्षयस्ततः॥कन्यकानैवजायंतेवंध्यत्वंचप्रणश्यति ॥ ३३॥ इतिश्रीक०
सं० पार्वतीहरसंवादेपुनर्वसुनक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामअष्टाविंशोऽध्यायः ॥ २८ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ शिवउवाच ॥ अथातःसंप्रवक्ष्यामियत्कृतंपूर्वजन्मनि ॥ अवन्तीपुरतोदेविपूर्वेक्रोशप्रमा
णके ॥ १ ॥ लक्ष्मणस्यपुरंख्याततत्रैवबहवोजनाः ॥ वसन्तिवैष्णवाःसर्वे वेदकर्मविचक्षणाः ॥
॥ २ ॥ स्वर्णकारोवसत्येकः स्वकर्मनिरतः सदा ॥ दामोदरइतिख्यातस्तस्यपत्नीप्रभावती ॥
॥ ३ ॥ विष्णुभक्तिरतःशान्तःसज्जनानांचसेवकः ॥ पत्नीपतिव्रतातस्यपतिशुश्रूषणेरता ॥ ४ ॥
तस्यपुत्रद्वयंजातंगुणज्ञंपितृसेवकम् ॥ एकाचबल्लवीतत्रनिवासायतदागता ॥ ५ ॥ पुत्रद्वयसमा
युक्ताबहुगोधनसंयुता ॥ एकोद्यूतरतः पुत्रोद्वितीयश्चोरसंमतः ॥ ६ ॥ उपार्जितंमहिषीवृन्दंगो
धनंबहुधातथा ॥ चौर्यद्यूतोपचाराभ्यांमहार्घत्वमजायत ॥ ७ ॥ दुग्धादिकंमहादेविभुज्यतेप्र
त्यहंसदा ॥ स्वर्णकारोविनाद्रव्यमाभीरींसर्वसंयुताम् ॥ ८ ॥ आनीतवांस्तुस्वगृहंतदाचवरव
र्णिनीम् ॥ ततोबहुगतेकालेमहामारीज्वरादिना ॥ ९ ॥ पुत्राभ्यांसममद्राक्षीन्मरणंबल्लवीतदा ॥
द्रव्यंतस्यास्तदादेविस्वर्णकारोगृहीतवान् ॥ १० ॥ भुक्तंद्रव्यंचतत्सर्वंयावत्तिष्ठतिभूतले ॥
भार्ययासहपुत्राभ्यांमहिषीगोधनादिकम् ॥ ११ ॥ ततोवयोन्तरेदेविमृत्युस्तस्याभवत्किल ॥
पत्नीपश्चान्मृतासाध्वीताभ्यांस्वर्गमभूत्पुरा ॥ १२ ॥ पंचवर्षसहस्राणिस्वर्गेसुखमजीजनत् ॥
पुनःपुण्यक्षयेजातेमानुषत्वंभवेद्भुवि ॥ १३ ॥ अयोध्यानगरेदेविसरय्वाउत्तरेतटे ॥ क्रोशद्वये

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

विशालाक्षिपुरेदेहलसंज्ञके ॥ १४ ॥ स्वकर्मनिरतःप्राज्ञःस्वविद्यायांविचक्षणः ॥ स्वदेशेचैववि
ख्यातःशत्रूणांचविमर्दनः ॥ १५ ॥ पुनर्विवाहितापत्नीसाध्वीयापूर्वजन्मनि ॥ तस्यनेत्रेविशा
लाक्षिपूर्वजन्मफलाद्धृते ॥ १६ ॥ बाल्येचैवतुपुत्रस्यनेत्रंवामंप्रणाशितम् ॥ तेनपापेनभोदेविद
क्षनेत्रेणदृश्यते ॥ १७ ॥ आभीर्यागमनंपूर्वंतस्याःस्वर्णंहृतंपुरा ॥ तेनपापेनभोदेविदद्रुपामासु
तक्षयम् ॥ १८ ॥ भक्षितंतस्यतत्स्वर्णनदत्तंब्राह्मणायवै ॥ तेनपापेनभोदेविमृतंपुत्रवरंशुभम्
॥ १९ ॥ मित्रसंबंधतोयातंपुत्रंपौत्रंतथाद्वयम् ॥ पूर्वजन्मकृतंदेविशुभाशुभफलंतथा ॥ २० ॥
भुज्यतेप्राणिभिःसर्वैस्तथादेविविशेषतः ॥ म्लेच्छसेवारतोनित्यंम्लेच्छस्यैवचसंगतः ॥ २१ ॥
कुमार्गतोभवेद्देविमृत्युलोकेऽभवद्यदा ॥ शांतिंशृणुमहादेविपूर्वंपापप्रणाशनीम् ॥ २२ ॥ गृह
वित्ताष्टमंभागंपुण्यकार्यंचकारसः ॥ गायत्रीजातवेदाभ्यांयाःफलीत्र्यम्बकेणवा ॥ २३ ॥ विष्णो
रराटमंत्रेणजपंवैकारयेत्तथा ॥ पंचलक्षप्रमाणेनयथापापंप्रणश्यति ॥ २४ ॥ होमंवैकारयेद्देविद
शांशंविधिपूर्वकम् ॥ ततोवैतर्पणंकुर्यान्मार्जनंतुविशेषतः ॥ २५ ॥ प्रतिमांकारयेत्तद्वद्विष्णो
श्चैवशिवस्यच ॥ अष्टादशपलस्यैवसुवर्णस्यहरिंविभुम् ॥ २६ ॥ तद्वद्देवशिवस्यैवरजतस्यपरं
विभुम् ॥ प्रतिमांपूजयेद्देविमंत्रेणानेनसुव्रते ॥ २७ ॥ ॐगरुडध्वजदेवेशचराचरगुरोहरे ॥ वा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥२३॥ सुदेवजगन्नाथपूर्वपापंव्यपोहतु ॥ २८ ॥ ॐनन्दिकेश्वरभूतेशदेवदेवसुरेश्वर ॥ ममपूजांगृहाणत्वं पूर्वपापंप्रणाशय ॥ २९ ॥ ततइन्द्रादिकांश्चाष्टौदिक्पालान्पूजयेत्खलु ॥ ॐइन्द्रायनमः ॥ ॐअग्नयेनमः ॥ ॐयमायनमः ॥ ॐनिर्ऋतयेनमः ॥ ॐवरुणायनमः ॥ ॐवायवेनमः ॥ ॐकुबेरायनमः ॥ ॐईशानायनमः ॥ ॐब्रह्मणेनमः ॥ ॐअनन्तायनमः ॥ गंधपुष्पाक्षतैः सर्वान्पूजयेच्चपृथक्पृथक् ॥ ततोगांकपिलांदेविस्वर्णशृंगींप्रपूजयेत् ॥ ३० ॥ मन्त्रेणानेनभोदेविसर्वपापहरांशुभाम् ॥ ॐनमोभगवतीकामेश्वरीममपापंव्यपोहतुस्वाहा ॥ पुराममकृतंपापंकामधेनोसुरेश्वरि ॥ कपिलेत्वंजगन्मातर्ममकार्यंप्रसाधय ॥ ३१ ॥ ततश्चदद्याद्गांदेविब्राह्मणायाशिवात्मने ॥ दशवर्णांततोदद्यात्पात्राणिविविधानिच ॥ ३२ ॥ वृषभंचततोदेविनीलकर्णंसुसंस्कृतम् ॥ ब्राह्मणायप्रदद्यात्तुसर्वपापस्यसंक्षये ॥ ३३ ॥ भोजयेद्विविधैरन्नैःपायसैश्चसमोदकैः ॥ ब्राह्मणंशतसंख्याकंरुद्रविष्णुस्वरूपिणम् ॥ ३४ ॥ प्रतिमांदापयेत्पश्चाद्ब्राह्मणायवरायच ॥ बन्धुभिःसहभुंजीतततोविप्रविसर्जनम् ॥ ३५ ॥ यथाशक्त्याप्रदद्याद्वैब्राह्मणेभ्यश्चदक्षिणाम् ॥ हरिवंशस्यश्रवणंपार्थिवस्यचपूजनम् ॥ ३६ ॥ भूमिदानंविशेषेणब्राह्मणायचदापयेत् ॥ एवंकृतेवरारोहेपूर्वजन्मसमुद्भवम् ॥ ३७ ॥ पापंप्रशमयेच्छीघ्रंममवाक्यंचनान्यथा ॥ रोगादिविविधोत्पन्नंतत्सर्वंविलयं ॥२३॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE
व्रजेत् ॥ ३८ ॥ वंशवृद्धिर्भवेद्देविनात्रकार्याविचारणा ॥ ३९ ॥ इतिश्रीकर्मविपाकसंहितायांपार्व
तीहरसंवादे पुनर्वसुनक्षत्रस्याद्वितीयचरणप्रायश्चित्तकथनंनामैकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥
॥ श्रीशिवउवाच ॥ ॥ पुर्यामवंतिकायांवैनापितोवसतिप्रिये ॥ स्वकर्मणःपरिभ्रष्टःकृषिकर्मरतः
सदा ॥ १ ॥ पत्नीतस्यमहादेविपरपुंसिरतासदा ॥ कर्कशानामविख्यातादर्दुरानामनामतः
॥ २ ॥ एकस्मिन्दिवसेदेविवैश्योधनसमन्वितः ॥ स्वर्णकोटिंचसंगृह्यनिकटेतस्यचागतः ॥ ३ ॥
नापितेनततोदेविवैश्योधनसमन्वितः ॥ अर्द्धरात्रेगतेकालेततःखड्गेनवैहतः ॥ ४ ॥ द्रव्यंसर्वंगृही
त्वातुतांपुरींचततस्त्यजन् ॥ सर्वस्वर्णव्ययंकृत्वानदानंचकृतंक्वचित् ॥ ५ ॥ एकदासमयेदेवि
नापितेनसहस्त्रिया ॥ प्रयागेमकरेमासिमासमेकंनिरंतरम् ॥ ६ ॥ प्रत्यहंक्रियतेस्नानंभार्ययास
हितेनवै ॥ गोदानंचकृतंतेनवृषभंस्वर्णभूषितम् ॥ ७ ॥ ततोवैमरणंतस्यनापितस्यसुरेश्वरि ॥
निर्जलेतस्यवैदेशेचोपलेपाथिमध्यगे ॥ ८ ॥ यमदूतैर्महादेविनरकेनामकर्दमे ॥ क्षिप्तोयमाज्ञया
वर्षसहस्त्रंषष्टिसंमितम् ॥ ९ ॥ नरकान्निर्गतोदेविव्याघ्रयोनिस्ततोभवत् ॥ पुनर्महिषयोनिंचमा
नुषत्वंततोगतः ॥ १० ॥ ऋक्षेपुनर्वसौदेवितृतीयचरणेवरे ॥ प्रातःस्नानफलंदेविनृपवंशेसमुद्भ
वः ॥ ११ ॥ मध्यदेशेवरारोहेशरय्वाउत्तरेतटे ॥ महाधनेनसंयुक्तश्चौराणांकर्मकारकः ॥ १२ ॥
CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

पत्नीतस्याभवद्वन्ध्यामृतवत्सासुतायुता ॥ कफरोगसमायुक्तोज्वरेणैवप्रपीडितः ॥ १३ ॥ मि
त्रस्यैववधूःपूर्वंनापितेनयतःकृता ॥ तेनकर्मफलेनैवमहारोगसमुद्भवः ॥ १४ ॥ पुत्रोपिजायते
देवितस्यमृत्युरभूत्किल ॥ शांतिंतस्यप्रवक्ष्यामिशृणुदेविसमासतः ॥ १५ ॥ गायत्रीमूलमंत्रेण
पंचलक्षजपंयदा ॥ तदापापंक्षयंयातिपूर्वजन्मनियत्कृतम् ॥ १६ ॥ हरिवंशस्यश्रवणंचण्डीपा
ठंशिवार्चनम् ॥ विधिवद्देविकर्तव्यंपापंसर्वंविनश्यति ॥ १७ ॥ चतुरस्रेततःकुण्डेहोमंचैवतुकार
येत् ॥ तिलधान्यादिभिर्देविदशांशजपसंख्यया ॥१८॥ वैश्यस्यप्रतिमांदेविकारयेद्वैसुवर्णतः ॥
पंचविंशपलेनैवरचितांचप्रयत्नतः ॥ १९ ॥ ताम्रपात्रेशुभेस्थाप्यपूजयेत्प्रतिमांततः ॥ मंत्रे
णानेनभोदेविगंधपुष्पाक्षतादिभिः ॥ २० ॥ ॐनमस्तेदेवदेवेशशंखचक्रगदाधर ॥ अज्ञानाद्वाप्र
मादाद्वामयापापंकृतंपुरा ॥ २१ ॥ तत्सर्वंक्षम्यतांदेवशरणागतवत्सल ॥ ॐचक्रधरायनमः ॥
ॐगोविंदायनमः ॥ ॐदामोदरायनमः ॥ ॐकृष्णायनमः ॥ ॐहंसायनमः ॥ ॐपरमहंसायन
मः ॥ ॐअच्युतायनमः ॥ ॐहृषीकेशायनमः ॥ चक्रधरादिभिर्नाम्नासर्वदिक्षुप्रपूजयेत् ॥
प्रतिमांपूजयित्वातुतांविप्रायप्रदापयेत् ॥ २२ ॥ ततोगांकृष्णवर्णांतुब्राह्मणायप्रदापयेत् ॥ पं
चसंख्यामितांदेविप्रदद्याद्वैकुलायच ॥ २३ ॥ ब्राह्मणान्भोजयेद्देवियथासंख्यंवरानने ॥ एवंकृते

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

वरारोहेशीघ्रंपुत्रःप्रजायते ॥ वन्ध्यात्वंनाशयत्याशुसर्वरोगोविनश्यति ॥ २४ ॥ इति श्रीकर्म
विपाकेपार्वतीहरसंवादेपुनर्वसुनक्षत्रतृतीयचरणप्रायश्चित्तकथनंनामत्रिंशोऽध्यायः ॥ ३० ॥
॥ शिवउवाच ॥ ॥ अवंत्याःपार्श्वेमेदेविक्रोशमात्रोपरिप्रिये ॥ कैवर्तकोवसत्येकोनन्दनेचपुरेशु
भे ॥ १ ॥ मनोहरइतिख्यातोधनाढ्योजायतेमहान् ॥ मत्तातस्याभवत्पत्नीपतिशुश्रूषणेरता ॥
॥ २ ॥ मत्स्यमांसस्यभोदेविविक्रयंचाकरोत्खलु ॥ संचितंबहुरत्नंचनदानंबहुधाकरोत् ॥ ३ ॥
एकदाचंद्रग्रहणेशतस्वर्णयुतंवृषम् ॥ अदाद्विप्रायविदुषेभार्ययासहभक्तितः ॥ ४ ॥ ततोमृत्यु
वशंयातोभार्यातस्यमृतापुरा ॥ यमदूतैर्महाघोरैर्नरकेपातितःपुरा ॥ ५ ॥ यमाज्ञयामहादेविष
ष्टिवर्षसहस्रकम् ॥ नरकान्निःसृतोदेविसृगालोगहनेवने ॥ ६ ॥ पुनःकाकोवरारोहेततोभवति
मानुषः ॥ गुणज्ञोदेवताभक्तोवेश्यासुरततत्परः ॥ ७ ॥ रागीसूक्ष्मतनुर्वक्ताज्ञानवान्सुतवर्जि
तः ॥ तस्यभार्याभवत्स्थूलाप्रियवाक्चसदाज्वरी ॥ ८ ॥ पूर्वजन्मप्रसङ्गाच्चमत्स्यमांसोपभोगि
नी ॥ मासिपुष्पंभवेद्देविगर्भस्यपतनंतथा ॥ ९ ॥ अस्यशांतिंप्रवक्ष्यामिशृणुदेविसुशोभने ॥
यत्कृतेनवरारोहेशीघ्रंपुत्रमवाप्नुयात् ॥ १० ॥ हरिवंशस्यश्रवणंवारत्रयंविधानतः ॥ गायत्री
मूलमंत्रेणपंचलक्षजपंतथा ॥ ११ ॥ दशांशंहवनंदेविदशांशंचैवतर्पणम् ॥ मार्जनंचविशेषेणदशां

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

शंचैवकारयेत् ॥ १२ ॥ ततोगांकपिलांदद्याद्दशवर्णांततःप्रिये ॥ सूर्यस्यप्रतिमां देविस्वर्णंद
शपलस्यच ॥ १३ ॥ भूषितांविविधैर्वस्त्रैःस्वर्णरौप्यविभूषणैः ॥ पूजयित्वाविधानेनमंत्रेणानेन
पार्वति ॥ १४ ॥ ॐत्वंज्योतिःसर्वलोकानांपूज्यस्त्वंसर्वदेहिनाम् ॥ पूर्वजन्मकृतंपापंहरमेति
मिरापह ॥ १५ ॥ ॐश्रीसूर्यायनमः ॥ ॐसवित्रेनमः ॥ ॐसाक्षिणेनमः ॥ ॐत्रिगुणात्मधारिणे
नमः ॥ ॐद्वादशकलात्मनेनमः ॥ ॐकेयूरधारिणेनमः ॥ ॐतीक्ष्णांशुधारिणेनमः ॥ ॐक
लाकाष्ठादिरूपिणेनमः ॥ ॐविष्णवेनमः ॥ ॐब्रह्मणेनमः ॥ ॐरुद्रायनमः ॥ ॐमार्त्तण्डाय
नमः ॥ मंत्रैर्द्वादशभिर्देविपूजयेत्प्रतिमांततः ॥ धूपदीपादिभिर्देवितांबूलैश्चनिवेदनैः ॥ १६ ॥
पूजितांप्रतिमांदद्याद्ब्राह्मणायवरायच ॥ दासींदासंधनंधान्यंब्राह्मणायप्रदापयेत् ॥ १७ ॥ अश्व
दानंरथंवस्त्रंपात्राणिविविधानिच ॥ शय्यादिकंवरारोहेवित्तशाठ्यंनकारयेत् ॥ १८ ॥ एवंकृते
नसंदेहाश्चिरंजीविसुतंलभेत् ॥ पूर्वजन्मकृतंपापंक्षयंयातिनचान्यथा ॥ १९ ॥ सप्तमीरविसंयुक्ता
व्रतंकुर्यात्सुरेश्वरि ॥ पापव्याधिः क्षयंयातिज्वरःक्वापिनजायते ॥ २० ॥ इति श्रीकर्मविपाके
पार्वतीहरसंवादे पुनर्वसुनक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥
श्रीशिवउवाच ॥ ॥ पापेनजायतेव्याधिःपापेनैवासुतोभवेत् ॥ पापेनजायतेमूर्खःपापेनैवदरिद्र

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

ता ॥ १ ॥ पूर्वजन्मकृतंयत्तुपापंवापुण्यमेववा ॥ इहजन्मनिभोदेविभुज्यतेसर्वदेहिभिः ॥ २ ॥
पुण्येनजायतेविद्यापुण्येनजायतेसुतः ॥ पुण्येनसुंदरीनारीपुण्येनलभतेश्रियम् ॥ ३ ॥ अथातः
संप्रवक्ष्यामिपुष्यनक्षत्रजंफलम् ॥ तत्सर्वंशृणुमेदेवियत्कृतंपूर्वजन्मनि ॥ ४ ॥ मध्यदेशेवरारो
हेधनाढ्योवल्लवोवसत् ॥ हंसकेतुरितिख्यातोभार्यातस्यतुकेकयी ॥ ५ ॥ बहवोवृषभास्तस्य
महिष्योगास्तथाप्रिये ॥ धर्मकर्मरतश्शूद्रोविक्रयोगोवृषादिकम् ॥ ६ ॥ घृततक्रेवरारोहेविक्रयं
कुरुतेसदा ॥ एको वैश्योधनाढ्योवैतस्यामित्रंतदाभवत् ॥ ७ ॥ महाप्रीतिस्तयोर्जाताबहुवर्षप्र
माणतः ॥ एकदातुनिशायां वैशूद्रेणवणिजः प्रिये ॥ ८ ॥ सुवर्णरत्नादिलोभेनकुठारेणतदाहतः ॥
द्रव्यंसर्वंगृहीतंतुभूमिमध्येतथाधृतम् ॥ ९ ॥ तन्मध्येतुषडंशस्यव्ययंकुर्यादिनेदिने ॥ बहुवर्षग
तेकालेशूद्रोमृत्युवशोभवत् ॥ १० ॥ पातयामासघोरेतंयमदूतोयमाज्ञया ॥ षष्टिवर्षसहस्रा
णिभुक्त्वानरकयातनाम् ॥ ११ ॥ ततोजातोमहादेविराक्षसोगहनेवने ॥ पुनःशृगालयोनिंचमानु
षोह्यभवत्पुनः ॥ १२ ॥ धनधान्यसमायुक्तोभार्याजातातुयापुरा ॥ वंध्यारोगसमायुक्ताकन्यका
चैवजायते ॥ १३ ॥ तस्यरोगोभवत्पश्चाद्द्विविधश्चवयोंतरे ॥ पूर्वजन्मनिभोदेविमित्रंचनिहतंयतः ॥
॥ १४ ॥ तत्पापेनचभोदेविपुत्रोनैवोपजायते ॥ महिषीपुत्रघाताच्चकंपरोगीप्रजायते ॥ १५ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तस्यशांतिंप्रवक्ष्यामिशृणुदेविसुशोभने ॥ षडंशंवैततोदानंविदुषेब्राह्मणायच ॥ १६ ॥ गांत
थामहिषींदद्याद्विधिवद्भोजयेद्विजान् ॥ गायत्रीजातवेदाभ्यांद्विलक्षंचजपंततः ॥ १७ ॥ कुण्डे
त्रिकोणकेचैवहोमंवैकारयेत्ततः ॥ जपस्यैवदशांशेनहवनादिकमाचरेत् ॥ १८ ॥ ततोवैप्रतिमां
कुर्याद्वैद्वयस्यैवविधानतः ॥ द्वादशेनपलेनैवसुवर्णस्याविशेषतः ॥ १९ ॥ पूजयेत्पूर्वजैर्मंत्रैस्त
तोविप्रायदापयेत् ॥ एवंकृतेनसंदेहःपुत्रोभवतिनान्यथा ॥ २० ॥ सर्वेरोगाःक्षयंयांतिनात्रका
र्याविचारणा ॥ २१ ॥ इति श्रीक० पार्व० पुष्यनक्षत्रस्य० प्रा० द्वात्रिंशोऽध्यायः ॥ ३२ ॥
श्रीशिवउवाच ॥ ॥ अथातःसंप्रवक्ष्यामिशृणुदेविविशेषतः ॥ आदौपापफलंदेविभुज्यतेदेवमानु
षैः ॥ १ ॥ पश्चात्पुण्यफलंदेविपरलोकइहापिवा ॥ एकःशिल्पकरोदेविवसतेहस्तिनापुरे ॥
॥ २ ॥ हेमदासइतिख्यातोभार्याद्वयसमन्वितः ॥ प्रत्यहंशिल्पकार्यंचकरोतिव्ययकारणात् ॥
॥ ३ ॥ काशीतःपश्चिमेदेविस्वकर्मनिरतःसदा ॥ अश्वत्थानांचवृक्षाणांछेदनानिचकारसः ॥
॥ ४ ॥ एवंबहुगतेकालेशिल्पकारोमृतःप्रिये ॥ नरकेतस्यपतनंषष्टिवर्षसहस्रकम् ॥ ५ ॥ प
त्नीभ्यांसहभोदेवियातोयोनिंबिडालकीम् ॥ बिडालयोनिंवैभुक्त्वासरठस्तुततोऽभवत् ॥ ६ ॥
पुनश्चाभून्नरोदेविमध्यदेशेसुपूजिते ॥ पूर्वजन्मनिवृक्षाणांछेदनंप्रत्यहंकृतम् ॥ ७ ॥ तेनपापेनभो

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE
देविपुत्रोनैवप्रजायते ॥ कन्यकाश्चैवसंजाताः स्त्रियोरोगःसुदारुणः ॥ ८ ॥ शरीरेमहतीपीडारा
त्रौनिद्रानलभ्यते ॥ कन्यकायाश्चवैधव्यंवृक्षच्छेदनतःप्रिये ॥ ९ ॥ तस्यशांतिंप्रवक्ष्यामि
ततः पापनिवर्तनम् ॥ चतुर्थांशंतुवैदानंब्राह्मणायप्रदापयेत् ॥ १० ॥ दशायुतंजपंकुर्याद्गायत्री
मूलमंत्रतः ॥ पंचपलसुवर्णस्यवृक्षंवैकारयेत्ततः ॥ ११ ॥ पूजयित्वायथान्यायंवृक्षंविप्रायदाप
येत् ॥ पंचधेनूस्तथादद्याद्वृषभंस्वर्णभूषितम् ॥ १२ ॥ कूष्मांडंनारिकेरंचपंचरत्नसमन्वित
म् ॥ गंगामध्येतुदातव्यंश्वेतवस्त्रेणवेष्टितम् ॥ १३ ॥ एवंकृतेनसंदेहः पुत्रोवैजायतेशिवे ॥ सर्वं
व्याधिःक्षयंयातिकन्यकाचसुखायती ॥ १४ ॥ इति श्रीकर्मविपाके पार्वतीहरसंवादेपुष्यनक्षत्रस्य
द्वितीयचरणप्रायाश्चित्तकथनंनामत्रयास्त्रिंशोऽध्यायः ॥ ३३ ॥
श्रीशिवउवाच ॥ ॥ मध्यदेशेवरारोहेलोहकारश्चतस्थिवान् ॥ हेमकारेतिविख्यातोविष्णुव्रतर
तः सदा ॥ १ ॥ पत्नीतस्यप्रभानामपतिशुश्रूषणेरता ॥ धनधान्यसमायुक्तोमहालोभेनसंयुतः ॥
॥ २ ॥ पुरेविख्यातयवनस्तत्रानित्यंसतिष्ठति ॥ गौरेकालोहकारेणबाल्यतः पालिताशिवे ॥
॥ ३ ॥ एकस्मिन्दिवसेदेविपंकेमग्नाचगौर्वरा ॥ तच्छ्रुत्वालोहकारस्तुनगतस्तत्रवैशि
वे ॥ ४ ॥ मृतारात्रौतदादेविपंकेवैतरणीचसा ॥ बहुकालेनभोदेविमरणंतस्यवैगृहे ॥ ५ ॥
CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तस्यपत्नीसतीजातासत्यलोकंगतौचतौ ॥ दशलक्षमितंवर्षंसत्यलोकेचतस्थिवान् ॥ ६ ॥ पुनः पुण्यक्षयेजातेमर्त्यलोकेतदाभवत् ॥ मानुषःशुभजन्माचधनधान्यसमन्वितः ॥ ७ ॥ पत्न्यास हवरारोहेब्राह्मणानांचसेवकः ॥ पूर्वजन्मनिदेवेशिपंकेमग्नाचयत्रगौः ॥ ८ ॥ नगतस्तत्रभोदेवि तस्मात्पुत्रोनजायते ॥ कन्याजातापुरादेवितस्यामृत्युश्चजायते ॥ ९ ॥ तदर्थंवाटिकांकूपंपथि मध्येचकारयेत् ॥ कुर्याच्चैवतुलादानंपात्राणिविविधानिच ॥ १० ॥ गोयुग्मंघृतकुम्भंचब्राह्म णायप्रदापयेत् ॥ गायत्रीमंत्रजाप्यंचलक्षमेकंतुकारयेत् ॥ ११ ॥ होमंकुर्यात्ततोदेवितिलधा न्यादितंडुलैः ॥ ब्राह्मणान्भोजयेद्देविशतसंख्यान्वरानने ॥ १२ ॥ एवंकृत्वावरारोहेपुत्रोभवति नान्यथा ॥ वन्ध्यत्वंनाशमायातिव्याधिनाशोभवेद्ध्रुवम् ॥ १३ ॥ इति श्रीकर्मविपाके पार्वती हरसंवादेपुष्यनक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

॥ श्रीशिवउवाच ॥ ॥ अयोध्यानगराद्देविपूर्वेक्रोशचतुर्दशे ॥ तत्राप्येकोवसच्छाककारोवैडंबरा भिधः ॥ १ ॥ चित्रातस्याभवत्पत्नीपतिसेवापरायणा ॥ शाककारोमहासाधुर्विष्णुभक्तिरतःस दा ॥ २ ॥ गुरुसेवारतोनित्यंप्रत्यहंशाकविक्रयी ॥ एकामार्जारिकाश्वेतापालितातेनवैशिवे ॥ ॥ ३ ॥ सगर्भातत्रसाजातावधंतस्याःसचाकरोत् ॥ चत्वारोबालकास्तस्यामृताःकुक्षौतदान

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

घे ॥ ४ ॥ ततोबहुतिथेकालेशूद्रस्यमरणंशिवे ॥ यातोवैतमसातीरेतीर्थेमृत्युर्ममप्रिये ॥ ५ ॥
विष्णुभक्तिरतोयस्मात्तीर्थेमृत्युफलादपि ॥ गतोसौपरलोकंतुभुक्त्वास्वर्गेतुवैभवम् ॥ ६ ॥ ष
ष्टिवर्षसहस्राणिपुनःपुण्यक्षयोयदा ॥ तदावृषभयोनिश्चमर्त्यलोकेभवत्पुनः ॥ ७ ॥ मानुषत्वं
ततोयातोधनधान्यसमन्वितः ॥ सुंदरोविष्णुभक्तित्वात्पुत्रेणरहितःशिवे ॥८॥ गर्भाणांपतनंजातं
यतोमार्जारिकाहता ॥ सगर्भाचतदादेवितत्तोगर्भोविनश्यति ॥९॥ तस्यशांतिंप्रवक्ष्यामिशृणुत्वं
गिरिजेवरे ॥ गृहवित्तार्धभागंवैब्राह्मणायप्रदापयेत् ॥१०॥ तदापापंक्षयंयातिनात्रकार्याविचारणा॥
शिवार्चनंप्रकुर्याद्वैरौप्यमार्जारिकांतथा ॥ ११ ॥ शतपलानांकृत्वावैसगर्भांविमलांशुभाम् ॥ पूज
यित्वाचभोदेविततोदद्याद्द्विजन्मने ॥१२॥ लक्षजाप्यंततोदेवित्र्यम्बकेणविशेषतः ॥ ततोभवतिवै
शुद्धःपूर्वपापान्नसंशयः ॥१३॥ पुत्रोभवतिवैदेविरोगाणांसंक्षयस्तथा ॥१४॥ इति श्रीकर्मविपाके
पार्वतीहरसंवादेपुष्यनक्षत्रस्यचतुर्थचरणेप्रायश्चित्तकथनंनामपंचत्रिंशोऽध्यायः ॥ ३५ ॥
श्रीशिवउवाच ॥ ॥ अथातःसंप्रवक्ष्यामिशृणुदेविशुशोभने ॥ जातस्यसार्पनक्षत्रेप्रथमेचरणेशु
भे ॥१॥ पुरीकाशीसमाख्यातात्रैलोक्येदेविपूजिता ॥ तस्यास्तुपश्चिमेभागेक्रोशेपंचदशेमिते ॥२॥
माण्डव्यस्यपुरंशुभ्रंवसंतिबहवोजनाः ॥ तन्मध्येशूद्रएकोहिप्राकरोल्लवणंसदा ॥ ३ ॥ डिण्डि

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

भेतिसमाख्यातोगौरीतस्यवराङ्गना ॥ बहुधनंसंचितंतेननदानंक्रियतेक्वचित् ॥ ४ ॥ एकदादे
वयोगेनब्राह्मणानांनिमंत्रणम् ॥ भोजनंप्रददौप्रीत्यादक्षिणांचापिदत्तवान् ॥ ५ ॥ गामेकांकपि
लांदत्त्वापुरोहितायभूषिताम् ॥ ब्राह्मणोजल्पतेकश्चिच्छूद्रंप्रतितदाप्रिये ॥ ६ ॥ अहंग्रामस्यवै
पूज्योमदीयांगांकथंप्रभो ॥ पुरोहितायदत्तवांस्त्वंप्राणंतेचददाम्यहम् ॥ ७ ॥ इतिश्रुत्वावचस्त
स्यसशूद्रोब्राह्मणंप्रति ॥ क्रोधेनमहतादेविवृतउत्तरमुक्तवान् ॥ ८ ॥ तस्यक्रोधेनविप्रस्यक्रो
धतश्चवरानने ॥ मरणंतस्यवैजातंतस्योपरिविषेणवै ॥ ९ ॥ ततोबहुतिथेकालेलवणकारस्य
भार्यया ॥ मरणंतस्यवैजातंकुम्भीपाकेतदाखलु ॥ १० ॥ निक्षिप्ययमदूतेनतत्रैवचयमाज्ञ
या ॥ पंचलक्षंततोवर्षंकष्टंदत्तंमुहुर्मुहुः ॥ ११ ॥ तत्रजातामहापीडानरकान्निःसृतस्ततः ॥ सर्पस्य
योनिंयातोवैगृध्रयोनिस्ततोऽभवत् ॥ १२ ॥ मानुषत्वंततोलब्धंमध्यदेशेवरानने ॥ पूर्वपापा
त्रभोदेविपुत्रोनैवप्रजायते ॥ १३ ॥ शरीरेरोगमुत्पन्नंब्रह्मदोषाद्वरानने ॥ प्रायश्चित्तंप्रवक्ष्यामि
पूर्वकिल्बिषशान्तये ॥ १४ ॥ गायत्रीसूर्यमंत्राभ्यांपंचलक्षजपंशिवे ॥ विधिवत्कारयामासत
दावैवरवर्णिनि ॥ १५ ॥ होमंवैकारयामासकुण्डेचाष्टदलेतथा ॥ दशांशंतर्पणंतस्यमार्जनंतद्द
शांशतः ॥ १६ ॥ प्रतिमांकारयामाससुवर्णस्यमहेश्वरि ॥ षट्पलस्यप्रयत्नेनपूजयित्वाग्रथा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

विधि ॥ १७ ॥ मंत्रेणानेनवाधिनागन्धधूपादिभिस्तथा ॥ दुर्गेदेविनमस्तुभ्यंसर्वसिद्धिप्रदेश्व
रि ॥ १८ ॥ इमांपूजांगृहीत्वातुममकार्यंप्रसाधय ॥ ॐह्रींमाहेश्वर्यैनमः ॥ ॐदुंदुर्गायैनमः ॥
ॐसर्वकामप्रदेतुभ्यंनमः ॥ ॐईश्वर्यैनमः ॥ ॐत्र्यम्बकायनमः ॥ ॐविष्णवेनमः ॥ ॐसर्वेश्वरा
यनमः ॥ ॐभैरवायनमः ॥ ॐमार्तण्डायनमः ॥ एतैश्चदशभिर्मंत्रैःप्रतिमांपूजयेत्प्रिये ॥ ब्राह्म
णायततोदद्याद्भक्तियुक्तेनचेतसा ॥ १९ ॥ पंचपात्रंततोदद्यात्तदुद्देशेनपार्वति ॥ तिलदानंत
तोदद्याद्वस्त्रदानंयथाविधि ॥२०॥ कूष्माण्डंनारिकेरंचपंचरत्नसमन्वितम् ॥ गङ्गामध्येप्रदातव्यं
पूर्वंपापप्रणाशने ॥ रोगात्प्रमुच्यतेदेविवन्ध्यापिपुत्रमाप्नुयात् ॥ २१ ॥ इति श्रीकर्मविपाके
पार्वतीहरसंवादे आश्लेषानक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामषट्त्रिंशोऽध्यायः ॥ ३६ ॥
॥ श्रीशिवउवाच ॥ ॥ अलर्कस्यपुरेदेविशूद्रएकोऽवसत्पुरा ॥ शूद्राचाररतोनित्यंविक्रयंकुरुते
सदा ॥ १ ॥ गोमहिष्यादिव्यापारैर्व्ययंकुर्याद्दिनेदिने ॥ गोधनानिबहून्येवतेषांरक्षानजायते ॥
॥ २ ॥ दुर्लभइतिविख्यातोमहाज्ञानीसदावसत् ॥ एकदातस्यगोवृन्दंवनेतिष्ठतिभोऽनघे ॥
॥ ३ ॥ महावृष्टिस्तत्रजातागावश्चपीडिताभृशम् ॥ तासांमध्येबह्वयोगावोवर्षणेनमृताःपुरा ॥
॥ ४ ॥ रक्षांशूद्रोनकुरुतेतृणैराच्छादनादिभिः ॥ एवंबहुगतेकालेशूद्रस्यमरणंतदा ॥ ५ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

नरकेपातयामासयमदूतोयमाज्ञया ॥ बहुवर्षसहस्राणिभुक्त्वानरकजंफलम् ॥ ६ ॥ नरकान्निर्ग
तोदेविगजयोनिमवाप्तवान् ॥ गजयोनिंततोभुक्त्वामानुषश्चाभवत्ततः ॥ ७ ॥ स्वकर्मणःपरित्या
गंयतः कृत्वावरानने ॥ ततःकर्मफलाद्देविनैवपुत्रः प्रजायते ॥ ८ ॥ गोसहस्रंतुयत्पूर्वंमृतंवृष्टिज
लेनवै ॥ तेनपापेनभोदेवितस्यव्याधिरभून्महान् ॥ ९ ॥ कृतंदानंपुरादेविसर्वपर्वणिचांजसा ॥
तेनपुण्येनभोदेविधनधान्यगजादिकम् ॥ १० ॥ तस्यशांतिंप्रवक्ष्यामिशृणुदेविसुशोभने ॥ ब्रा
ह्मणायदशांशंचदानंदद्यात्सुरप्रिये ॥ ११ ॥ गायत्रीलक्षजाप्येनजपंकुर्यात्प्रसन्नधीः ॥ दशांशंह
वनंदेविमार्जनंतर्पणंतथा ॥ १२ ॥ दशवर्णांततोदद्याद्ब्राह्मणायवरानने ॥ एवंकृतेनसंदेहोवरःपु
त्रः प्रजायते ॥ रोगाःसर्वेक्षयंयांतिनात्रकार्याविचारणा ॥ १३ ॥ इति श्रीकर्मविपाके
पार्वतीहरसंवादेसार्पनक्षत्रस्याद्वितीयचरणप्रायाश्चित्तकथनंनामसप्तत्रिंशोऽध्यायः ॥ ३७ ॥
॥श्रीशिवउवाच ॥गंगायाउत्तरेकूलेमालाकारोवसत्पुरा ॥ डेलचन्द्रेतिविख्यातोमहाज्ञानीगुणाक
रः ॥ १ ॥ स्वकर्मनिरतोनित्यंद्विजसेवासुतत्परः ॥ तस्यपत्नीविशालाक्षीनाम्नाचन्द्रावतीशुभा॥
॥ २ ॥ गुरुदासइतिख्यातोवर्णधर्मसुनिष्ठितः ॥ वैश्यएकःसमाख्यातोधनधान्यसमन्वितः ॥ ३ ॥
तयोःप्री[illegible]रभूद्देविसुदृढावैश्यशूद्रयोः ॥ वैश्येनतस्मैभोदेविस्वर्णदत्तंतदाबहु ॥ ४ ॥ लक्षत्रयं

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

स्थितंस्वर्णंतस्मैवैश्येनचार्पितम् ॥ मालाकारेणतत्सर्वंभूमौसंस्थाप्यतद्ग्रियेे ॥ ५ ॥ स्वयंजग
मवैश्येनसार्द्धंवेण्यांतदाप्रिये ॥ माघेनियमतःस्नानंकृतंताभ्यांयथाविधि ॥ ६ ॥ शूद्रस्तुगृहमा
गच्छद्वैश्यःकाश्यांसमागतः ॥ तत्रकाश्यांविशालाक्षिमरणंतस्यचाभवत् ॥ ७ ॥ अविमुक्तेमहा
तीर्थेदेवदानवपूजिते ॥ ममपार्श्वेसमायातोधर्मक्षेत्रप्रभावतः ॥ ८ ॥ मालाकारस्तुतत्स्वर्णभुक्त
वान्दारसंयुतः ॥ बहुवर्षगतेकालेमरणंतस्यचाभवत् ॥ तदागन्धर्वनगरेबहुवर्षसहस्रकम् ॥ ९ ॥
पत्न्यासहवरारोहेभुक्तंवैस्वर्गजंफलम् ॥ ततोबहुगतेकालेमानुषत्वमवाप्तवान् ॥ १० ॥ धनाढ्योगुणवा
न्भोक्तादेवब्राह्मणतत्परः ॥ तस्यपत्नीविशालाक्षीपूर्वजन्मप्रसङ्गतः ॥ ११ ॥ पुनर्विवाहितादेवि
पतिसेवासुतत्परा ॥ पुष्पंचजायतेदेविमासिमासिनिरन्तरम् ॥ १२ ॥ पुत्रोनजायतेदेविकन्यकाखलु
जायते ॥ यतोवैश्यस्यवैस्वर्णंनदत्तंपूर्वजन्मनि ॥ १३ ॥ तत्कर्मणःफलाद्देविपुत्रोनैवप्रजायते ॥
तस्यशांतिंप्रवक्ष्यामिशृणुदेवियथार्थतः ॥ १४ ॥ गृहद्रव्यषडंशेनपुण्यकार्यंचकारयेत् ॥ स्वर्णं
दशपलैश्चैववैश्यंकृत्वाप्रयत्नतः ॥ १५ ॥ पूजयित्वाविधानेनब्राह्मणायप्रदापयेत् ॥ षडंगजातवे
दाभ्यांजपंवैपाठयेत्ततः ॥ १६ ॥ जीर्णोद्धारंततोदेविवापिकाकूपमेवच ॥ एवंकृतेनसंदेहःपुत्रो
भवतिनान्यथा ॥ १७ ॥ रोगस्तस्यानिवर्तेतधनंचबहुजायते ॥ १८ ॥ इतिश्रीकर्मविपाके

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

पार्वतीहरसंवादेआश्लेषानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामअष्टात्रिंशोऽध्यायः ॥ ३८ ॥
॥ श्रीशिवउवाच ॥ अयोध्यानगरीश्रेष्ठासर्वदेवसुपूजिता ॥ यस्यांप्रवेशमात्रेणसर्वपापैः प्रमुच्यते
॥ १ ॥ तस्यास्तुपश्चिमेदेवियोजनानांद्वयोपरि ॥ पुरंलक्ष्मणनामैकंवसंतिबहवोजनाः ॥ २ ॥
तन्मध्येशूद्रएकोहिकैवर्तोधनधान्यवान् ॥ डालेतिनाम्नाविख्यातस्तस्यपत्नीचकेशवी ॥ ३ ॥
तेनव्यापारतोदेविधनंबहुचसंचितम् ॥ मात्स्यंप्रभुज्यतेनित्यंमांसंचबहुधाप्रिये ॥ ४ ॥ निर्दयः
सर्वजन्तूनांकच्छपानांविशेषतः ॥ एवंबहुगतेकालेतस्यमृत्युरभूत्किल ॥ ५ ॥ यमदूतैर्महाघोरे
निक्षिप्तश्चयमाज्ञया ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकयातनाम् ॥ ६ ॥ नरकान्निःसृतोदेवि
दर्दुरत्वंतथागतः ॥ ऋक्षत्वंचततोदेविमानुषत्वंततोलभत् ॥ ७ ॥ पाण्डुरोगेणसंयुक्तोवंशो
नैवतुजीवति ॥ कन्यकाबह्वयः संजाताविधवाव्यभिचारिकाः ॥ ८ ॥ अपत्यानांनिरोधश्च
युवत्वसमयेसति ॥ अस्यपुण्यंप्रवक्ष्यामियथापापात्प्रमुच्यते ॥ ९ ॥ षडंशंब्राह्मणेदानंश्रीवि
ष्णोःपूजनंतथा ॥ विष्णोरराटमंत्रेणलक्षजाप्यंचकारयेत् ॥ १० ॥ एवंकृतेनसंदेहोवंशोभवति ॥३०॥
नान्यथा ॥ रोगाश्चविलयंयांतिनात्रकार्याविचारणा ॥ ११ ॥ इतिश्रीकर्मविपाकेपार्व
तीहरसंवादेआश्लेषानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामएकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ शिवउवाच ॥ ॥ पुरादेविशुभंख्यातंपुरंमंगलनामकम् ॥ तत्रवैश्योवसत्येकोधनधान्यसम
न्वितः ॥ १ ॥ तस्यनामसमाख्यातंमंगलंदेविवैशुभम् ॥ तस्यपत्नीविशालाक्षीसुन्दरीसुखदा
यिनी ॥ २ ॥ विष्णुभक्तिरतोनित्यंगुरुब्राह्मणसेवकः ॥ आचारेनिरतःशान्तःक्रयविक्रयतत्परः
॥ ३ ॥ एकदातुगृहेविप्रोमित्रंतस्यसमागतम् ॥ आदरंबहुधाकृत्वाभोजयामासशास्त्रतः ॥ ४ ॥
स्वर्णदानंततोलक्षमुद्रादानंततःप्रिये ॥ दत्तंवैश्येनभोदेविब्राह्मणायस्वशांतये ॥ ५ ॥ ब्राह्मणेन
हितत्सर्वंस्थापितंतस्यवैगृहे ॥ ततोपितीर्थयात्रायांवाराणस्यांवरानने ॥ ६ ॥ तस्यमृत्युरभूद्दे
विकाश्यांचैवस्वकर्मतः ॥ बहुकालेगतेदेविवैश्योदारिद्र्यपीडितः ॥ ७ ॥ पुत्रदारैश्चसंयुक्तस्त
स्यद्रव्यंतदाप्रिये ॥ भुक्तंसर्वंततोदेविस्वदत्तंचैवपुण्यदम् ॥ ८ ॥ वृद्धत्वेचपुनर्जातेतस्यमृत्यु
रभूत्किल ॥ अयोध्यायांमहातीर्थेस्वर्गवासस्तातोभवत् ॥ ९ ॥ बहुवर्षसहस्राणिविष्णुलोकेवरान
ने ॥ भुक्त्वाबहुविधंपुण्यंक्षयेसातितदानघे ॥ १० ॥ मृत्युलोकेभवज्जन्मधनधान्यसमन्वितः ॥
विष्णुपूजारतोनित्यंब्राह्मणेषुचभक्तिमान् ॥ ११ ॥ मित्रद्रव्यंस्वयंदत्तंभुक्तंतेनततःप्रिये ॥ पुत्रो
त्पत्तिःप्रथमतस्तस्यवैमरणंभवेत् ॥ १२ ॥ पुनःपुत्रोनजायेतकाकवन्ध्याततःप्रिया ॥ शरीरेक
फवातादिरोगाश्वविविधास्तथा ॥ १३ ॥ प्रौढत्वंचतदातस्यजायतेनात्रसंशयः ॥ तत्पापशम

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

नार्थंचपुण्यंशृणुवरानने ॥ १४ ॥ षडंशंचततोदानंब्राह्मणायवरानने ॥ गायत्रीमंत्रजाप्यंचलक्ष
मेकंप्रयत्नतः ॥ १५ ॥ हवनंविधिवत्कुर्यात्तर्पणंमार्जनंतथा ॥ गामेकांकपिलांदद्यात्स्वर्णशृंगीं
सहाम्बराम् ॥ १६ ॥ दद्यात्प्रयत्नतोदेविब्राह्मणायमहात्मने ॥ तिलधेनुंततोदद्यात्पात्रंवस्त्रंत
थाप्रिये ॥ १७ ॥ हरिवंशस्यश्रवणंदम्पतिभ्यांचभक्तितः ॥ एवंकृतेततोदेविपुनःपुत्रःप्रजायते
॥ १८ ॥ रोगाःसर्वेक्षयंयांतिनात्रकार्याविचारणा ॥ १९ ॥ इतिश्रीकर्मविपाकेपार्व
तीहरसंवादेमघानक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामचत्वारिंशोध्यायः ॥ ४० ॥ ॥
॥ शिवउवाच ॥ अयोध्यानगराद्देवियोजनोपरिवल्लभे ॥ दक्षिणेनन्दिनीग्रामेवसंतिबहवोज
नाः ॥ १ ॥ द्विजस्तत्रवसत्येकोमद्यवेश्यारतःसदा ॥ परस्त्रीलंपटोनित्यंमद्यमांसरतस्तथा ॥२॥
नामतोमित्रशर्मेतितस्यपत्नीतुकर्कशा ॥ प्रत्यहंद्यूतकार्येणव्ययंकुर्याद्दिनेदिने ॥ ३ ॥ एवंबहु
तिथेकालेतस्यमृत्युरभूत्पुरा ॥ पश्चान्मृतातुतत्पत्नीकर्कशादुःखदायिनी ॥ ४ ॥ यमस्याकिं
करैरेवानिक्षिप्तानरकार्णवे ॥ संप्रातिवैसहस्राणिवर्षाणिसुरवल्लभे ॥ ५ ॥ भुक्त्वाशोकार्णवंघोरंदंपति
भ्यांतदाशिवे ॥ ततः पापक्षयेदेविश्वानयोनिरभूत्पुरा ॥ ६ ॥ श्वानयोनिंततोभुक्त्वाशूकरोनि
र्जनेवने ॥ मानुषस्यपुनर्योनिंमध्यदेशेततोलभत् ॥ ७ ॥ नन्दिग्रामफलाद्देविधनधान्यसमन्वि

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तः ॥ परस्त्रीलम्पटोदेविपादपीडाप्रजायते ॥ ८ ॥ मद्यपानफलाद्देविगर्भपातःपुनःपुनः ॥ ब
ह्वयःकन्याःप्रजाताश्चस्त्रीसौख्यंनैवविन्दति ॥ ९ ॥ पुत्रस्यमरणंदेविजातंवेश्यासुसंगमात् ॥ पू
र्वजन्मकृतंपापंपुण्यंचाशैरिजेवरे ॥ १० ॥ मानुषैर्नैवभुज्यन्तेमृत्युलोकेसुरेश्वरि ॥ अस्यशांतिं
प्रवक्ष्यामियथोक्तंशृणुभामिनी ॥ ११ ॥ गृहवित्ताष्टमंभागंब्राह्मणायददौयदा ॥ १२ ॥ वापीकू
पतडागेषुजीर्णोद्धारःप्रयत्नतः ॥ माघकार्तिकवैशाखेश्रावणेचाविशेषतः ॥ १३ ॥ प्रत्यब्देभो
जयेद्विप्राञ्छ्रोत्रियान्वेदपारगान् ॥ गायत्रीजातवेदोभ्यांद्विलक्षंजपमाचरेत् ॥ १४ ॥ जपतोह
वनंतद्वत्तर्पणंमार्जनंतथा ॥ महाभारतमाख्यानंश्रुत्वापापंव्यपोहति ॥ १५ ॥ दशवर्णाप्रदा
तव्यागौश्चपापविशुद्धये ॥ एवंकृतेवरारोहेसर्वरोगःप्रणश्यति ॥ १६ ॥ पुत्रोभवतिभोदेविवन्ध्य
त्वंचप्रणश्यति ॥ काकवन्ध्याचयानारीपुनःपुत्रमवाप्नुयात् ॥ १७ ॥ कन्यकानैवजायंतेधनवृ
द्धिर्भवेत्किल ॥ पूर्वजन्मकृतंपापंक्षयंयातिनचान्यथा ॥ १८ ॥ इहलोकेसुखीभूयात्पुनःपापंन
बाधते ॥ इतिश्रीकर्म० पार्व० मघा० द्वि० प्रा० चत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ ॥
॥ शिवउवाच ॥ ॥ अयोध्यायांविशालाक्षिकुलालोवसतिप्रिये ॥ मंथराग्राममध्येवैस्वकर्मनि
रतः सदा ॥ १ ॥ पात्रंवैमृन्मयंदेविप्रकरोतिसदाप्रिये ॥ तस्यमित्रंसमायातोब्राह्मणोवेदपारगः ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by JKS-MoE

॥ २ ॥ तस्यस्त्रीचमहादुष्टाब्राह्मणीव्यभिचारिणी ॥ कुलालतोऽभवत्प्रीतिमैथुनंप्रकरोतिसा ॥
॥ ३ ॥ ब्राह्मण्यांगमनंनित्यंबहुवर्षंनिरंतरम् ॥ एवंबहुगतेकालेसमतीतेसुरेश्वरि ॥ ४ ॥ कुला
लस्यततोमृत्युःप्रौढेजातेसुरेश्वरि ॥ पश्चात्तस्यमृतापत्नीयापुराव्यभिचारिणी ॥ ५ ॥ यमदू
तैर्महाघोरेकर्दमेनरकेप्रिये ॥ यमाज्ञयाचनिक्षिप्तौशुभेवर्षशतत्रयम् ॥ ६ ॥ अनुगामिनीसमाया
तावर्षत्रयेगतेसति ॥ नरकार्णवमुद्धृत्यस्वपत्नीचततःप्रिये ॥ ७ ॥ मृत्युलोकेततोजातौधनधा
न्ययुतौतदा ॥ ८ ॥ पुत्रकन्याविहीनश्चमृतवत्सत्वमाप्तवान् ॥ ब्राह्मणीगमनाद्देविबहुरोगश्चजा
यते ॥ ९ ॥ अतः शांतिंप्रवक्ष्यामिशृणुत्वंगिरिजेशुभे ॥ सर्वस्वदानंकर्त्तव्यंरुद्रमंत्रजपस्तथा ॥
॥ १० ॥ पूजिताःपार्थिवाश्चैववाटिकारोपणंतथा ॥ हरिवंशश्रवणंचैवभूमिदानंतथैवच ॥ ११ ॥
गायत्रीमूलमंत्रेणलक्षजाप्यंतथाप्रिये ॥ होमंचकारयेद्देवितिलधान्यादितण्डुलैः ॥ १२ ॥ कुंडेवै
कारयामासचतुष्कोणेसुरेश्वरि ॥ दशांशहवनंदेविविधिवत्कारयेद्बुधः ॥ १३ ॥ दशवर्णांततो
दद्यात्स्वर्णनिष्कचतुष्टयम् ॥ ब्राह्मणान्भोजयेत्षष्टिंपायसान्नैःसशर्करैः ॥ १४ ॥ भूम्यादानंततो ॥३२॥
दद्यात्तिलान्दद्यात्प्रयत्नतः ॥ एवंकृतेनसंदेहोवंशोभवतिनान्यथा ॥ १५ ॥ सर्वेरोगाः क्षयंयां
तिनचकन्याप्रसूयते ॥ काकवन्ध्यालभेत्पुत्रंमृतवत्साचपुत्रिणी ॥ १६ ॥ इति श्रीकर्म०

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

पार्व० मघानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनं नामद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
॥ शिवउवाच ॥ ॥ कांचीपुर्य्यांमहादेविवैश्वएकोऽवसत्पुरा ॥ मकरंदइतिख्यातस्तस्यस्त्रीपा
लिकाशुभा ॥ १ ॥ अश्वादिविक्रयंदेविगजपक्ष्यादिकंतथा ॥ प्रत्यहंक्रियतेदेविबहुद्रव्यंचसंचि
तम् ॥ २ ॥ नदेवंमन्यतेदेविपितरौनैवमन्यते ॥ गतेबहुदिनेदेविपित्रोश्चमरणंभवेत् ॥ ३ ॥ त
योःश्राद्धंनकर्त्तव्यंकृपणत्वात्ततःप्रिये ॥ ततोबहुदिनंजातं वृद्धेसातिवरानने ॥ ४ ॥ मरणंतस्यवै
जातंवैश्यस्यकृपणस्यच ॥ यमाज्ञयातुदूतेनकुम्भीपाकेसुदारुणे ॥ ५ ॥ निक्षिप्तःशृंखलैर्बद्ध्वा
युगपंचदशंतथा ॥ भुक्त्वानरकजंदुःखंमहाकृमिसमाकुलम् ॥ ६ ॥ नरकान्निःसृतोदेविमाहिष
त्वंततोलभत् ॥ पुनर्वैव्याघ्रयोनिश्चमूषयोनिस्ततोऽभवत् ॥ ७ ॥ काकयोनिंततोभुक्त्वागज
योनिस्ततोऽभवत् ॥ शुभेदेशेविशालाक्षिधनधान्यसमन्वितः ॥ ८ ॥ व्याधिग्रस्तोऽभवद्देविपु
त्रकन्याविवर्जितः ॥ काकवन्ध्याभवन्नारीमृतवत्साचपुत्रिणी ॥ ९ ॥ पूर्वजन्मकृतंपापंयतःशा
न्तिमवाप्नुयात् ॥ तत्सर्वंशृणुमेदेविविस्तरेणसमन्वितम् ॥ १० ॥ प्रयागेनियतः स्नानंप्रतिमाघं
यदाकरोत् ॥ गायत्रीजातवेदोभ्यांदशायुतजपंतथा ॥ ११ ॥ भूमिदानंचवैकृत्वाततः पुत्रःप्रजा
यते ॥ वन्ध्यात्वंशमनंयातिकाकवन्ध्यातुशाम्यति ॥ १२ ॥ मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्त

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agamnigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

मम् ॥ सर्वेरोगाःक्षयंयान्तिनात्रकार्याविचारणा ॥ १३ ॥ ॥ इति श्रीकर्मविपाकसंहितायांपा
र्वतीहरसंवादेमघानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
॥ शिवउवाच ॥ ॥ सौराष्ट्रविषयेदेविशोभनंनामवैपुरम् ॥ तत्रक्षत्रीवसत्येकोधनधान्यसमन्वि
तः ॥ १ ॥ मोहेनेतिचविख्यातस्तस्यपत्नीसतीशुभा ॥ वैश्यवृत्तिरतोनित्यंव्यापारंकुरुतेस
दा ॥ २ ॥ व्यापारार्थंततोदेविवृषभाबहुपालिताः ॥ द्वौवृषौयोजितौदेविकूपेवैपातितौप्रिये ॥
॥ ३ ॥ मृतौतौरात्रिसमयेजगामसतदानच ॥ पापंचसनजानातिधनगर्वाद्वरानने ॥ ४ ॥ यत्कि
ञ्चित्क्रियतेकर्मशुभंवापिसुरेश्वरि ॥ तमोगुणंततोदेविमोहेनोनामक्षत्रियः ॥ ५ ॥ ततोबहुगते
कालेमरणंतस्यचाभवत् ॥ पश्चान्मृतातस्यपत्नीमहालुब्धावरानने ॥ ६ ॥ निक्षिप्तोनरकेघो
रेयमदूतैर्यमाज्ञया ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकयातनाम् ॥ ७ ॥ पुनःसरठयोनिश्चवृषयोनि
स्ततोऽभवत् ॥ मानुषत्वंततोदेविमध्यदेशेवरानने ॥ ८ ॥ वृषयोश्चपुरामृत्योर्नकृतंपापमोचनम्
॥ तस्माद्व्याधिःसमुत्पन्नःपूर्वकर्मप्रपञ्चतः ॥ ९ ॥ मुखरायाभवत्पत्नीपुराचप्रबलाप्रिये ॥ पुन
र्विवाहितादेवितद्रूपामुखरातथा ॥ १० ॥ तत्पापशमनार्थंचषडंशंदानमाचरेत् ॥ गायत्रीमूल

१ गोविंदइतिनामावैइत्यपिपाठः । २ गोविंद इतिपूर्ववपाठोन्यत्र ।

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

मंत्रेणपंचलक्षजपंयदा ॥ ११ ॥ ततःपापंक्षयंयातिशीघ्रंपुत्रोभवेत्प्रिये ॥ अपुत्रामृतवत्साचका
कवन्ध्याचयाशिवे ॥ १२ ॥ पुत्रिण्यश्चैवताःसर्वानात्रकार्याविचारणा ॥ रोगाः सर्वेविनश्यंतिशी
घ्रमेवनसंशयः ॥ १३ ॥ इतिश्रीकर्म० पार्वतीहरसंवादे पूर्वानक्षत्रस्य प्रथमचरणप्राय० नामच
तुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

॥ शिवउवाच ॥ ॥ कर्णाटदेशेभोदेविकाष्ठकारोवसत्पुरा ॥ छिनत्तिसर्वकाष्ठानिव्ययंकुर्या
द्दिनेदिने ॥ १ ॥ एकावैगोत्रजाकन्यातस्यांवैमैथुनंकृतम् ॥ ततोबहुगतेकालेतस्यमृत्युरभूत्पु
रा ॥ २ ॥ पश्चात्तस्यमृतानारीकुलटाव्यभिचारिणी ॥ यमदूतैर्महाघोरैर्नीक्षिप्तोनरकार्णवे
॥ ३ ॥ यमाज्ञयामहादेविभुक्त्वानरकयातनाम् ॥ षष्टिवर्षसहस्राणिनरकेपच्यतेचसः ॥ ४ ॥
कुक्कुटत्वंततोजातंचक्रवाकस्ततोभवत् ॥ मानुषत्वंततोजातंदेशेपूज्यतमेतथा ॥ ५ ॥ शूद्र
सेवारतोनित्यंशूद्रस्नेहेनयन्त्रितः ॥ पितुर्मातुर्भवेद्वैरंमाहिष्याःक्रयविक्रयी ॥ ६ ॥ पूर्वजन्मनिभो
देविकृतवृक्षस्यछेदनम् ॥ तस्माद्रोगःसमुत्पन्नःकटिशूलंनिरंतरम् ॥ ७ ॥ गोत्रकन्याभिगमनं
यत्कृतंपूर्वजन्मनि ॥ तेनपापेन भोदेविपुत्रस्यमरणंभवेत् ॥ ८ ॥ गर्भस्राविणीततोभार्य्याकाक
वंध्यात्वमाप्नुयात् ॥ बहुचःकन्यास्ततोजाताःकष्टंप्राप्नोत्यहर्निशम् ॥ ९ ॥ अतःशांतिप्रवक्ष्या

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

मपूर्वपापविशुद्धये ॥ गृहाणितोष्टमेमार्गेब्राह्मणायतमर्पयेत् ॥ १० ॥ गोधनादिकदानेनगोदा
नेनाविशेषतः ॥ वाटिकारोपणेनापिगृहदानेनवैशिवे ॥ ११ ॥ रोगाःसर्वेक्षयंयांतिनात्रकार्या
विचारणा ॥ पूर्वजन्मकृतंपापंक्षयंयातिनसंशयः ॥ १२ ॥ जायंतेबहवःपुत्राःशूराःकीर्तिविव
र्धनाः ॥ कन्यकानैवजायंतेकाकवन्ध्यातुशाम्यति ॥ १३ ॥ ॥ इतिश्रीकर्मवि० पार्व०
पूर्वान० द्वितीयचरणप्राय० नामपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥

॥ शिवउवाच ॥ ॥ सिंहलेवैमहाद्वीपेतत्रसिंहपुरंशिवे ॥ कायस्थोवैष्णवोप्येकश्रीकारामेतिना
मतः ॥ १ ॥ तस्यभार्याविशालाक्षीसूर्यानाम्नीशुभासती ॥ आतिथ्यकरणेशक्तादेवतातिथि
पूजका ॥ २ ॥ कार्तिकेमाघवैशाखेदीपदानंकरोतिसा ॥ कदाचिद्दैवयोगेनतीर्थयात्रार्थ
मागतः ॥ ३ ॥स्वर्णकारोमहादेविबहुस्वर्णेनसंयुतः ॥ आगतःसिंहनगरेतत्रवासमकारयत् ॥ ४॥
प्रीतिःपरस्परंजाताकायस्थस्वर्णकारयोः ॥ स्वर्णकारस्यकन्यैकासुन्दरीकमलानना ॥ ५ ॥
कायस्थस्याभवद्भार्यादैवयोगात्तदाशिवे ॥ ६ ॥ द्रव्यक्षयमथोज्ञात्वास्वर्णकारोमृतःपुरा ॥ पु
त्रदारादिकंत्यक्त्वाकायस्थश्चतदाशिवे ॥ ७ ॥ तयासार्धंरमत्येकोनित्यंनित्यंवरानने ॥ एवं
बहुगतेकालेकायस्थोपिमृतःप्रिये ॥ ८ ॥ कुम्भीपाकेभवद्वासोवर्षलक्षत्रयंतथा ॥ पुनःकर्मव ॥३४॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

शाद्देविमृगयोनिस्ततोभवत् ॥ ९ ॥ मानुषत्वंवरारोहेपुनर्जातोमहीतले ॥ धनधान्यसमायुक्तो
वैश्योनैवप्रजायते ॥ १० ॥ बहुरोगसमायुक्तोज्वरातीवमृतेःसमः ॥ पुत्राणांमरणंदेविशीतलाद्यै
रुपद्रवैः ॥ ११ ॥ पूर्वजन्मनिभोदेविपरस्त्रीगमनंकृतम् ॥ त्यक्ताविवाहितानारीपुत्रकन्यासम
न्विता ॥ १२ ॥ तत्पापेनचभोदेविपुत्रादीनांविनाशनम् ॥ गर्भनाशोभवेद्देविवन्ध्यात्वंजायते
शिवे ॥ १३ ॥ काकवन्ध्याभवेन्नारीसुखंनैवप्रजायते ॥ स्वल्पभोगीकृशाङ्गश्चकथाश्रवण
तत्परः ॥ १४ ॥ विद्यादानविहीनश्चस्वकुलेबहुनिष्ठुरः ॥ अस्यशांतिंप्रवक्ष्यामिकृतंयत्पूर्वज
न्मनि ॥ १५ ॥ तत्सर्वंशृणुमेदेवियतःशुद्धिमवाप्नुयात् ॥ गायत्रीमूलमंत्रेणलक्षंजाप्यंवरानने
॥ १६ ॥ हवनंतद्दशांशेनतर्पणंमार्जनंततः ॥ हरिवंशस्यश्रवणंकुर्यात्त्र्यावृत्तिसंख्यया ॥ १७ ॥
दशवर्णांततोदानंस्वर्णदानंविशेषतः ॥ निष्कत्रयंप्रदद्याच्चंततःपापक्षयोभवेत् ॥ १८ ॥ भोजये
द्ब्राह्मणान्षष्टिंतथादद्याच्चदक्षिणाम् ॥ एवंकृतेविधानेनपुत्रोभवतिनान्यथा ॥ १९ ॥ रोगाःसर्वे
क्षयंयान्तिनात्रकार्याविचारणा ॥ एवंयदानकुर्यात्तुतदारोगःपुनःपुनः ॥ २० ॥ जायतेनात्रसंदे
हःपूर्वजन्मफलात्किल ॥ २१ ॥ इतिश्रीकर्मविपाक॰पार्वतीहरसंवादेपूर्वानक्षत्रस्यतृतीयचरण
प्रायश्चित्तकथनंनामषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ॥ ॥ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C). Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ श्रीशिवउवाच ॥ नर्मदादक्षिणकूलेब्राह्मणोवसतिप्रिये ॥ ब्रह्मकर्मकरोनित्यंसदावेदपरायणः
॥३९॥ ॥ १ ॥ शंकरस्यपुरेदेविप्रत्यहंवेदपाठनम् ॥ अर्भकान्ब्रह्मजातीयान्पाठयामाससवैसदा ॥ २ ॥
तस्यभार्याद्वयं चासीदेकाप्रीतिमतीसदा ॥ विरोधिनीततोह्येकाज्येष्ठांभार्यांततोत्यजत् ॥ ३ ॥
एवंबहुगतेकालेब्राह्मणश्चसदाशिवे ॥ ततोमृत्युवशंयातस्तस्यभार्यागरीयसी ॥ ४ ॥ चितांकृ
त्वाप्रयत्नेनभर्तुःखलुवरानने ॥ भर्त्रासहचभोदेविसतीभवतितत्क्षणात् ॥ ५ ॥ सत्यलोकस्त्व
भूत्तस्यजाययासहितस्यवै ॥ बहुवर्षसहस्राणिसत्यलोकेवसत्तदा ॥ ६ ॥ ततः पुण्यक्षयेजातेम
र्त्यलोकेभवत्पुनः ॥ मानुषत्वंशुभेजन्मकुलेमहतिपूजिते ॥ ७ ॥ धनधान्यसमायुक्तोवंशहीनो
विचक्षणः ॥ पूर्वजन्मनिभोदेविभार्यात्यागःकृतोयतः ॥ ८ ॥ तेनदोषेणभोदेविततःपुत्रोनजीव
ति ॥ दिनेदिनेकुक्षिपीडातस्यकन्याप्रजायते ॥ ९ ॥ पुण्यंशृणुमहादेवियतःपुत्रःप्रजायते ॥ गृ
हवित्तषडंशेनपुण्यकार्यंचकारयेत् ॥ १० ॥ वापीकूपतडागंचपथिमध्येचकारयेत् ॥ गायत्री ॥३९॥
जातवेदोभ्यांजपंकुर्याद्विचक्षणः ॥ ११ ॥ होमंचतद्दशांशेनतिलतंडुलपायसैः ॥ दशवर्णाप्रदात
व्याविप्राणांभोजनंशतम् ॥ १२ ॥ एवंकृतेनसंदेहोवंशलाभोभवेदनु ॥ व्याधिश्चैवप्रमुच्यतेस

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

गृहवित्तषडंशेनपुण्यकार्यंचकारसः ॥ गायत्रीमूलमंत्रेणदशायुतजपंतथा ॥ १२ ॥ होमंचतद्द
शांशेनतर्पणंमार्जनंतथा ॥ दशवर्णाप्रदातव्यास्वर्णयुक्तासदंबरा ॥ १३ ॥ भूमिदानंततोदेवि
विप्रायविदुषेप्रिये ॥ व्रतंसूर्यस्यवैकुर्यात्पत्न्यासहवरानने ॥ १४ ॥ कूष्मांडंनारिकेरंचपंचरत्न
समन्वितम् ॥ गंगामध्येप्रदातव्यंसुवर्णदक्षिणाततः ॥ १५ ॥ शय्यादानंप्रयत्नेनप्रकुर्यान्नियते
न्द्रियः ॥ एवंकृतेनसंदेहःसर्वरोगोविनश्यति ॥ १६ ॥ अपुत्रोलभतेपुत्रंकाकवन्ध्यासुतंलभेत् ॥
मृतवत्सासुतंसूतेचिरंजीविनमुत्तमम् ॥ १७ ॥ इति श्रीकर्मविपाक० पार्वतीहरसंवादे उत्तरानक्षत्र
स्यप्रथमचरणप्रायश्चित्तकथनंनामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ ॥
॥ श्रीशिवउवाच ॥ ॥ पुरुषोत्तमपुरेरम्येस्वर्णकारोवसत्पुरा ॥ स्वकर्मनिरतोनित्यंहेमकृत्यवि
चक्षणः ॥ १ ॥ ब्राह्मणस्तस्यवैमित्रंधनाढ्योवेदवर्जितः ॥ तेनविप्रेणभोदेविस्वर्णंदत्तंशतंपल
म् ॥ २ ॥ स्वर्णकारायमित्रायमाल्यार्थंचविचक्षणे ॥ ब्राह्मणायनदत्तंहिमाल्यंदिव्यंवरेऽनघे ॥ ३ ॥
ब्राह्मणस्यभवेन्मृत्युःकिंचित्कालेगतेसति ॥ स्वर्णंतत्स्वेच्छयाभुक्तंपुत्रदारेणसंयुतम् ॥ ४ ॥ ॥३६॥
ततोबहुगतेकालेस्वर्णकारस्यवैशिवे ॥ मरणंवैतदाजातंपुत्रदारयुतस्यच ॥ ५ ॥ महा
कटाहनरकेदूतैःक्षिप्तोयमाज्ञया ॥ युगमेकंवरारोहेभुक्तंनरकजंफलम् ॥ ६ ॥ नरकान्निर्गतोदे

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

विंध्याग्रयोनिस्ततोभवत् ॥ व्याघ्रयोनिंततोभुक्त्वाशृगालत्वंततोभवत् ॥ ७ ॥ ततःकाकस्य
वैयोनिंभुक्त्वानरकमाप्नुयात् ॥ देशेपुण्यतरेदेविमानुषत्वंसुरेश्वरि ॥ ८ ॥ पूर्वजन्मनियत्स्वर्णं
ब्राह्मणस्यहृतंप्रिये ॥ तेनपापेनभोदेविपुत्रोनैवप्रजायते ॥ ९ ॥ गर्भस्रावीभवेन्नारीकाकवन्ध्या
चजायते ॥ अस्यपापस्यवैशांतिंशृणुदेविसुशोभने ॥ १० ॥ षडंशंचततोदानंब्राह्मणायसमर्पयेत् ॥
दशायुतजपंकुर्याद्गायत्र्यानियमेनच ॥ ११ ॥ हरिवंशश्रवणंदेविसंकल्प्यश्रद्धयायुतम् ॥ होमंवै
कारयेद्देविस्वर्णदानंशतंपलम् ॥ १२ ॥ गोदानंविधिवत्कुर्याच्छिवपूजनमेवच ॥ एवंकृतेनसंदेहः
शीघ्रंपुत्रमवाप्स्यते ॥ १३ ॥ मृतवत्सालभेत्पुत्रंचिरजीविनमुत्तमम् ॥ काकवन्ध्याप्रसूयेतसत्यमे
वनसंशयः ॥ रोगात्प्रमुच्यतेशीघ्रंज्वरःसर्वःक्षयंव्रजेत् ॥ १४ ॥ ॥ इति श्रीकर्मविपाकसंहितायां
पार्वतीहरसंवादेउत्तरानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनंनामैकोनपंचाशत्तमोऽध्यायः ॥४९॥
॥ शिवउवाच ॥ पुरेवैपट्टनेदेवितैलकारोवसत्पुरा ॥ महाधनाढ्योवैदेविकोटिद्रव्येणसंयुतः ॥
॥ १ ॥ तस्यचस्त्रीद्वयंचासीज्ज्येष्ठायांवैविषंददौ ॥ कनिष्ठाचगृहेतस्यगृहिणीधर्मचारिणी ॥२॥
एवंबहुगतेकालेतैलकारस्यवैशिवे ॥ मरणंतस्यवैजातंयमदूतैर्यमाज्ञया ॥ ३ ॥ महाकटाहेनर
केनिःक्षिप्तश्चसुदारुणे ॥ तत्रापिबहुधापीडानानानरकयातना ॥ ४ ॥ त्रिंशत्सहस्रंवैवर्षंतीव्रंदुः

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

खमजायत ॥ भुक्त्वानरकजंदुःखयांनिसप्तस्यवाशव ॥ ५ ॥ गृध्रत्वंकुक्कुटत्वंवंढ्योनीचतदागतः ॥
मानुषस्यचवैयोनिंजातःखलुवरानने ॥ ६ ॥ धनधान्यसमायुक्तोगुणज्ञोज्ञानवानपि ॥ ततो
वैतस्यमरणंगंगायांदेविजायते ॥ ७ ॥ तत्फलेनमहादेविमानुषोधनवानभूत् ॥ तैलकारश्चयत्पू
र्वंज्येष्ठायैचविषंददौ ॥ ८ ॥ तत्पापेनैवभोदेविपुत्रोनैवप्रजायते ॥ बहुरोगेणसंयुक्तोभार्याकष्टयु
तासदा ॥ ९ ॥ अथशांतिंप्रवक्ष्यामिशृणुदेविसविस्तराम् ॥ गृहवित्ताष्टमंभागंपुण्यकार्येचका
रसः ॥ १० ॥ गायत्रीमूलमंत्रेणलक्षजाप्यंचकारयेत् ॥ हवनंतद्दशांशेनमार्जनंतर्पणंतथा ॥
॥ ११ ॥ त्र्यम्बकेतिचमन्त्रेणदशायुतजपंपुनः ॥ दशवर्णाततोदानंकूष्मांडंरत्नसंयुतम् ॥ १२ ॥
काश्यांवैग्रहणेदद्यात्पत्न्याःसार्धंवरानने ॥ कार्तिकेमाधवेमाघेप्रातःस्नानंसमाचरेत् ॥ १३ ॥
तिलधेनुंततोदत्त्वासद्यःपापात्प्रमुच्यते ॥ एवंकृतेनसंदेहोवंशलाभोभवेद्ध्रुवम् ॥ १४ ॥ कन्यका
जननीचापिसापिपुत्रवतीभवेत् ॥ मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्तमम् ॥ रोगात्प्रमुच्यतेशी
घ्रंज्वरोनैवप्रजायते ॥ १५ ॥ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादे उत्तरानक्षत्र
स्यतृतीयचरणप्रायश्चित्तकथनंनामपंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ ॥
शिवउवाच ॥ ॥ गयापुर्यांपुरादेविब्राह्मणोवसातिप्रिये ॥ वेदकर्मपरिभ्रष्टोमद्यपानरतःसदा ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ १ ॥ स्तेयवेश्यासुसंसर्गीसप्रतिग्रहवानपि ॥ वयःसर्वंगतंदेविवृद्धेजातेमृतःसवै ॥ २ ॥ यमदू
तोमहाघोरेकटाहनरकेक्षिपत् ॥ लक्षत्रयमितंदेविभुक्तंनरकजंफलम् ॥ ३ ॥ चाणूरस्यकु
लेजन्मततःप्रेतोह्यभूत्पुरा ॥ बिडालत्वंततोयातःफल्गुतीर्थेमृतःसवै ॥ ४ ॥ पुनर्मानुषयोनि
श्चमध्यदेशेसुरेश्वरि ॥ कन्यकाजनिताभार्याशरीरेसततंज्वरः ॥ ५ ॥ चित्तोद्विग्नःसदादेविब
हुदुःखेनपीडितः ॥ अस्यशांतिंशृणुष्वादौयतः पापक्षयोभवेत् ॥ ६ ॥ केशवस्यार्चनंचादौ
साधूनांसेवनंयदा ॥ ब्राह्मणेदृढभक्तिश्चदानैर्वैभोजनैतथा ॥ ७ ॥ गांसवत्सांततोदद्याद्विप्रायप्रति
वत्सरम् ॥ श्रवणंविष्णुमाहात्म्यंहरिवंशश्रवणंतथा ॥ ८ ॥ एवंकृतेनसंदेहोबहुपुत्रःप्रजायते ॥
रोगाःसर्वेक्षयंयांतिकाकवन्ध्याचपुत्रिणी ॥ ९ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादे
उत्तरानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ ॥
शिवउवाच ॥ ॥ स्वर्णकारोवसद्देविपुरेभोजकटेशुभे ॥ स्त्रीचतस्यमहादुष्टापरपुंसिरतास
दा ॥ १ ॥ तद्गृहेवैश्यएकोपिह्यागतोधनसंयुतः ॥ स्वर्णकारस्यवैश्यस्यदृढाप्रीतिरभूत्तयोः ॥
॥ २ ॥ व्यापारार्थंगृहीतंतुवैश्यस्वर्णंतदाप्रिये ॥ पलंशतमितंदेविविक्रयंचाकरोत्किल ॥ ३ ॥
स्वर्णकारस्ययापत्नीसुंदरीकुलटापरा ॥ प्रीत्यातदाभजत्पत्नीवैश्यायधनिकायवै ॥ ४ ॥ एवं

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

बहुगतेकालेवैश्यस्यमरणंभवेत् ॥ पश्चान्मृतस्तदासोपिस्वर्णकारोवरानने ॥ ५ ॥ उभौचनरके
यातौबहुकालंतुदोषतः ॥ युगमेकमितंदेविभुक्त्वानरकयातनाम् ॥ ६ ॥ नरकान्निःसृतौतौतुश्वा
नयोर्नितदागतौ ॥ पुनर्वृषभयोर्निचनरयोर्निततोगतौ ॥ ७ ॥ महाधनसमायुक्तोदेशेपुण्यतमे
शुभे ॥ पूर्वजन्मप्रसंगेनसवैश्यःपुत्रतांगतः ॥ ८ ॥ भार्यातस्यतुभोदेवियापुराव्यभिचारिणी ॥
पुत्रोत्पत्तिस्तदातस्यमरणंशीघ्रमाप्तवान् ॥ ९ ॥ शरीरेमहतीपीडासततंचिंतयायुतः ॥ अस्य
शांतिंप्रवक्ष्यामियथोक्तंशृणुवल्लभे ॥ १० ॥ गृहवित्ताष्टमंभागंपुण्यकार्येचकारयेत् ॥ जातवेदे
तिमंत्रेणपंचायुतजपंतथा ॥ ११ ॥ दशांशंहवनंकुर्यात्तर्पणंमार्जनंतथा ॥ पापशांत्यैचभोदेवि
भोजयेद्ब्राह्मणंशतम् ॥ १२ ॥ गोदानंचविशेषेणशय्यादानंतथाप्रिये ॥ प्रतिमांकारयेद्देविसुवर्ण
स्यतदाशुभे ॥ १३ ॥ एकादशपलेनैवरचितांवस्त्रभूषिताम् ॥ पूजयेद्विधिवद्देविमन्त्रेणानेनवै
शिवे ॥ १४ ॥ श्रीविष्णोपुण्डरीकाक्षभुवनानांचपालक ॥ चन्दनैःप्रतिमादेविपूजयामिगृहाण
भोः ॥ १५ ॥ ॐशंखायनमः ॥ ॐचक्रायनमः ॥ ॐगदायैनमः ॥ ॐशार्ङ्गायनमः ॥ ॐगरु
डायनमः ॥ ॐनन्दायनमः ॥ ॐसुनन्दायनमः ॥ ॐजयायनमः ॐविजयायनमः ॥ ॐकि
रीटिन्महादेवशंखचक्रगदाधर ॥ पापंमयाकृतंपूर्वंतत्क्षमस्वदयानिधे ॥ १६ ॥ ततःप्रदक्षिणां

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

कुर्यात्पत्न्यासहवरानने ॥ प्रतिमांपूजितांचैवब्राह्मणायसमर्पयेत् ॥ १७ ॥ एवंकृतेतदादेविपुत्रो
भवतिनान्यथा ॥ रोगाःसर्वेक्षयंयांतिनात्रकार्याविचारणा ॥ १८ ॥ इ० कर्म० सं० पार्वतीहरसं
वादेहस्तनक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामद्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥
॥ शिवउवाच ॥ वङ्गदेशेमहादेविकेशवंनामवैपुरम् ॥ खङ्गनामेतिविख्यातोनापितोवसतिप्रिये ॥
॥ १ ॥ महाधनसमायुक्तोभाग्यवान्देवपूजकः ॥ तस्यपत्नीविशालाक्षीलीलानाम्नीतिविश्रुता
॥ २ ॥ तस्यांपुत्रद्वयंजातंनापितस्यतदाप्रिये ॥ एकोद्यूतरतःपुत्रोद्वितीयश्चौरसंमतः ॥ ३ ॥
परस्त्रीलम्पटोदेविनापितस्यचवैसुतः ॥ ज्येष्ठपुत्रस्ययाभार्यापुंश्चलीचातिसुन्दरी ॥ ४ ॥ नापि
तंप्राभजत्सातुश्वशुरंखङ्गनामकम् ॥ एवंबहुगतेकालेतस्यमृत्युरभूत्तदा ॥ ५ ॥ तदापत्नीस
तीजातानापितस्यचिताग्निना ॥ सत्यलोकमभूद्देविभार्ययासहितस्यवै ॥ ६ ॥ युगमेकायुतंदे
विसत्यलोकेऽवसत्तदा ॥ ततःपुण्यक्षयेजातेपुनर्मानुष्यमाप्तवान् ॥ ७ ॥ धनधान्यसमायुक्तो
अपुत्रश्चसुशोभने ॥ पंचकन्याःप्रजायंतेव्याधिस्तस्यप्रजायते ॥ ८ ॥ अस्यशांतिंप्रवक्ष्यामि
पूर्वपापक्षयंयतः ॥ गृहवित्ताष्टमंभागंब्राह्मणायसमर्पयेत् ॥ ९ ॥ गायत्रीमूलमंत्रेणलक्षजाप्यंच
कारयेत् ॥ हवनंतद्दशांशेनतर्पणंमार्जनंतथा ॥ १० ॥ वाटिकाकूपमार्गंवैतडागंचैवकारयेत् ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तुलसीसेवनंनित्यमेकादशीव्रतंततः ॥ ११ ॥ वृंताकमूलिकाचैवनभोक्तव्यंकदाचन ॥ दशव
॥३९॥ र्णांततोदानंहरिवंशश्रवणंतथा ॥ १२ ॥ एवंकृतेनसन्देहःपुत्रोभवतितस्यवै ॥ कन्यकानैवजायं
तेवंध्यत्वंचप्रशाम्यति ॥ रोगाःसर्वेक्षयंयांतिकाकवंध्यालभेत्सुतम् ॥ १३ ॥ इति श्रीक०सं०
पार्वतीहरसंवादेहस्तनक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामत्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥
॥ शिवउवाच ॥ कौशिकीदक्षिणेकूलेकारुकोवसतिप्रिये ॥ विष्णुभक्तिरतोनित्यंकृषिकर्मसु
तत्परः ॥ १ ॥ धनंतुसंचितंदेविकार्पण्यात्पुण्यवर्जितः ॥ एकस्मिन्समयेरात्रौक्षेत्रेव्याघ्रेणवैह
तः ॥ २ ॥ यमदूतैर्महाघोरैरौरवेनरकेगतः ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकयातनाम् ॥
॥ ३ ॥ ततःकर्मवशाद्देविबिडालत्वंप्रजायते ॥ पुनःकुक्कुटयोनिर्वैशृगालत्वंततोभवत् ॥ ४ ॥
पुनर्मानुषयोनिंचमध्यदेशेवरानने ॥ पुत्रकन्याविहीनश्चअर्शोरोगेणपीडितः ॥ ५ ॥ अस्य
शांतिंप्रवक्ष्यामिपूर्वपापविशुद्धये ॥ सूर्यमाराधयेन्नित्यंव्रतंसूर्यस्यवासरे ॥ ६ ॥ गायत्रीमूल
मंत्रेणदशायुतजपंततः ॥ प्रयागेनियतःस्नानंमाघवैशाखकार्तिके ॥ ७ ॥ भूमिदानंततोदेवि ॥३९॥
वित्तशाठ्यंनकारयेत् ॥ गोमिथुनंततोदानंसर्वालंकारभूषितम् ॥ ८ ॥ कूष्माण्डंनारिकेरंच
पंचरत्नसमन्वितम् ॥ गंगामध्येप्रदातव्यंतुलसीपत्रसंयुतम् ॥ ९ ॥ माल्यंचकारयामासस्वर्ण

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

दशपलस्यवै ॥ विधिपूर्वंविशेषेणविविधंगंधचर्चितम् ॥ १० ॥ आचार्यायततोदद्यात्सर्वपापं विनाशयेत् ॥ पुत्रश्चजायतेदेविकन्यकानैवजायते ॥ ११ ॥ सर्वेरोगाःक्षयंयांतिवंध्यत्वंचप्रण श्यति ॥ काकवंध्यालभेत्पुत्रंमृतवत्साचपुत्रिणी अधनोधनमाप्नोतिनात्रकार्याविचारणा ॥ ॥ १२ ॥ इति श्रीकर्म०पार्व०हस्तनक्ष०तृतीयच०प्रा०नामचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ श्रीशिवउवाच ॥ हस्तिनानगरेदेविकायस्थोवसतिप्रिये ॥ कवलेतिसमाख्यातस्तस्यस्त्रीक मलाशुभे ॥ १ ॥ महाधनसमायुक्तोमद्यपानरतःसदा ॥ वेश्यासुरतसंतृप्तोब्राह्मणस्यविदूषकः ॥ ॥२॥ एकस्मिन्समयेदेविकश्चिद्विप्रःसमागतः ॥ गंगाजलसमायुक्तोयाचितंतेनभोजनम् ॥ ३ ॥ तच्छ्रुत्वादेहजक्रोधाद्ब्राह्मणंदुर्वचोवदत् ॥ संध्यासमयमासाद्यविषंपीत्वाद्विजोमृतः ॥ ४ ॥ ततोबहुगतेकालेमरणंतस्यचाभवत् ॥ तस्यपत्नीसतीजातातद्दिनेचवरानने ॥ ५ ॥ बहून्य ब्दसहस्राणिसत्यलोकेऽवसत्तदा ॥ सौख्यानिविविधान्यत्रप्रभुक्तानिवरानने ॥ ६ ॥ ततःपुण्य क्षयेजातेमानुषत्वंपुनर्भवेत् ॥ धनधान्यसमायुक्तोविप्रवंशेप्रजायते ॥ ७ ॥ जाताश्चबहवःपुत्रा गौरांगाःप्रियदर्शनाः ॥ गुणज्ञारूपसंपन्नाज्ञानिनःप्रीतिवर्द्धनाः ॥ ८ ॥ द्वौपुत्रौशीलशमनौचोद्वा हेनसमायुतौ ॥ पितुःकर्मवशाद्देविब्रह्महत्यापुरायतः ॥ ९ ॥ राजरोगसमायुक्तोजायागर्भोविन

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ १० ॥ विष्णोरष्टमंत्रेणलक्षजाप्यंचकारये
॥४०॥ त् ॥ दशांशंहवनंकुर्यात्तर्पणमार्जनंतथा ॥ ११ ॥ वित्तस्यचषडंशंचब्राह्मणेदानमाचरेत् ॥ वा
पीकूपतडागानिपाथिमध्येचकारयेत् ॥ १२ ॥ गामेकांकपिलांदद्यात्सवत्सांवस्त्रभूषिताम् ॥
सुवर्णस्यकृतांविप्रंपलपंचदशस्यतु ॥ १३ ॥ दद्याद्विप्रायविदुषेसर्वप्राणिरतायवै ॥ हरिवंशस्यश्र
वणंविधिपूर्वंचकारयेत् ॥ १४ ॥ पुत्रश्चजायतेदेविगर्भपातश्चशाम्यति ॥ काकवन्ध्यालभे
त्पुत्रंनिश्चयंनात्रसंशयः ॥ १५ ॥ पुत्राणांमरणंदेविपूर्वंपापप्रपंचतः ॥ प्रायश्चित्तंविनादेविकुतः
शांतिमवाप्नुयात् ॥ १६ ॥ इ०कर्म०पार्व०हस्तन०प्रा०पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥
॥श्रीशिवउवाच ॥ गयापुर्यांमहादेविक्षत्रोह्येकोऽवसत्पुरा ॥ कुकर्मणिरतोनित्यंधनाढ्यःकृपणः
शठः ॥१॥ तस्यभवच्चश्चलातस्यद्वौपुत्रौचवरानने ॥ कन्याचैकाविशालाक्षीजातातस्यांवरानने ॥
॥ २ ॥ उद्वाहितातदादेविकन्यकाव्यभिचारिणी ॥ महिषीपुत्रघातंचप्रत्यब्दंचैवकारयेत् ॥३॥
अनेनैवप्रकारेणवयःसर्वंक्षयंगतम् ॥ ततःसर्पेणवैदष्टस्तस्यमृत्युरभूत्तदा ॥ ४ ॥ यमदूतैर्महाघोरे
निःक्षिप्तोनरकार्णवे ॥ त्रिसप्ततिसहस्राणिवर्षाणिचवरानने॥५॥ भुक्त्वाकष्टंविशालाक्षिगर्भत्वंचत ॥४०॥
तोगतः॥मध्यदेशेविशालाक्षिनरजन्माचक्षत्रियः ॥ ६ ॥ पुत्रोनजायतेदेविपूर्वजन्मनिदोषतः ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

कन्यकारजसायुक्ताविधवाजायतेप्रिये ॥ ७ ॥ महिषीपुत्रघातीचरोगोत्पत्तिश्चजायते ॥ अस्यपा
पस्यशांत्यर्थंपुण्यंशृणुवरानने ॥ ८ ॥ स्ववित्तस्याष्टमंभागंब्राह्मणायददेत्ततः ॥ एकांकृष्णां
चगांदेविस्वर्णशृंगींसवत्सकाम् ॥ ९ ॥ सर्वलक्षणसंपन्नांवस्त्रमुक्तादिभूषिताम् ॥ ब्राह्मणायत
दादद्याच्छय्यादानंविशेषतः ॥ १० ॥ गायत्रीजातवेदाभ्यामयुतंजपमाचरेत् ॥ हवनंतद्दशां
शेनतर्पणंमार्जनंततः ॥ ११ ॥ पथिमध्येवरारोहेपंचवृक्षस्यवाटिकाम् ॥ कारयेद्वैभवे
नैवविष्णुवृक्षादिभिर्वृताम् ॥ १२ ॥ भोजयेद्देविषट्षष्टिंब्राह्मणान्वेदपारगान् ॥ निष्कत्रयसुव
र्णस्यप्रतिमांवस्त्रभूषिताम् ॥ १३ ॥ ब्राह्मणायततोदद्याद्विष्णुपादेनसंयुताम् ॥ एवंकृत्वावि
शालाक्षिपूर्वजन्मकृतंचयत् ॥ १४ ॥ पापंप्रणाशयेद्देविनात्रकार्याविचारणा ॥ काकवन्ध्या
चयानारीलभतेपुत्रमुत्तमम् ॥ १५ ॥ पुत्रश्चजायतेदेविसुरूपेणसमन्वितः ॥ रोगाःसर्वेक्षयंयांतिनात्र
कार्याविचारणा ॥ मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्तमम् ॥ १६ ॥ इति श्रीकर्मविपाकसंहितायांपा
र्वतीहरसंवादेचित्रानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामषट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥
शिवउवाच ॥ ॥ पुण्येनलभतेपुत्रंपुण्येनलभतेश्रियम् ॥ पुण्येनरोगनाशः स्यात्सर्वशास्त्रेषुसं
मतम् ॥ १ ॥ मध्यदेशेवरारोहेब्राह्मणोवसतिप्रिये ॥ सरय्वादक्षिणेकूलेशोभनेकालिकापुरे ॥ २ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तत्र कालीपुरे शुभ्रे द्विजस्तिष्ठति वै शठः ॥ स्नेहीवेश्यापरस्त्रीणांरतिसंसर्गतत्परः ॥ ३ ॥
मद्यपानंविनादेविनिद्रातस्यनजायते ॥ तस्यस्त्रीसुमनानाम्नीपतिसेवापरायणा ॥ ४ ॥ प्रत्य
हंपूजयद्देविस्वपतिंपापकारिणम् ॥ ततोबहुगतेकालेमरणंव्याघ्रतोभवत् ॥ ५ ॥ तस्यपत्नी
सतीजातासुप्त्वाग्नौचतदाहिता ॥ सत्यलोकेततोदेविकल्पमेकंप्रभुज्यते ॥ ६ ॥ पत्यासहवरारो
हेततः पुण्यक्षयेसति ॥ मृत्युलोकेऽभवज्जन्मकुलेमहतिपूजिते ॥ ७ ॥ धनधान्यसमायुक्तो
बाल्यतोरोगवानपि ॥ पुण्यसंबन्धयोगेनपूर्वस्त्रीयाचसंस्थिता ॥ ८ ॥ पुनर्विवाहितादेविपुत्रक
न्याविवर्जिता ॥ अस्यपापस्यशान्त्यर्थंपुण्यंशृणुवरानने ॥ ९ ॥ गृहवित्तषडंशस्यपुण्यकार्यं
चकारयेत् ॥ गायत्रीमूलमंत्रेण लक्षंजपमाचरेत् ॥ १० ॥ हवनंतद्दशांशेनतर्पणंमार्जनंतथा ॥
दशवर्णाततोदानंभूमिदानंविशेषतः ॥ ११ ॥ गोविन्देतिततोनामजपोनित्यंवरानने ॥ प्रातःस्नानं
सदाकुर्यान्माघवैशाखकार्तिके ॥ १२ ॥ कृष्णस्यशतकंदेविभूर्जपत्रेणपुस्तकम् ॥ समन्ताद्वा
च्यतदग्रेस्थापयेत्स्वगृहंप्रति ॥१३॥ हरिवंशश्रवणंदेविएकादश्यांव्रतंचरेत् ॥ एवंकृत्वावरारोहेस
र्वरोगक्षयोभवेत् ॥ पुत्रश्चजायतेदेविनात्रकार्याविचारणा ॥ १४ ॥ इति श्रीकर्मविपाक० पार्वती
हरसंवादेचित्रानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनं नामसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

श्रीशिवउवाच ॥ ॥ अयोध्यापुरतोदेवियोजनत्रयदक्षिणे ॥ सुधर्मपुरंविख्यातंवसन्तिबहवोज
नाः ॥ १ ॥ तत्रवैश्योवसत्येकः स्वकर्मनिरतः सदा ॥ धनाढ्योरूपसंपन्नोद्विजसेवासुतत्परः ॥
॥ २ ॥ रतिदासेतिविख्यातोविक्रयंकुरुतेसदा ॥ दलाक्षीतिसमाख्यातातस्यपत्नीचस्वैरिणी ॥
॥ ३ ॥ पतिंनपूजयेद्देविरूपगर्ववशात्तथा ॥ महिष्योबह्वयश्चसंतिगावोविक्रयकारणात् ॥
॥ ४ ॥ महिषीपुत्रघातश्चप्रत्यहंखलुजायते ॥ छागस्यविक्रयोनित्यंछागानांवधएवच ॥ ५ ॥
गोपएकोमहाप्राज्ञोधनार्थीस्वर्णसंयुतः ॥ तत्रयातोमहादेविवैश्यामित्रंहिबाल्यतः ॥ ६ ॥ तस्य
गेहेस्थितोगोपोधनधान्यसमन्वितः ॥ वैश्यपत्नीतदादेविगोपंप्रतिसदाभजत् ॥ ७ ॥ एवंबहुग
तेकालेतस्यगोपस्यवैमृतिः ॥ वैश्यगेहेमहादेविधनंगोपस्ययत्खलु ॥ ८ ॥ वैश्येनैवतुतत्सर्वं
धनंतस्यव्ययंकृतम् ॥ ततःसर्ववयोयातं वैश्यमृत्युरभूत्तदा ॥ ९ ॥ गंगायांचविशालाक्षिपत्नी
तस्यतथामृता ॥ वैश्यस्याभूत्तथास्वर्गोवर्षंषष्टिसहस्रकम् ॥ १० ॥ वैश्यपत्नीततोदेविकर्दमे
नरकेगता ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकयातनाम् ॥ ११ ॥ नरकान्निःसृतासातुसर्पयोनिं
तथागता ॥ सर्पयोनिंततोभुक्त्वागंगायांमरणंखलु ॥ १२ ॥ शूद्रंप्रतिसदास्नेहस्ततः शूद्रात
दाभवत् ॥ वैश्यः स्वर्गफलंभुक्त्वामानुषत्वंततोगमत् ॥ १३ ॥ धनधान्यसमायुक्तोरूपवान

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Adam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तायाश्रयः ॥ वन्दुयमांगुणाज्ञानांपुत्रकन्याविवर्जितः ॥ १४ ॥ वैश्यस्यशूद्रजातित्वंपूर्वस्नेह
फलंयतः ॥ पत्नीसाचसमायातापूर्वसंबन्धकारणात् ॥ १५ ॥ यतोद्रव्यंसमाभुक्तंसर्वंशूद्रस्यवै
शिवे ॥ ततश्चैवसमुत्पन्नाः कन्याबह्व्यः सुरेश्वरि ॥ १६ ॥ महिषीपुत्रघाताच्चवायुरोगादय
स्तथा ॥ स्वपतेर्वचनंकृत्वापरपुंसिरतायतः ॥ १७ ॥ तस्मात्पुत्रस्यमरणंगर्भपातः पुनःपु
नः ॥ अस्यशांतिमहंवक्ष्येशृणुदेविवरेनघे ॥ १८ ॥ गृहवित्तषडंशेनपुण्यंकार्यंचयत्नतः ॥ वा
पीकूपतडागादिपथिमध्येचकारयेत् ॥ १९ ॥ शिवस्यपूजनंचैवाशिवभक्तिमहर्निशम् ॥ नमः
शिवायमन्त्रंचपंचलक्षंचजापयेत् ॥ २० ॥ जपंकरोतिवैप्राज्ञो ह्यथवाकारयेत्ततः ॥ पार्थिवंल
क्षसंख्याकंपूजयेच्चयथाविधि ॥ २१ ॥ नमः शिवायमन्त्रस्तुसर्वपापप्रणाशनः ॥ देहांतेमुक्ति
दश्चैवमर्त्यलोकेचकामदः ॥ २२ ॥ हवनंकारयेद्देविकुंडेचैवप्रपूजयेत् ॥ चतुरस्त्रेविशालाक्षितिल
धान्यादितंडुलैः ॥ २३ ॥ ताम्रवर्णांततोदेविगांदद्याद्विदुषेप्रिये ॥ निष्कमात्रंततःस्वर्णं
ब्राह्मणायप्रदापयेत् ॥ २४ ॥ एवंकृतेनसंदेहोव्याधिनाशोभवेद्ध्रुवम् ॥ पुत्रश्चजायतेदेविपुन
र्गर्भोननश्यति ॥ २५ ॥ काकवन्ध्यापुनःपुत्रंप्रसूयेतनसंशयः॥ २६ ॥इतिश्रीकर्मविपाकसंहितायां
पार्वतीहरसंवादेचित्रानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ शिवउवाच ॥ ॥ देशेपुण्यतमेदेविप्रतिष्ठानपुरेतथा ॥ ब्राह्मणोवेदविभ्रष्टस्तत्रवासमकारय
त् ॥ १ ॥ सुरामांसस्यवैभोक्तानित्यंमत्स्यंभुनक्तिसः ॥ द्यूतेनैवविशालाक्षिव्ययंकुर्याद्दिनेदिने
॥ २ ॥ तस्यस्त्रीपरमानाम्नीभ्रष्टाचातीवसुन्दरी ॥ परपुंसिरतानित्यंनिर्भयापतिवंचका ॥ ३ ॥
एवंसर्ववयोयातंतयोर्मृत्युरभूत्किल ॥ पुण्यक्षेत्रेचगंगायां देवगंधर्वपूजिते ॥ ४ ॥ तस्यविप्रस्यवै
स्वर्गःकल्पमेकंवरानने ॥ भुक्त्वाचविविधंसौख्यंदिव्यकन्याभिरावृतः ॥ ५ ॥ ततःपुण्यक्षयेजा
तेमृत्युलोकेसुरेश्वरि ॥ महाढ्यकुलसम्पन्नेतस्यजन्माभवत्तदा ॥ ६ ॥ पुनःकर्मवशात्तस्यभा
र्यासाव्यभिचारिणी ॥ पुनर्विवाहितादेविपुत्रोप्यस्यांनजायते ॥ ७ ॥ मद्यपानादिकंपापंपूर्वज
न्मनियत्कृतम् ॥ तत्फलेनमहादेविव्याधिग्रस्तस्ततोऽभवत् ॥ ८ ॥ अथशान्तिंप्रवक्ष्यामियतः
पापक्षयोभवेत् ॥ गायत्रीमूलमन्त्रेणलक्षजाप्यंवरानने ॥ ९ ॥ हवनंतद्दशांशेनतर्पणंमार्जनंत
था ॥ देवस्याराधनंनित्यंसूर्यस्यव्रतमाचरेत् ॥ १० ॥ प्रयागेनियतःस्नानंमाघेमासियथाविधि ॥
पत्न्यासहविशालाक्षिततःपापंप्रणश्यति ॥ ११ ॥ षडंशंचततोदेविविप्रेभ्योदानमाचरेत् ॥
ततोवर्षेणमहतींगांचदद्यात्पयस्विनीम् ॥ १२ ॥ भूमिंवृत्तिकरींदद्यात्पुत्रपौत्रानुजीविनीम् ॥ ए
वंकृतेनसंदेहोवंशोभवतिनान्यथा ॥ १३ ॥ रोगार्तोमुच्यतेरोगात्काकवन्ध्यासुतंलभेत् ॥ गर्भ

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

अष्टालभेत्पुत्रंचिरंजीविनमुत्तमम् ॥ १४ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेचि
त्रानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥
॥ शिवउवाच ॥ ॥ कान्यकुब्जेमहादेविराजाप्येकोवसत्पुरा ॥ राजधर्मरतःशांतः प्रजापालन
तत्परः ॥ १ ॥ रुद्रधर्मेतिविख्यातोभार्यातस्यप्रभावती ॥ एकस्मिन्दिवसेदेविब्राह्मणोभयपी
डितः ॥ २ ॥ शरणंश्रावयामासशरणार्थीद्विजोत्तमः ॥ तस्यभार्यामहादेविसुरूपाप्यतिसुन्दरी ॥
॥ ३ ॥ राजपुत्रेणतस्यांतुगमनंमुग्धतःकृतम् ॥ शरणंदत्तवान्राजापुत्रस्नेहेनयन्त्रितः ॥ ४ ॥
एवंबहुगतेकालेनृपस्यमरणंयदा ॥ तदायमाज्ञयादूतैःक्षिप्तोनरककर्दमे ॥ ५ ॥ षष्टिवर्षसहस्रा
णिनरकेपरिपच्यते ॥ नरकात्ततोविनिष्क्रान्तःशूकरत्वंततोऽलभत् ॥ ६ ॥ पुनःशृगालयोनिं
चमानुषत्वंततोगमत् ॥ धनधान्यसमायुक्तोबहुज्ञोगुणवानपि ॥ ७ ॥ पुनर्विवाहिताजातापत्नी
तस्यप्रभावती ॥ पूर्वकर्मफलाद्देवितस्यपुत्रोनजायते ॥ ८ ॥ शरीरंसततंदेविज्वरेणैवप्रपीडित
म् ॥ वातपित्तकफानांचसंभवःस्याद्वयोगते ॥ ९ ॥ अस्यदानंशृणुत्वंहियथापापक्षयस्तथा ॥ ॥४३॥
गृहवित्ताष्टमंभागंपुण्यकार्येचकारयेत् ॥ १० ॥ वापीकूपतडागानांजीर्णोद्धारंयदाभवेत् ॥
तदापापंक्षयंयातिपूर्वजन्मसमुद्भवम् ॥ ११ ॥ विष्णोरराटमंत्रेणजपंकुर्याद्विचक्षणः ॥ दद्याद्गांवेद

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

विदुषेसवत्सांचैवशोभने ॥ १२ ॥ वस्त्ररत्नसमायुक्तांघण्टाचामरभूषिताम् ॥ चंद्रसूर्यग्रहेका
श्यांस्नानंदानंसमाचरेत् ॥ १३ ॥ निष्कत्रयसुवर्णस्यकमलंकारयेत्ततः ॥ ब्राह्मणायवरारोहेप्रद
द्यात्कमलंशुभम् ॥ १४ ॥ एवंकृतेवरारोहेसर्वपापक्षयोभवेत् ॥ अपिवंध्यालभेत्पुत्रंचिरंजीवि
नमुत्तमम् ॥ सर्वेरोगाःक्षयंयांतिनात्रकार्याविचारणा ॥ १५ ॥ ॥ इति श्रीकर्मविपाकसंहितायां
पार्वतीहरसंवादेस्वातीनक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामषष्टितमोऽध्यायः ॥ ६० ॥
॥ शिवउवाच ॥ ॥ गंगायांदक्षिणेकूलेविंध्येचनगरोत्तमे ॥ द्विजोप्येकोवसद्देविब्रह्मकर्मविवर्जि
तः ॥ १ ॥ अनाचाररतोनित्यंपरस्त्रीलम्पटःशठः ॥ व्यापारंकुरुतेनित्यंगोहिरण्यगजादिकम् ॥
॥ २ ॥ बहुद्रव्यंभवेत्तस्यत्रिंशत्कोटिप्रमाणकम् ॥ द्रव्यस्यसंग्रहंनित्यंनचाकिंचिद्ददातिसः ॥
॥ ३ ॥ स्वभार्यांचपरित्यज्यपरभार्यारतोद्विजः ॥ धनेश्वरइतिख्यातंतस्यनामपुराभवत् ॥ ४ ॥
ततोबहुगतेकालेतस्यमृत्युरभूत्किल ॥ यमकिंकरेणवैबद्धानिक्षिप्तोनरकार्णवे ॥ ५ ॥ महाघोरे
सुरश्रेष्ठकल्पमेकंतदावसत् ॥ पुनर्व्याघ्रस्ययोनिंचवृकयोनिंततोऽलभत् ॥ ६ ॥ पुनर्मानुषयो
निंचमृतवत्सत्वमाप्तवान् ॥ महारोगसमायुक्तोनसुखंलभतेक्वचित् ॥ ७ ॥ अस्यशान्तिप्रवक्ष्या
मिश्रृणुदेविवरानने ॥ गायत्रीमूलमंत्रेणदशलक्षजपंयदा ॥ ८ ॥ दशांशंहवनंचैवतदापापक्षयो

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

भवेत् ॥ गोविन्दस्यसदाध्यानंसदागोविंदकीर्तनम् ॥ ९ ॥ नित्यंप्रपूजयेद्देवंशंखचक्रगदाधर
म् ॥ पीताम्बरधरंश्यामंश्रीवत्सेनविराजितम् ॥ १० ॥ प्रत्यब्दंकार्तिकेमासितुलसींविष्णुरू
पिणीम् ॥ पूजयेद्दीपदानंचदद्याद्भार्यासमन्वितः ॥ ११ ॥ गोदानंशास्त्ररीत्याचततोदद्याद्वसुं
धराम् ॥ यथाशक्त्याचभोदेविब्राह्मणायशिवात्मने ॥१२॥ एवंकृतेनसंदेहः पूर्वजन्मकृतंचयत् ॥
तत्पापंनाशमायातिसर्वरोगक्षयोभवेत् ॥ १३ ॥ वन्ध्यत्वंप्रशमंयातिपुत्रलाभोभवेद्ध्रुवम् ॥
काकवन्ध्यालभेत्पुत्रंनात्रकार्याविचारणा ॥ १४ ॥ ॥ इति श्रीकर्मविपाकसंहितायांपार्व
तीहरसंवादेस्वातीनक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥
॥ श्रीशिवउवाच॥कुरुक्षेत्रेमहातीर्थेबहुवोवसातिप्रिये ॥ कृषिकर्मरतोनित्यंक्रयविक्रयतत्परः ॥
॥ १ ॥ महिषीगोवृषाणांचसंग्रहंकुरुतेबहु ॥ तस्यभार्यावरारोहेपरपुंसिरतासदा ॥ २ ॥ स्व
पतिंतर्जयेन्नित्यंसदानिष्ठुरभाषणात् ॥ संग्रहोबहुद्रव्याणांनदानंदत्तवान्कचित् ॥ ३ ॥ एक
स्मिन्दिवसेदेविचंद्रपर्वणिशोभने ॥ दशवर्णातदादानंकृतंक्षेत्रेतदाकिल ॥ ४ ॥ ततोबहुगते ॥४४॥
कालेतस्यमृत्युरभूत्किल ॥ यमदूतेनभोदेविनिःक्षिप्तोनरकेकिल ॥ ५ ॥ त्रिंशद्वर्षसहस्राणि
भुक्त्वानरकयातनाम् ॥ पुनर्माहिषयोनिश्चजातःखलुवरानने ॥ ६ ॥ नरयोनिंपुनर्लेभेधन

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

धान्यसमन्वितः ॥ जातःखलुवरारोहेपुत्रकन्याविवर्जितः ॥ ७ ॥ रोगवान्नात्रसंदेहोजंघेपीडात तोधिका ॥ अस्यशांतिंप्रवक्ष्यामिशृणुत्वंचयथातथा ॥ ८ ॥ षडंशंचततोदानंविप्रायविदुषेत था ॥ गायत्रीलक्षजाप्यंचततोहोमंप्रकल्पयेत् ॥ ९ ॥ दशांशंतर्पणंकुर्यात्तद्दशांशंचमार्जनम् ॥ गामेकांकपिलांदद्यात्स्वर्णशृङ्गींसहाम्बराम् ॥ १० ॥ ब्राह्मणान्पंचपंचाशत्पक्वान्नेनप्रभो जयेत् ॥ पंचपात्राणिदद्याद्वैशय्यादानंयथाविधि ॥ ११ ॥ दशवर्णाप्रदातव्याब्राह्मणेभ्योय थाविधि ॥ एवंकृतेनसंदेहोशीघ्रंपुत्रःप्रजायते ॥ १२ ॥ रोगाःसर्वेक्षयंयांतिनात्रकार्याविचारणा ॥ इति श्रीकर्म०पार्व०स्वातीनक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामद्विषष्टितमोऽध्यायः ॥ ६२ ॥

॥ श्रीशिवउवाच ॥ हस्तिनाख्यंचनगरंख्यातंचैवमनोहरम् ॥ अवसंस्तत्रभोदेविनराः सर्वेविचक्ष णाः ॥ १ ॥ तन्मध्येशूद्रएकोहिधर्मात्माज्ञानवानपि ॥ स्वधर्मकर्मणाकृत्वाव्ययंकुर्याद्दिनेदिने ॥ ॥ २ ॥ तस्यपुत्रद्वयंजातंद्वौचपापरतौशठौ ॥ प्रत्यहंजीवघातेनमद्यवेश्यारतौचतौ ॥ ३ ॥ द्यूतेनैवमहादेविरात्रावह्निचजक्षतः ॥ नचवारयितुंशक्तौशूद्रेणतुतदाशिवे ॥ ४ ॥ ततस्तु दैवयोगेनप्रयागेशूद्रआगतः ॥ मासमेकंततः स्थित्वातस्यमृत्युरभूत्किल ॥ ५ ॥ विष्णुदास स्ततोलब्ध्वायज्ञलोकंवरानने ॥ विमानंवरमारूढोजज्ञेसहवरानने ॥ ६ ॥ तस्यभार्याविशा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

लाक्षिमर्त्यंलोकेसुरेश्वरि ॥ साभवेद्विधवानारीकिंचित्कालेगतेसति ॥ ७ ॥ परपुंसिरताजारे
प्रत्यहंव्यभिचारिणी ॥ ततोबहुगतेकालेतस्यामृत्युरभूत्किल ॥ ८ ॥ यमदूतैर्महाघोरै रौरवेः
क्षिप्तातत्क्षणादपि ॥ विंशत्यब्दसहस्राणिनरकेपरिभुज्यते ॥ ९ ॥ शूद्रः पुण्यक्षयेजातेमृत्यु
लोकेसुरेश्वरि ॥ जन्मतस्यभवेद्देविमध्यदेशेसुरेश्वरि ॥ १० ॥ तदासातुभवेन्नारीयापुराव्य
भिचारिणी ॥ पूर्वजन्मप्रसंगाच्चवंशच्छेदोहिजायते ॥ ११ ॥ रोगश्चजायतेताभ्यांकष्टंचैवदि
नेदिने ॥ अस्यपापस्यवैशांतिंतत्समासेनमेशृणु ॥ १२ ॥ स्वर्णवृक्षंवरंकृत्वास्वांगुष्ठपरिमाण
कम् ॥ फलपुष्पसमायुक्तंपलपंचदशस्यतु ॥ १३ ॥ तस्यवृक्षस्यवैमूलेशालिग्रामशिलांशुभाम् ॥
पूजयित्वाविधानेनविष्णुरूपंवरानने ॥ १४ ॥ ब्राह्मणायततोदद्याद्गांचदद्यात्पयस्विनीम् ॥
गायत्रीमंत्रजाप्यंतुलक्षमेकंतुकारयेत् ॥ १५ ॥ ततःपापविशुद्धिःस्यात्पुत्रोभवतिनान्यथा ॥
सर्वेरोगाःक्षयंयांतिकाकवन्ध्यालभेत्सुतम् ॥ १६ ॥ इतिश्रीकर्मविपाकसंहितायांपार्वती
हरसंवादेस्वातीनक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥४५॥
॥ श्रीशिवउवाच ॥ कांपिल्यनगरेदेविक्षत्रीवसातिवैपुरा ॥ क्षत्रधर्मविहीनश्चवैश्यकर्मरतःसदा ॥
॥ १ ॥ प्रत्यहं वैश्यकर्मणव्ययंकुर्याद्दिनेदिने ॥ तिलवर्मेतिविख्यातः पत्नीतस्यचानिष्ठुरा ॥ २ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

बहुद्रव्यंतदातेनसंचितंतिलवर्मणा ॥ महालोभेनसंयुक्तोधर्मंचचानकुत्रचित् ॥ ३ ॥
पत्नीपुत्रैः कठोरत्वाद्दत्तंतस्मैनदीयते ॥ एवंबहुतिथेकालेमरणंसर्पतस्तदा ॥ ४ ॥ कुम्भीपा
केमहाघोरेयमदूतैस्तदाशिवे ॥ निःक्षिप्तःशृंखलैर्बद्धामहतीयातनाततः ॥ ५ ॥ युगमेकंव
रारोहेकष्टंभुक्त्वासुदारुणम् ॥ ततोऽभूत्सततोदेविमाहिषोवृषभोहयः ॥ ६ ॥ पुनश्चमानुषोभूत्वा
तस्यभार्याचयापुरा ॥ विवाहिताचसादेवितस्यांपुत्रोनजायते ॥ ७ ॥ पुराह्येकाभवत्कन्यापु
नः सूतिविवर्जिता ॥ रोगोभवतिदेहेचमध्येमध्येज्वरोभवत् ॥ ८ ॥ अस्यशांतिंप्रवक्ष्यामि
शृणुदेविवरानने ॥ कल्पवृक्षवरंकुर्यात्स्वांगुष्ठपरिमाणकम् ॥ ९ ॥ सुवर्णस्यमहादेविपलपंचद
शस्यतु ॥ रौप्यस्यतुकृतावेदीपलपंचदशस्यतु ॥ १० ॥ तत्रवृक्षंसमारोप्यफलपुष्पेणसंयुतम् ॥
अष्टम्यांचचतुर्दश्यांनवम्यांचसुरेश्वरि ॥ ११ ॥ तस्यवृक्षस्यवैमूलेवृषकेतुंसुरेश्वरि ॥ स
गणंदेवमीशानमर्चयित्वायथाविधि ॥ १२ ॥ यथाशक्तिवरारोहेगन्धधूपादिभिस्तथा ॥ साष्टां
गंदण्डवत्तत्रदेवदेवंक्षमापयेत् ॥ १३ ॥ मंत्रेणानेनभोदेविविसर्जनमथाचरेत् ॥ ॐनमः शिवा
यदेवायशिवायैसततंनमः ॥ १४ ॥ ममपूर्वकृतंपापंजन्मजन्मसमुद्भवम् ॥ तत्सर्वंक्षम्यतां देव
देव्यासहमहेश्वर ॥ १५ ॥ ततोवैपूजयेद्विप्रं वेदब्रह्मस्वरूपिणम् ॥ पटवस्त्राद्यलंकारैर्विविधै

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

मोदकैरपि ॥ १६ ॥ ततोवृक्षंसवेदिंचकापिलांगांसवत्सकाम् ॥ ब्राह्मणायततोदद्यात्पूर्वपाप
विशुद्धये ॥ १७ ॥ व्रतंममहादेविशिवरात्रिंविशेषतः ॥ आजन्ममरणाद्देविव्रतंकुर्यात्प्रयत्नतः
॥ १८ ॥ एवंकृतेमहादेविशीघ्रंपुत्रः प्रजायते ॥ रोगाःसर्वेक्षयंयांतिवन्ध्याचलभतेसुतम् ॥ मृतव
त्साल्लभेत्पुत्रंचिरंजीविनमुत्तमम् ॥१९॥ इ०क०पा०विशाखाप्रथ०चतुःषष्टितमोऽध्यायः॥६४॥
॥ श्रीशिवउवाच ॥ विष्णुकांच्यांमहादेविब्राह्मणोवेदपारगः ॥ अत्याचाररतःशांतोविष्णुभक्ति
परायणः ॥ १ ॥ लांछितोविष्णुचक्रेणसविप्रोवैवरानने ॥ नवेदः पाठ्यतेतेननविप्रंस्पृशते
क्वचित् ॥ २ ॥ द्विजानांस्मार्त्तवृत्तीनांविद्वेषंचकरोतिसः ॥ शिवभक्तिरतानांचनाभिवादनमा
चरेत् ॥ ३ ॥ एवंवयोगतंदेविवृद्धेजातेवरानने ॥ मरणंतस्यवैजातंब्राह्मणस्यवरानने ॥ ४ ॥
यमदूतैर्महाघोरेनरकेपातितस्तदा ॥ रौरवेचतदादेविषष्टिवर्षसहस्रकम् ॥ ५ ॥ भुक्त्वानरक
कष्टंचपुनर्जातःसरीसृपः ॥ मानुषत्वंपुनर्जातंकष्टानिविविधानिच ॥ ६ ॥ पुत्रस्यमरणंका
न्तेप्रतिवर्षेऽभवत्सुतः ॥ पुनः स्त्रीकाकवन्ध्याभूत्पूर्वजन्मप्रसंगतः ॥ ७ ॥ धनधान्यसमायु
क्तंमानुषंलभ्यतेक्वचित् ॥ अथवक्ष्येमहादेविपूर्वपापस्यनिष्कृतिम् ॥ ८ ॥ अष्टांशंयद्गृहेदेवि
ब्राह्मणायसमर्पयेत् ॥ ९ ॥ गायत्रीजातवेदाभ्यांदशायुतजपंततः ॥ कूष्मांडंनारिकेरंचपंचर

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

त्नसमन्वितम् ॥ १० ॥ गंगामध्येप्रदातव्यंपूर्वपापविशुद्धये ॥ निष्कत्रयसुवर्णस्यकमलंनिर्मितंशुभम् ॥ ११ ॥ दद्याद्वेदविदेदेविब्राह्मणायशुभार्थिने ॥ एवंकृतेभवेद्देविपूर्वपापविशुद्धता ॥ पुत्रंचैवलभेद्देविचिरंजीविनमुत्तमम् ॥ १२ ॥ व्याधयः प्रशमंयांतिज्वराः सर्वेतथाविधाः ॥ काकवन्ध्यालभेत्पुत्रंचिरंजीविनमुत्तमम् ॥ १३ ॥ इति श्रीकर्मविपाकसंहितायां पार्वतीहरसंवादेविशाखानक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामपंचषष्टितमोऽध्यायः ॥ ६५ ॥

॥ श्रीशिवउवाच ॥ विदर्भनगरेदेविक्षत्रीह्येकोऽवसत्पुरा ॥ तेजःशर्मेतिविख्यातोद्विजानांवृत्तिहारकः ॥१॥ प्रजानांदुःखदोनित्यंवेदानांचैवनिन्दकः ॥ तस्यत्रासवशात्सर्वाःप्रजाग्रामात्पलायिताः ॥ २ ॥ एवंबहुगतेकालेतस्यमृत्युरभूत्किल ॥ यमदूतैर्महाघोरैर्निक्षिप्तोनरकेततः ॥ ३ ॥ द्विसप्ततिसहस्राणिघोरेनरककर्दमे ॥ भुक्तंनरककष्टंचसूचीमुखमथावृतम् ॥ ४ ॥ नरकान्निर्गतोदेविगर्दभत्वंततोभवत् ॥ रासभत्वंततोदेविमानुषत्वंततोभवत् ॥ ५ ॥ तस्यभार्याभवद्वन्ध्यापूर्वजन्मफलाद्यतः ॥ तस्यगात्रेभवद्रोगोदद्रुरर्शादयस्तथा ॥ ६ ॥ नसुखंलभतेदेविचिंतयाव्याकुलेन्द्रियः ॥ शृणुसर्ववरारोहेपूर्वपापस्यनिग्रहम् ॥ ७ ॥ दशांशंयद्गृहेदेविब्राह्मणायसंमर्पयेत् ॥ वापीकूपतडागादिपथिमध्येचकारयेत् ॥ ८ ॥ गृहदानंततोदेविसर्ववस्तुसमन्वित

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

म् ॥ प्रदद्याद्वेदविदुषेब्राह्मणायवरायच ॥ ९ ॥ आकृष्णेतिजपं दौवलक्षमेकंचकारयेत् ॥ होमंवै कारयामासतिलाज्यमधुतंडुलैः ॥ १० ॥ ततोगांकपिलां देविब्राह्मणायप्रपूजिताम् ॥ प्रदद्या द्विधिवच्चैवसर्वालंकारभूषिताम् ॥ ११ ॥ सुवर्णनिष्कमात्रंतुब्राह्मणायततोददेत् ॥ एवंकृते वरारोहेरोगनाशोभवेद्ध्रुवम् ॥ १२ ॥ पुत्रश्चजायतेदेविवंध्यत्वंचप्रशाम्यति ॥ काकवंध्यालभेत्पु त्रंनात्रकार्याविचारणा ॥ १३ ॥ इ० कर्म० पार्व० विशा० तृती० षट्षष्टितमोऽध्यायः ॥ ६६ ॥

॥ श्रीशिवउवाच ॥ मायापुर्यांमहादेविक्षत्रीह्येकःसतिष्ठति ॥ सशूरश्चधनीमानीदेवतातिथिपूज कः ॥ १ ॥ तस्यभार्याविशालाक्षिशतानाम्नीवराङ्गना ॥ ब्राह्मणातिथिदेवानांपूजनेवापित त्परा ॥ २ ॥ एकस्मिन्समयेदेविहेमकारस्तदागतः ॥ सचाढ्यःस्वर्णसंयुक्तोहेमकारस्तदाव सत् ॥ ३ ॥ क्षत्रियायस्वमित्रायशतंस्वर्णस्यवैपलम् ॥ प्रदत्तंहेमकारेणचान्यत्स्वर्णसमार्पितम् ॥ ॥ ४ ॥ अत्रांतरेमहादेविस्वर्णकारस्ततोमृतः ॥ दष्टःसर्पेणतीव्रेणस्वर्णकारमपुत्रिणम् ॥ ५ ॥ स्वर्णसर्वंगृहीत्वातुप्रभुक्तंक्षत्रियेणतत् ॥ पुत्रदारेणसंयुक्तंकिंचिद्दानेनकल्पितम् ॥ ६ ॥ ततोबहु गतेकालेतस्यमृत्युरभूत्किल ॥ क्षत्रियस्यमहादेविसुरलोकस्ततोऽभवत् ॥ ७ ॥ सौख्यंसुरां गनासार्द्धंषष्टिवर्षप्रमाणकम् ॥ ततः पुण्यक्षयेजातेमर्त्योभवतिभामिनि ॥ ८ ॥ धनधान्यस

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

मायुक्तोभार्याभवतियापुरा ॥ नचैवकन्यकापुत्रस्तस्यसुंदर्यभूत्तदा ॥ ९ ॥ गर्भंचजायतेदेवि तद्गर्भपतनंभवत् ॥ रोगमुग्रंभवेद्देविनसुखंजायतेखलु ॥ १० ॥ शांतिंशृणुवरारोहेयतःपापक्षयो भवेत् ॥ षडंशंचततोदेविब्राह्मणायसमर्पयेत् ॥ ११ ॥ दशवर्णांततोदद्याद्विप्रायश्रोत्रिणेप्रिये ॥ गायत्रीमूलमंत्रेणलक्षजाप्यंचकारयेत् ॥ १२ ॥ पक्वान्नेनैवभोदेविब्राह्मणान्भोजयेच्छतम् ॥ वृक्षं स्वर्णस्यवैदेविफलपुष्पसमन्वितम् ॥ १३ ॥ दद्याद्विप्रायविदुषेफलंदशप्रमाणकम् ॥ सूर्यस्य पूजनंदेविरविवारेविशेषतः ॥ १४ ॥ एवंकृतेवरारोहेशीघ्रंपुत्रश्चजायते ॥ ज्वरस्यचैभवेन्मुक्तिः काकवन्ध्यासुतंलभेत्॥मृतवत्सालभेत्पुत्रंचिरजीविनमुत्तमम् ॥१५॥ इतिश्रीकर्मविपाकसंहितायां पार्वतीहरसंवादेविशाखानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥

॥ श्रीशिवउवाच ॥ कल्याणनगरेदेविमायापुर्याःसमीपतः॥ तिष्ठतिवणिग्जनोप्येकोधनाढ्योधनग र्वितः ॥ १ ॥ क्रयंचकुरुतेनित्यंविक्रयंचसदाकरोत् ॥ महालोभवशाद्देविनदानंकुरुतेक्वचित् ॥ २ ॥ तस्यभार्याविशालाक्षिपुंश्चलीकुलटाधमा ॥ पुत्रद्वयंवरारोहेपुंश्चल्यांसमभूत्तदा ॥ ३ ॥ एकोद्यूतरतःपुत्रोद्वितीयोब्राह्मणीरतः ॥ वैश्येनैवविशालाक्षिधनंचबहुसंचितम् ॥ ४ ॥ प्रत्य हंभुज्यतेछागंविक्रयंकुरुतेसदा ॥ वृद्धेसतिमहादेविवैश्यस्यमरणंह्यभूत् ॥ ५ ॥ यमदूतैस्तदा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

बद्धानिःक्षिप्तोनरकार्णवे ॥ स्वरूपंदर्शयामासतस्मैवैश्यायभोःशिवे ॥ ६ ॥ नवत्यब्दसहस्राणि घोरेनरकदारुणे ॥ महाकष्टंतदाप्राप्तःकृमिभिर्घोररूपिभिः ॥ ७ ॥ ततोव्याघ्रस्यवैयोनिंका ककुक्कुटयोः पुनः ॥ मानुषत्वंपुनर्यातः पुत्रकन्याविवर्जितः ॥ ८ ॥ पुनर्विवाहितासातुयाप त्नीपूर्वजन्मनि ॥ रोगवत्यभवत्सोग्रामृतवत्सापुनःपुनः ॥ ९ ॥ एकापत्यातदाजातापुनः पु त्रोनजायते ॥ यदासर्वस्वदानंवैसूर्यस्याराधनंयदा ॥ १० ॥ हरिवंशश्रवणं देविदुर्गास्तोत्रजपं तथा ॥ गायत्रीमूलमंत्रेणलक्षजाप्यंयदाभवेत् ॥ तदापुत्रोभवेद्देविव्याधिनाशश्चजायते ॥ ११ ॥ इति क०सं०पार्व०सं०अनुराधान०प्रथमचरणप्रायश्चित्तकथनंनामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥

॥ श्रीशिवउवाच ॥ मागधेवैशुभेदेशे काष्ठकारोवसत्प्रिये ॥ पुत्रपौत्रसमायुक्तोधनाढ्योगुणवान पि ॥ १ ॥ यदाचार्धवयोजातंदरिद्रत्वंतदाभवत् ॥ गृहीतंचयतेर्द्रव्यंशतंपंचपलंतथा ॥ २ ॥ व्ययंकृत्वातदातेननदत्तंयतयेशिवे ॥ ततस्तस्यभवेन्मृत्युः काष्ठकारस्यमागधे ॥ ३ ॥ ददौ वैकपिलांकृष्णांस्वर्णरौप्याविभूषिताम् ॥ पुत्रेणापिकृतंश्राद्धंशास्त्ररीत्यागयादिकम् ॥ ४ ॥ यक्षलोकेतदायातोवर्षशतसहस्रकम् ॥ पुनः पुण्यक्षयेजातकपियोनिंततोलभत् ॥ ५ ॥ ऋ क्षस्यैवपुनर्योनिंमानुषत्वंततोगमत् ॥ धनधान्यसमायुक्तोगुणज्ञोप्यतिसुन्दरः ॥ ६ ॥ पूर्वज

CC-0. All India Ayurvedic Congress (A.I.A.C). Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

न्मनिभोदेविकाष्ठच्छेदः कृतः सदा ॥ तेनपापेनभोदेविशरीरेमहतीव्यथा ॥ ७ ॥ यतेद्रव्यंगृ
हीतंचनदत्तंयतयेयतः ॥ तेनजातः सुतोदेविऋणसंबन्धकारणात् ॥ ८ ॥ द्यूतवेश्यारतोनि
त्यंपितृमात्रोर्विरोधकृत् ॥ युवरूपोयदाजातस्तदामृत्युश्चजायते ॥ ९ ॥ पुनःपुत्रस्यसंदेहः
काकवन्ध्यात्वमाप्नुयात् ॥ पत्नीतस्यवरारोहेमृतवत्सापुनःपुनः ॥ १० ॥ अस्यशांतिमहं
वक्ष्येशृणुदेविप्रयत्नतः ॥ गृहवित्ताष्टमंभागंपुण्यकार्येचकारयेत् ॥ ११ ॥ सूर्यमंत्रस्यवैजाप्यं
वैदिकस्यवरानने ॥ आकृष्णेतिमहामंत्रः सर्वव्याधिविनाशनः ॥ १२ ॥ सर्वकामप्रदोदेविमो
क्षदोमुक्तिकारणम् ॥ सूर्यदेवस्ययोभक्तिंकुरुतेनियतोनरः ॥ १३ ॥ नकिंचिद्दुर्लभस्तस्यपुत्र
तोधनतोपिवा ॥ ममातीवप्रियोनित्यंसूर्यदेवउपासिते ॥ १४ ॥ मद्गुणास्तंहिरक्षंतियतोममक
लारविः ॥ कमलंसूज्ज्वलंदेविवंशपात्रंसुशोभनम् ॥ १५ ॥ तस्योपरिसुवर्णस्यसूर्यरत्नविभू
षितम् ॥ पलपंचमितं देविमंत्रेणानेनपूजयेत् ॥१६॥ ॐनमःसूर्यायदेवायभद्रायभद्ररूपिणे ॥
पूर्वजन्मकृतंसर्वंममपापंव्यपोहतु ॥ १७ ॥ प्रतिमांपात्रसंयुक्तांब्राह्मणायचदापयेत् ॥ ततोगां
कपिलांशुभ्रांसवत्सांस्वर्णभूषिताम् ॥ १८ ॥ ब्राह्मणायततोदद्यात्पट्टवस्त्रेणछादिताम् ॥ रवि
सप्तमीव्रतंकुर्यात्पत्न्यासहवरानने ॥ १९ ॥ पूर्वजन्मकृतंपापंनश्यत्येवंकृतेप्रिये ॥ रोगाःसर्वे

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

क्षयंयांतिपुत्रलाभोभवेद्ध्रुवम् ॥ काकवन्ध्यांलभेत्पुत्रंमृतवत्साचपुत्रिणी ॥ २० ॥ इति श्रीक० पार्वतीहरसंवादेअनुराधान० द्वितीयचरणप्रायश्चित्तकथनंनामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

॥ श्रीशिवउवाच ॥ ॥ सौराष्ट्रदेशेविख्यातंसुकर्माख्यंपुरंमहत् ॥ तत्रतिष्ठतिवैविप्रोब्रह्मकर्मविवर्जितः ॥ १ ॥ विक्रयंकुरुतेनित्यंगजवाजिरथादिकम् ॥ राजमृत्युंसमासाद्यग्रामदाहस्तथाकृतः ॥ २ ॥ ब्राह्मणाबहवस्तत्रब्राह्मण्यश्चतथाशिवे ॥ मृताग्रामस्यवैदाहेबह्वयोगावोमृताःखलु ॥ ३ ॥ ततोबहुतिथेकालेमृतःसोपिद्विजाधमः ॥ ततस्तुयमदूतेननरकेघोरकर्दमे ॥ ४ ॥ यमाज्ञयाचनिक्षिप्तः कष्टंभुक्तंमुहुर्मुहुः ॥ नरकान्निर्गतोदेविगजयोनिंततोलभत् ॥ ५ ॥ कच्छपत्वंततोयातः काकयोनिस्ततोभवत् ॥ मानुषत्वंततोयातः कुलेमहतिशोभने ॥ ६ ॥ सर्वसम्पत्तिसंयुक्तोवंशस्तस्यनजायते ॥ बहुकन्यासमायुक्तोरोगयुक्तोभवेन्नरः ॥ ७ ॥ भार्यातस्यज्वरग्रस्तामासेवर्षेऽभवज्ज्वरः ॥ अतःशान्तिंप्रवक्ष्यामियतःखलुसुखीभवेत् ॥ ८ ॥ चतुर्भागंगृहद्रव्यंब्राह्मणायसमर्पयेत् ॥ प्रयागेमकरेमासिपत्न्यासहवरानने ॥ ९ ॥ स्नानंतुनियतःकुर्यात्सप्ताहंचततःशिवे ॥ हेमदानंततः कुर्याद्भूमिदानंचपार्वति ॥ १० ॥ गायत्रीजातवेदाभ्यांत्र्यम्बकेणतदाजपेत् ॥ दशायुतप्रमाणेनहवनंमार्जनंतथा ॥ ११ ॥ ब्राह्मणान्भोजयेद्भक्त्यापू

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

क्वान्नैःपायसेनच ॥ विप्रेभ्योदक्षिणांदद्याद्वस्त्ररत्नविभूषिताम् ॥ १२ ॥ दशवर्णांततोदद्याद्धरिवं
शश्रवणंततः ॥ एवंकृतेवरारोहेशीघ्रंपुत्रमवाप्नुयात् ॥ १३ ॥ काकवन्ध्यालभेत्पुत्रंपुनर्देविन
संशयः ॥ रोगाःसर्वेक्षयंयान्तिमृतवत्सालभेत्सुतम् ॥ १४ ॥ इति श्रीकर्मविपाकसंहितायांपा
र्वतीहरसंवादेअनुराधानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामसप्ततितमोऽध्यायः ॥ ७० ॥
॥ शिवउवाच ॥ ॥ बन्दीजनोवसत्येकःसौराष्ट्रविषयेशुभे ॥ सकविर्भाग्यवान्देविस्वधर्मनिर
तःसदा ॥ १ ॥ तस्यस्त्रीसुन्दरीदेविपातिसेवासुतत्परा ॥ एकस्मिन्दिवसेदेविब्रह्मचारीसमागतः ॥
॥ २ ॥ आतिथ्यकरणेतस्यचासमर्थस्तदाशिवे ॥ उपोषणंकृतंतेनद्वारेबन्दिजनस्यच ॥ ३ ॥
प्रभातेसवरारोहेशापंदत्त्वागतस्तुवै ॥ ततस्तुदैवयोगेनमार्जारीतत्रसूतिका ॥ ४ ॥ पंचपुत्राव
रारोहेघातितातेनभामिनी ॥ मार्जारीचतदादेविक्षुधार्ताचतदातथा ॥ ५ ॥ ततोबहुतिथेकाले
तस्यमृत्युरभूत्पुरा ॥ पत्नीपातिव्रतातस्यसतीजाताचतत्क्षणात् ॥ ६ ॥ सत्यलोकेवरारोहेयुग
मेकसुवाससः ॥ पत्न्यासहवरारोहेसौख्यंहिमनसेप्सितम् ॥ ७ ॥ भुक्तंदेवाङ्गनासार्द्धंपुनःपुण्य
क्षयेसति ॥ मानुषत्वंततोलेभेसहपत्न्यावरानने ॥ ८ ॥ धनधान्यसमायुक्तोवराभार्याविवाहिता ॥
पुत्राश्चबहवोजातास्तेषांमृत्युरभूत्किल ॥ ९ ॥ सान्वरेणसमाविन्नामध्येतापयुतापुनः ॥ त

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

स्यपापस्यवैशांतिंशृणुत्वंगिरिजेवरे ॥ १० ॥ जातवेदस्यमंत्रेणलक्षजाप्यंचकारयेत् ॥ बिडाल
प्रतिमांकृत्वापंचबालेनसंयुताम् ॥ ११ ॥ स्वर्णरौप्यस्यवादेविपलपंचदशस्यतु ॥ सवस्त्रांवैत
दादद्याद्ब्राह्मणायवरानने ॥ १२ ॥ गामेकांरक्तवर्णांचतांविप्रायप्रदापयेत् ॥ अमायांपिंडदानंच
सोमवारेतथागुरौ ॥ १३ ॥ व्रतंचरविसप्तम्यांक्रियतेभार्ययासह ॥ ततःपुत्रोभवेद्देविचिरंजीवीत
थोत्तमः ॥ व्याधिनाशोभवेद्देविवन्ध्यात्वंचप्रशाम्यति ॥ १४ ॥ इति श्रीकर्मविपाकसंहितायां
पार्वतीहरसंवादेअनुराधानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥
॥ श्रीशिवउवाच ॥ ब्राह्मणोवसतिह्येकोमहाराष्ट्रपुरेशुभे ॥ सवेदपाठनिरतोवेदपाठंसदाकरो
त् ॥ १ ॥ तडागंखानयामासतत्रद्रव्यंचलब्धवान् ॥ द्रव्यस्यार्थेतदादेविविग्रहोभ्रातरंप्रति ॥
॥ २ ॥ भ्रात्रातस्यमहादेविद्रव्यार्थेभक्षितंविषम् ॥ बहुकालेतदादेविव्ययंसर्वधनंकृतम् ॥ ३ ॥
ततश्चपंचतांयातोब्राह्मणश्चसुरेश्वरि ॥ यमदूतैर्महाघोरैर्नरकेदेविकर्दमे ॥ ४ ॥ षष्टिवर्षसहस्रा
णिनिक्षिप्तश्चयमाज्ञया ॥ भुक्त्वानरकजंदुःखंकाकयोनिरभूत्पुनः ॥ ५ ॥ पुनर्मानुषयोनिश्चपुत्र
कन्याविवर्जितः ॥ पूर्वजन्मनिभोदेविभ्रात्रेंशंनैवदत्तवान् ॥ ६ ॥ तेनपापेनभोदेविमहारोगसमु
द्भवः ॥ अस्यशांतिंप्रवक्ष्यामिशृणुत्वंगिरिजेवरे ॥ ७ ॥ गृहवित्ताष्टमंभागंपुण्यकार्येचकारयेत् ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

वापीकूपतडागादिजीर्णोद्धारंप्रयत्नतः ॥ ८ ॥ प्रतिमांकारयेद्देविस्वर्णपंचदशस्यतु ॥ भ्रातु
श्चित्रंतदादेविपूजयित्वायथाविधि ॥ ९ ॥ गन्धधूपादिभिर्देविभूषणैर्विविधैरपि ॥ गायत्रीलक्ष
जाप्येनदशांशहवनेनतु ॥ १० ॥ प्रयागेमकरेस्नानंसर्वपापक्षयोभवेत् ॥ ब्राह्मणायततोदद्याद्गां
चदद्यात्पयस्विनीम् ॥ ११ ॥ भूमिंवृत्तिकरींदद्यात्पुत्रपौत्रानुयायिनीम् ॥ अश्वदानंततोदद्या
द्ब्राह्मणान्भोजयेत्ततः ॥ १२ ॥ एवंकृतेवरारोहेपुत्रोभवतिनान्यथा ॥ व्याधिस्तस्यानिवर्तेतका
कवन्ध्यालभेत्सुतम् ॥ मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्तमम् ॥ १३ ॥ ॥ इति श्रीकर्मविपा
कसं० पार्वतीहरसंवादेज्येष्ठानक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामद्विसप्ततितमोऽध्यायः॥७२॥
श्रीशिवउवाच ॥ ॥ पट्टनेवैपुरेशुभ्रेलोहकारोऽवसत्पुरा ॥ गोवर्धनेतिनाम्नाचतत्पत्नीपरमेश्वरि ॥
॥ १ ॥ धनधान्यसमायुक्तोधर्मकर्मरतस्तथा ॥ तस्यपुत्रद्वयंजातंलोहकारस्यपार्वति ॥ २ ॥
ज्येष्ठपुत्रश्चभोदेविभार्ययासहतेनवै ॥ निःसारितोगृहाद्देवितस्मैकिंचिन्नदीयते ॥ ३ ॥ एकोगृहे
ततःपुत्रोद्रव्यंतस्यप्रयच्छति ॥ लोहकारेणभोदेविस्वभार्यापुत्रसंयुता ॥ ४ ॥ त्यक्ताचैवमहादे
विगोपालस्यतुकन्यका ॥ भार्याकृतापुनस्तेनपत्न्यास्त्यागश्चवैकृतः ॥ ५ ॥ ततोबहुगतेकाले
लोहकारस्यवैशिवे ॥ व्याघ्रेणमरणंप्राप्तोयमदूतैर्यमाज्ञया ॥ ६ ॥ निःक्षिप्तोनरकेघोरेकृमिवि

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

ष्ठादिसंकुले ॥ त्रिंशद्वर्षसहस्राणिभुक्त्वानरकयातनाम् ॥ ७ ॥ नरकान्निर्गतोदेविमानुषत्वंततो
ऽलभत् ॥ पुनःसर्पस्ययोनिंचततोनकुलमेवच ॥ ८ ॥ मानुषत्वंततोदेविधनधान्यसमाकुलम् ॥
शूरश्चकृतविद्यश्चज्ञानवान्राजवल्लभः ॥ ९ ॥ पुरैवयत्कृतंसर्वंतत्प्राप्नोतिनसंशयः ॥ पुरैवका
र्तिकेमासिपौर्णमास्यांसदाशिवे ॥ १० ॥ दशवर्णाकृतंदानंविधिवन्ममवल्लभे ॥ तेनदानफलेने
हधनाढ्यत्वंप्रजायते ॥ ११ ॥ स्वभार्यांचपरित्यज्यपरकीयांरतःसवै ॥ अतःपुत्रस्यवैमृत्युः
पुनःपुत्रोनजायते ॥ १२ ॥ कन्यकाजनयित्रीचतस्यभार्याभवत्खलु ॥ भार्यांपुत्रौपरित्यज्यपर
कीयांरतोयतः ॥ १३ ॥ तत्पापेनमहादेविरोगग्रस्तकलेवरः ॥ व्याधयश्चसमुत्पन्नादद्रुपामाद
यस्तथा ॥ १४ ॥ ख्यातवंशेसमुत्पन्नोभूमिभागोनलभ्यते ॥ अथशांतिंप्रवक्ष्यामिपूर्वपापवि
शुद्धये ॥ १५ ॥ एकादशीव्रतंनित्यंषडंशंदानमाचरेत् ॥ षडङ्गपाठयामासरुद्रपूजनपूर्वकम् ॥
॥ १६ ॥ हरिवंशश्रवणंदेविचण्डीपाठंनिरन्तरम् ॥ तिलधेनुप्रदानंवैअमाश्राद्धंविशेषतः ॥
॥ १७ ॥ एवंकृतेतदादेविपुत्रस्तस्यभविष्यति ॥ वन्ध्यत्वंप्रशमंयातिसर्वरोगक्षयोभवेत् ॥ १८ ॥
इतिश्रीकर्म०पार्वतीहरसंवादेज्येष्ठा०द्वि०चरणप्रा०कथनं नाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥
॥ श्रीशिवउवाच ॥ ॥ वीजापुरइतिख्यातेपुरेदेविमनोहरे ॥ वसन्तिबहवोवर्णायतिनश्चवणि

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

ग्जनाः ॥ १ ॥ तन्मध्येशूद्रएकोहितांबूलंचकरोतिसः ॥ सुरापीचसवैनित्यंताम्बूलविक्रयीशिवे ॥
॥ २ ॥ तस्यपुत्रद्वयंजातंधनंचबहुसंचितम् ॥ ततस्तुदैवयोगेनमहाधनमदेनच ॥ ३ ॥ ज्ये
ष्ठपुत्रस्यहननंकृतंतेनवरानने ॥ स्वभार्यार्थेतदानींतुपत्नीतस्यतुतेनहि ॥ ४ ॥ पुत्राभ्यांचभवेद्वैरं
पत्न्यासहविशेषतः ॥ प्रत्यहंभुज्यतेतेनपुत्रपत्नीतथाधमः ॥ ५ ॥ एवंबहुदिनेजातेतस्यमृत्युर
भूच्छिवे ॥ ततोवैनरकेघोरेयमदूतैर्यमाज्ञया ॥ ६ ॥ निःक्षिप्तोवैततोदेविषष्टिवर्षसहस्रकम् ॥
कृमिभिर्घोरवक्त्रैश्चभुक्त्वानरकयातनाम् ॥ ७ ॥ नरकान्निर्गतोदेविश्वानयोनिंततोलभत् ॥ त
तोवृषभयोनिंचमानुषत्वंततोगतः ॥ ८ ॥ पूर्वजन्मनिभोदेविदशवर्णांददौबहु ॥ तत्फलेनेहभो
देविधनधान्ययुतस्तदा ॥ ९ ॥ पुत्रस्यपत्नीभुक्त्यातुपुत्रस्यैववधःकृतः ॥ तत्पापफलतोदेविह्य
पुत्रश्चज्वरीतथा ॥ १० ॥ व्याधिश्चबहुधातस्यचाङ्गेचमहतीव्यथा ॥ तदाचिंताक्षमायुक्तोरात्रौ
निद्रांनलब्धवान् ॥ ११ ॥ स्ववित्तस्यत्रयंभागंप्रगृह्यहरवल्लभे ॥ कूपंचखानयामासतडागंजी
र्णमुद्धरेत् ॥ १२ ॥ पौर्णमासीव्रतंदेविसकलत्रस्तदाकरोत् ॥ शिवस्यपूजनंलक्षंब्राह्मणेभ्यश्च
कारयेत् ॥ १३ ॥ कृष्णांचगाश्चवृषभंब्राह्मणायप्रदापयेत् ॥ गायत्रीमूलमंत्रेणतथालक्षप्रमाण
तः ॥ १४ ॥ जपंवैकारयामासहवनंतद्दशांशतः ॥ मार्जनंतर्पणंदेविदशांशंचैवकारयेत् ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ १५ ॥ पुत्रस्यप्रतिमांतद्वत्स्वर्णवस्त्रसमन्विताम् ॥ पलपञ्चदशस्यैवनिर्मितांरत्नभूषिताम् ॥
॥ १६ ॥ पूजांकृत्वांविधानेनब्राह्मणायप्रदापयेत् ॥ एवंकृतेनसंदेहःशीघ्रंपुत्रमवाप्नुयात् ॥ १७ ॥
व्याधिश्चप्रशमंयातिकाकवन्ध्यालभेत्सुतम् ॥ मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्तमम् ॥ १८ ॥
इति श्रीकर्म० पार्व० ज्येष्ठान० तृतीयचरणप्रायश्चित्तकथनंनामचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥
॥ श्रीशिवउवाच ॥ ॥ चतुर्भुजपुरंनामवेणीपश्चिमतःशिवे ॥ पट्टकारोऽवसद्देविलक्ष्मणेतिचसं
ज्ञकः ॥ १ ॥ तस्यपत्नीविशालाक्षीपरपुंसिरतासदा ॥ पुत्राश्चबहवोजाताधनंचबहुसंचितम् ॥
॥ २ ॥ क्रयविक्रयधर्मेणव्ययंकृत्वादिनेदिने ॥ तस्यगेहेऽकरोद्वासंचटकानामपक्षिणी ॥ ३ ॥
एकस्मिन्समयेदेविचांडान्दत्त्वापिपक्षिणी ॥ बहून्वैपोषितांश्चाण्डान्सपक्षान्कृतवांस्तथा ॥ ४ ॥
फलंगृह्यसदापक्षीमध्याह्नेबालकान्प्रति ॥ भोजनंप्रददौनित्यंस्वकुलायतदाशिवे ॥ ५ ॥ तत
स्तुदैवयोगेनपट्टकारस्तुतद्गृहे ॥ भोजनार्थंगतोदेविपत्नीचान्नंतदाददौ ॥ ६ ॥ भुक्तंचविविधं
चान्नंतत्क्षणेपक्षिबालकाः ॥ विष्ठांचक्रुस्तथादृष्ट्वापट्टकारोरुषाखलु ॥ ७ ॥ कुलंतस्यकृतंनष्टंबा ॥८२॥
लानांहननंतथा ॥ एवंबहुगतेकालेपट्टकारस्यसुव्रते ॥ ८ ॥ गङ्गायांमरणंजातंभार्ययासहितस्य
वै ॥ स्वर्गवासोभवद्देविपट्टकारस्यसुव्रते ॥ ९ ॥ सप्ततिर्वैसहस्राणिस्वर्गेभुक्त्वाफलंबहु ॥ पुनः

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

पुण्यक्षयेजातेस्वर्गभ्रष्टोयदाभवत् ॥ १० ॥ मनुष्यश्चाभवद्देविगंगागण्डकिमध्ययोः ॥ धनधान्य
समायुक्तोविवाहमकरोद्यदा ॥ ११ ॥ पूर्वजन्मस्थिताभार्यासातस्यगृहमेधिनी ॥ प्रेष्ययुक्ताभ
वत्सातुगर्भस्यपतनंमुहुः ॥ १२ ॥ कन्यकानैवजायंतेपुत्रस्यैवतुकाकथा ॥ ज्वरयुक्तासदानारी
स्वशरीरेभवत्खलु ॥ १३ ॥ सुखंनलभतेक्वापिदुःखंयातिदिनेदिने ॥ अस्यशांतिंप्रवक्ष्यामिशृणु
सर्वेवरानने ॥ १४ ॥ चंद्रस्याथचसूर्यस्यगायत्रीजपमाचरेत् ॥ लक्षमेकंवरारोहेपूर्वपापविशुद्ध
ये ॥ १५ ॥ गृहवित्ताष्टमंभागंपुण्यकार्यंचकारयेत् ॥ कपिलांगांसवत्सांचब्राह्मणायप्रदापयेत् ॥
॥ १६ ॥ दशवर्णांततोदद्याद्ब्राह्मणान्भोजयेत्ततः ॥ चटकस्याकृतिंकृत्वासार्भकस्यवरानने ॥
॥ १७ ॥ रौप्यस्यस्वर्णताम्रस्यपंचविंशपलस्यतु ॥ ब्राह्मणायततोदद्याद्भूमिदानंविशेषतः ॥
॥ १८ ॥ हरिवंशश्रवणंकुर्याद्भार्ययासाहितस्तुवै ॥ हवनंतर्पणंकुर्यान्मार्जनंतुततःपरम् ॥ १९ ॥
जातवेदस्यमंत्रेणदशायुतजपंतथा ॥ गोपालमंत्रजाप्येनपुत्रलाभोभवेदनु ॥ रोगनाशोभवेद्देवि
काकवन्ध्यालभेत्सुतम् ॥२०॥ इ०कर्म०पार्व०ज्येष्ठान०चतु०प्रा०पंचसप्ततितमोऽध्यायः॥७५॥
॥ श्रीशिवउवाच ॥ ॥ अयोध्यानगरेदेविकायस्थोवसातिप्रिये ॥ रामदासइतिख्यातस्तस्यपत्नी
तुदेविका ॥ १ ॥ विष्णुभक्तिरतोनित्यंब्राह्मणस्यचसेवकः ॥ भार्यापातिव्रतातस्यपातिसेवासुत

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तपरा ॥ २ ॥ भाग्यवान्सर्ववस्तूनांविक्रेतागजवाजिनाम् ॥ तस्यांमित्रंभवद्विप्रोब्राह्मणोवेदपा
रगः ॥ ३ ॥ आगतोवैगृहेतस्यप्रेम्णामित्रस्यभामिनि ॥ चातुर्मास्यंस्थितस्तत्रस्वर्णंशतपलंत
दा ॥ ४ ॥ कायस्थस्यगृहेतेनस्थापितंब्राह्मणेनवै ॥ वाराणस्यांगतोदेविस्नानार्थंसद्विजोत्तमः ॥
॥ ५ ॥ शरीरंत्यक्तवांस्तत्रब्रह्मचारीद्विजस्तदा ॥ ततोबहुतिथेकालेकायस्थस्यदरिद्रता ॥
॥ ६ ॥ तद्धनंब्राह्मणस्यैवभुक्तंतेनवरानने ॥ पुनर्वैमरणंदेविकायस्थोभार्ययासह ॥ ७ ॥ अयो
ध्यायांततोदेवितयोःस्वर्गोह्यजायत ॥ नवतिवर्षसहस्राणिब्रह्मलोकेवरानने ॥ ८ ॥ भुक्तंसौख्यमने
कंतुदेवानामपिदुर्लभम् ॥ ततःपुण्यक्षयेजातेमर्त्यलोकेसुरेश्वरि ॥ ९ ॥ तत्पापेनाभवद्देविक
न्यापुत्रप्ररोधनम् ॥ अस्यपापस्यवैशांतिंशृणुमेपरमेश्वरि ॥ १० ॥ प्रायश्चित्तंसुरश्रेष्ठपूर्वजन्मस
मुद्भवम् ॥ गृहवित्तषडंशेनततोदानंप्रकल्पयेत् ॥ ११ ॥ गायत्रीत्र्यंबकाभ्यांचजातवेदेनचान
घे ॥ जपंवैकारयामासप्रतिमंत्रंदशायुतम् ॥ १२ ॥ ततोहोमंदशांशेनतर्पणंमार्जनंतथा ॥ पल
दशसुवर्णेनब्राह्मणस्यतदाकृतिम् ॥ १३ ॥ पूजयित्वायथान्यायंब्राह्मणायततोददेत् ॥ ततोगां
कपिलांदद्यात्स्वर्णवस्त्रविभूषिताम् ॥ १४ ॥ वृषमेकंवरारोहेदशवर्णांददेत्पुनः ॥ एवंकृतेनसं
देहोवंशमस्यभवेत्खलु ॥ १५ ॥ रोगंशरीरजन्यंवैतस्यनाशःप्रजायते ॥ काकवन्ध्यालभेत्पुत्रंमृ

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तत्क्षाततःप्रिये ॥ चिरंजीविसुतंचैवनात्रकार्याविचारणा ॥ १६ ॥ इति श्रीकर्मविपाकसंहि
तायांपार्वतीहरसंवादेमूलनक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामषट्सप्ततितमोऽध्यायः ॥ ७६ ॥
॥ शिवउवाच ॥ ॥ पश्चिमायामयोध्यायायोजनानांत्रयोपरि ॥ राघवस्यपुरंयत्रवसन्तिबहवो
जनाः ॥ १ ॥ तन्मध्येब्राह्मणोह्येकोयोगशर्माततःप्रिये ॥ तस्यपत्नीसमाख्यातागुणजापरमाशु
भा २ ॥ तत्रवासोभवद्देविज्ञानवानातिपण्डितः ॥ पुरोहितोमहादेविधनाढ्यःकृपणस्तथा ॥
॥ ३ ॥ प्रतिग्रहेणभोदेविव्ययंकुर्याद्दिनेदिने ॥ तस्यभ्राताकनिष्ठश्चव्यापारकरणेरतः ॥ ४ ॥
उभौतौब्राह्मणौदेविप्रीतिमन्तौपरस्परम् ॥ ततोबहुगतेकालेवैरंजातंतदाशिवे ॥ ५ ॥ स्वधन
स्यविभागार्थंशुद्धंजातंसुदारुणम् ॥ तदुद्देशेनभोदेविमृतोभ्राताकनिष्ठकः ॥ ६ ॥ तद्धनंगृह्यवै
स्वर्णंसर्वंपुत्रायदत्तवान् ॥ दानंनैवकृतंतेनततोवैमरणंखलु ॥ ७ ॥ यमदूतैर्महाघोरैर्निःक्षिप्तोर
क्तकर्दमे ॥ बहून्यब्दसहस्राणिभुक्त्वानरकयातनाम् ॥ ८ ॥ नरकान्निर्गतोदेविगर्दभत्वमजाय
त ॥ वृकयोनिस्ततोभूत्वामानुषत्वंततोऽलभत् ॥ ९ ॥ वैद्यविद्यारतोदेविकन्यावान्पुत्रवर्जि
तः ॥ रोगयुक्तोमहादेविसदाभिक्षारतोनरः ॥ १० ॥ पूर्वपापविशुद्ध्यर्थंप्रायश्चित्तंशृणुष्वमे ॥
हरिवंशश्रवणंदेविशिवपूजनमेवच ॥ ११ ॥ अमायांपिण्डदानंचगोदानंचविशेषतः ॥ षडक्षरंत

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

थामन्त्रंशुद्धंममसुरेश्वरि ॥ १२ ॥ जपंवैकारयामासदशलक्षंवरानने ॥ होमंवैकारयामासकुण्डे
चित्रेवरानने ॥ १३ ॥ चतुरस्रेवरारोहेतिलधान्यादितण्डुलैः ॥ प्रतिमांकारयामासभ्रातुःस्वर्ण
स्यवैशिवे ॥ १४ ॥ पलंदशप्रमाणेनमंत्रेणानेनपूजयेत् ॥ ॐनमःसवित्रेदेवायवेदवेदाङ्गपारग ॥
॥ १५ ॥ पूर्वजन्मकृतंसर्वंममपापंव्यपोहतु ॥ अज्ञानाद्वाप्रमादाद्वाभ्रातुरंशापहारतः ॥ १६ ॥
तदर्थंगौर्मयादत्तासाध्वीभूतायतेनमः ॥ प्रतिमांपूजयित्वातुब्राह्मणायददेत्ततः ॥ १७ ॥ एवंकृ
तेविधानेनशीघ्रंपुत्रमवाप्नुयात् ॥ काकवन्ध्यावरंपुत्रंजनयामासभामिनि ॥ १८ ॥ व्याधयोनाश
मायान्तितूलराशिर्यथानले॥१९॥इ०क०पा०मू०द्वितीयच०प्रा०सप्तसप्ततितमोऽध्यायः॥ ७७ ॥
॥ शिवउवाच ॥ ॥ सरय्वाश्चोत्तरेकूलेमंगलंनामवैपुरम् ॥ तत्रक्षत्रीवसत्येकोमद्यंमांसंभुनक्ति
सः ॥ १ ॥ भावसेनश्चनाम्नासतस्यपत्नीमनोहरा ॥ वेश्याद्यूतरतश्चासौलुब्धश्चौरेषुसंमतः ॥
॥ २ ॥ प्रत्यहंचौरकर्मेणव्ययंकुर्याद्दिनेदिने ॥ ततोबहुगतेकालेतस्यमृत्युरभूत्किल ॥ ३ ॥
सर्पेणापिमहादेवियमदूतैर्यमाज्ञया ॥ रौरवेनरकेक्षिप्तः षष्टिवर्षसहस्रकम् ॥ ४ ॥ नरकान्निर्ग ॥९४॥
तोदेविव्याघ्रयोनिंततोलभत् ॥ मानुषत्वंततोलेभेकुलेमहतिपूजिते ॥ ५ ॥ पूर्वजन्मनिभोदे
विदीपदानंकृतंयतः ॥ तत्फलेनमहादेविधनाढ्यत्वंप्रजायते ॥ ६ ॥ मद्यपानफलाद्देविवेला

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

ज्वरसमुद्भवः ॥ वेश्यासुरतसंयुक्तोयतोसौपूर्वजन्मनि ॥ ७ ॥ तेनपापेनभोदेविपुत्राणांमरणंखलु ॥
मनस्युद्वेगता नित्यंजातोद्यूतरतःपुरा ॥ ८ ॥ अस्यशांतिंप्रवक्ष्यामिसर्वपापविशुद्धये ॥ गृहवित्त
षडंशेनपुण्यकार्यंचकारयेत् ॥ ९ ॥ वापीकूपतडागांश्चपथिमध्येचकारयेत् ॥ गायत्रीमूलमंत्रे
णलक्षंजाप्यंवरानने ॥ १० ॥ दशांशहवनंतद्वत्तर्पणंमार्जनंतथा ॥ दशवर्णांततोदद्याद्वृषभेण
समन्विताम् ॥ ११ ॥ एवंपापविशुद्धिःस्यान्नात्रकार्याविचारणा ॥ पुत्रश्चजायतेदेविवन्ध्यत्वंच
प्रणश्यति ॥ १२ ॥ मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्तमम् ॥ रोगाविनाशमायांतिव्याधयश्चत
थाशिवे ॥ १३ ॥ इति श्रीकर्म॰पार्व॰ मूल॰ तृतीयच॰प्रा॰नामाऽष्टसप्ततितमोऽध्यायः ॥७८॥
॥ श्रीशिवउवाच ॥ ॥ मध्यदेशेविशालाख्येहैडम्बंनामवैपुरम् ॥ लवणकारोवसत्येकोभीमोगुण
विचक्षणः ॥ १ ॥ प्रत्यहंलवणंकृत्वाविक्रयंकुरुतेसदा ॥ तस्यपुण्यवतीभार्यापुत्रत्रयमजीजन
त् ॥ २ ॥ धनधान्यंवृषच्छागंगोमहिष्यादिकंतथा ॥ बहूनिसंचितानिस्युर्लवणकारस्यवैगृहे ॥
॥ ३ ॥ तस्यज्येष्ठः सुतोदेविवेश्यासुरततत्परः ॥ एकस्मिन्समयेदेविलवणकूपेनिशामुखे ॥
॥ ४ ॥ भार्ययासहदेवेशिवृषभोपातितोतदा ॥ श्रुत्वातेनतदादेविनिशायांनगतोपिसः ॥ ५ ॥
त्रयाणां वैभवेन्मृत्युः स्वकालेज्ञातिनासह ॥ भार्यानिःसारितातेनवृषभोमृत्युसंयुतो ॥ ६ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

ततः सर्ववयोयातवृद्धेसातिवरानने ॥ मरणंतस्यवैजातंलवणकारस्यपार्वेति ॥ ७ ॥ यमदूतैर्म
हाघोरैर्नरकेघोरसंज्ञके ॥ पातयामासदेवेशिद्वाविंशतिसहस्रकम् ॥ ८ ॥ वर्षमुभुज्यतेदेविकृ
मिसूचीमुखैर्युतम् ॥ नरकान्निःसृतोदेविव्याघ्रयोनिमजायत ॥ ९ ॥ पुनश्छागस्यवैयोनिं
विडालस्यततोभवत् ॥ मानुषत्वंततोलेभेदेशेपुण्यतमेशुभे ॥ १० ॥ स्वकर्मवशगोनित्यंध
नधान्यसमन्वितः ॥ गुणज्ञःसर्वविद्यानांकन्यापुत्रमजायत ॥ ११ ॥ लवणकारस्यमरणंगंगा
यांपूर्वजन्मतः ॥ तत्फलेनमहादेविधनाढ्यत्वंप्रजायते ॥ १२ ॥ स्वभार्यापतितादेविलवणकू
पेनिशामुखे ॥ नैवनिःसारितादेविततःकन्याप्रजायते ॥ १३ ॥ वृषभौपतितौकूपेपातितौ
मृत्युमागतौ ॥ तेनदोषेणदेवेशिपुत्रोनैवप्रजायते ॥ १४ ॥ परस्त्रीरतिसंयोगोयत्कृतःपूर्वजन्म
नि ॥ तेनपापेनभोदेविशरीरेरोगसंभवः ॥ १५ ॥ अस्यशांतिंप्रवक्ष्यामिशृणुदेविसुशोभने ॥
गृहवित्ताष्टमंभागंब्राह्मणायसमर्पयेत् ॥ १६ ॥ गायत्रीलक्षजाप्यंचविप्रद्वाराचकारयेत् ॥ हव
नंतद्दशांशेनमार्जनंतर्पणंतथा ॥ १७ ॥ सुवर्णस्यकृतामूर्तिर्लक्ष्म्याः पंचपलस्यतु ॥ रौप्यस्यै ॥५५॥
ववरारोहेवृषभौद्वौसुनिर्मलौ ॥ १८ ॥ पलदशकस्यवैकुर्यात्पूजयित्वायथाविधि ॥ मंत्रेणानेन
देवेशिचोपचारैःपृथक्पृथक् ॥ १९ ॥ ॐलक्ष्मिदेविमहालक्ष्मिकमलेसर्वसिद्धिदे ॥ ममपू

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

वंकृतंपापंतत्क्षमस्वदयानिधे ॥ २० ॥ ॐलक्ष्म्यैनमः पाद्यंसमर्पयामि ॥ ॐमहालक्ष्म्यैनमः
अर्घ्यंसमर्पयामि ॥ ॐ देव्यैनमः स्नानंसमर्पयामि ॥ ॐकमलायैनमः गंधंसमर्पयामि ॥ ॐसर्वायै
नमः धूपंसमर्पयामि ॥ ॐसिद्धिदायैनमः दीपंसमर्पयामि ॥ एवंपाद्यादिसर्वाणिदापयेत् ॥
ॐनंदिकेश्वरभूतेशगणानामाधिपप्रभो ॥ ममपूर्वकृतंपापंक्षम्यतांपरमेश्वर ॥ २१ ॥ इतिमं
त्रेणवृषभौपूजितौशुभ्ररूपिणौ ॥ पूजयित्वायथान्यायंब्राह्मणायददेत्ततः ॥ २२ ॥ ततोगांकपिलां
दद्यात्स्वर्णशृंगींसुभूषिताम् ॥ एवंकृतेवरारोहेयत्कृतंपूर्वजन्मनि ॥ २३ ॥ तत्सर्वंनाशमाया
तिशीघ्रमेवनसंशयः ॥ पुत्रोपिजायतेदेविवंध्यत्वंचप्रशाम्यति ॥ २४ ॥ रोगाःसर्वेक्षयंयांतिना
त्रकार्याविचारणा ॥ मृतवत्सालभेत्पुत्रांचिरंजीविनमुत्तमम् ॥ २५ ॥ काकवंध्यालभेत्पुत्रंपुन
र्देविनसंशयः ॥ २६ ॥ इतिश्रीकर्म ०पा० मूल० चतु० नामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥
॥ श्रीशिवउवाच ॥ ॥ अयोध्यायांमहादेविवासिष्ठस्यैवचाश्रमे ॥ श्रीधनेश्वरशर्मेतिब्राह्मणोव
सतिप्रिये ॥ १ ॥ सपंडितोगुणज्ञश्चधनीमानीविचक्षणः ॥ पतिव्रताचतस्यस्त्रीपतिसेवासुतत्प
रा ॥ २ ॥ पुत्रद्वयंतथाजातंविद्ययासतुजीवति ॥ भागिनेयस्ततोदेवितद्धनेश्वरशर्मणः ॥ ३ ॥
तत्रवासार्थमायातः सहपत्न्यावरानने ॥ तीर्थयात्राप्रसंगेनगृहेतस्यावसद्द्विजः ॥ ४ ॥ मासमेकं

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

 स्थितस्तत्रभागिनेयस्ततोमृतः ॥ दृष्टः सर्पेणदेवेशिकर्मकांडंतथाकृतम् ॥ ५ ॥ वर्षमात्रेततोजा
 तेभागिनेयस्यवैस्त्रियाः ॥ धनेश्वरेमहाप्रीतिर्जाताखलुवरानने ॥ ६ ॥ भार्यापुत्रंचवैरूप्यंप्रत्यहं
जायतेतदा ॥ गृहेस्वर्णंचरौप्यंचसर्वंतस्यन्यवेदयत् ॥ ७ ॥ ततोबहुगतेकालेतस्यमृत्युरभूत्कि
ल ॥ यमदूतैर्महाघोरेनरकेक्षिप्तईश्वरि ॥ ८ ॥ यमाज्ञयावरारोहेषष्टिवर्षसहस्रकम् ॥ अन्यत्रा
पिकृतंपापंप्रयागेचविनश्यति ॥ ९ ॥ प्रयागेयत्कृतंपापंरामपुर्यांविनश्यति ॥ अयोध्यायांकृ
तंपापंवज्रलेपोभविष्यति ॥ १० ॥ नरकान्निःसृतोदेविबकयोनिरजायत ॥ पुनर्दर्दुरयोनिर्वैका
कयोनिस्ततोभवत् ॥ ११ ॥ पुनर्मानुषयोनिर्वैधनधान्यसमन्विताम् ॥ जातः पुण्यतमेदेशेदेव
गंधर्वसेविते ॥ १२ ॥ सर्वविद्यासुविख्यातोगुणज्ञोरूपवांस्तदा ॥ पूर्वंजन्मनिदेवेशिभागिनेय
वधूंप्रति ॥ १३ ॥ संभोगंकृतवान्विप्रः कुक्षिपीडाततः परम् ॥ वंशच्छेदंविशालाक्षिकन्यकाबह
वस्तथा ॥ १४ ॥ भागिनेयस्यवैद्रव्यंभुक्तंपुत्रयुतंयतः ॥ शरीरेबहुधापीडापरस्त्रीगमनादनु ॥
॥ १५ ॥ अस्यशांतिंप्रवक्ष्यामिशृणुत्वंममवल्लभे ॥ गृहवित्तषडंशंचपुण्यकार्येचकारसः ॥१६॥
गायत्रीजातवेदाभ्यांजपंवैकारयेत्ततः ॥ दशांशहवनंकृत्वातर्पणंमार्जनंतथा ॥ १७ ॥ जीर्णो
द्धारंवरारोहेकूपंचैवतडागकम् ॥ तद्वदेवचवैकुर्यात्षष्टिवृक्षावरोपणम् ॥ १८ ॥ प्रयागेमाघमासेतु

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तुलादानंप्रयत्नतः ॥ धूम्रवर्णांतथागां वैदद्याद्विप्रायसत्कृताम् ॥ १९ ॥ एवंकृतेवरारोहेपूर्वपा
पंविशुध्यति ॥ पुत्रोपिजायतेदेविवंध्यत्वंचप्रशाम्यति ॥ २० ॥ काकवन्ध्यत्वशांत्यावैराविधुक्ता
तुसप्तमीम् ॥ कृत्वापत्नींवरारोहेसुवर्णदानमाचरेत् ॥ २१ ॥ शय्यादानंततोदद्यान्मृतवत्सा
सुपुत्रिणी ॥ सर्वेरोगाःक्षयंयांतिनात्रकार्याविचारणा ॥ २२ ॥ इति श्रीकर्मविपाकसंहितायां
पार्वतीहरसंवादेपूर्वाषाढानक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामाशीतितमोऽध्यायः ॥ ८० ॥
॥ शिवउवाच ॥ कर्णाटकेशुभेदेशेपुरंचाशिवसंज्ञकम् ॥ वसंतितत्रबहवोवैश्याःपण्योपजीवि
नः ॥ १ ॥ तन्मध्येवैश्यएकोहिधरणीकरविश्रुतः ॥ तस्यरूपवतीभार्यासुंदरीबहुसंमता ॥
॥ २ ॥ व्यापारेणमहादेविधनंचबहुसंचितम् ॥ ततोबहुदिनेजातेतस्यापिमित्रंद्विजोऽप्यभूत् ॥
॥ ३ ॥ ब्राह्मणःसोपिवैभ्रष्टःकष्टंभुक्त्वादिनेदिने ॥ स्वर्णशतपलंदेविहीरकंमौक्तिकंतथा ॥
॥ ४ ॥ स्थापितंब्राह्मणद्रव्यंस्वगृहेमित्रकारणात् ॥ ततोवृद्धेतुवैजातेवैश्यमृत्युरभूत्पुरा ॥
॥ ५ ॥ पश्चात्पत्नीमृतातस्यव्रतिनीगर्ववर्जिता ॥ वैश्यस्यैवाभवत्स्वर्गोदिव्यवर्षसहस्रकम् ॥
॥ ६ ॥ पत्न्यासहवरारोहेभुक्त्वास्वर्गफलंततः ॥ काकयोनिंततोलेभेचक्रवाकस्ततोऽभवत् ॥
॥ ७ ॥ हंसयोनिस्ततोजातोमानुषत्वंततोलभत् ॥ पूर्वसंबंधतःपत्नीपुण्यात्पातिव्रतादपि ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ ८ ॥ पुनर्विवाहितादेविनपुत्रंसाव्यजीजनत् ॥ वंध्याजातातुसानारीदुःखिताचाप्यहर्निशम् ॥
॥ ९ ॥ तस्यदेहेभवद्व्याधिः कफवातसमन्वितः ॥ धनाढ्योबहुधाकन्याजायंतेचपुनः पुनः ॥
॥ १० ॥ अस्यनिग्रहहेत्वर्थंशृणुसर्ववरानने ॥ यद्गृहेवित्तमर्द्धंहिब्राह्मणायसमर्पयेत् ॥ ११ ॥
ॐलक्ष्म्यैनमोमंत्रेणदशायुतजपंततः ॥ दशांशहवनंतद्वत्तर्पणंमार्जनंतथा ॥ १२ ॥ गामेकां
कृष्णवर्णां वैस्वर्णशृंगींसवत्सकाम् ॥ ब्राह्मणायततोदद्यान्मुक्तालांगूलग्रंथिताम् ॥ १३ ॥ भो
जनंकारयामासब्राह्मणान्वेदपारगान् ॥ शतंवाद्विशतंदेवित्रिशतंवाविशेषतः ॥ १४ ॥ पलश
तसुवर्णस्यवेदींकृत्वाविचक्षणः ॥ तन्मध्येचद्विजस्यैवाकृतिरौप्यस्यवैभवेत् ॥ १५ ॥ पूजया
मासदेवेशिमंत्रेणैवपुनःपुनः ॥ ब्रह्मंस्त्वंकापिलोविष्णुःसर्वसाक्षीजगन्मयः ॥ १६ ॥ ममापरा
धंदेवेशक्षम्यतांपूर्वजन्मनः ॥ द्रव्यंमित्रस्यभोदेविस्थापितंस्वगृहेमया ॥ १७ ॥ नदत्तं वैमया
ऽज्ञानात्क्षम्यतांपरमेश्वर ॥ मंत्रेणानेनदेवेशिपूजनंविधिपूर्वकम् ॥ १८ ॥ पूजयित्वाततोदेवि
ब्राह्मणायप्रदापयेत् ॥ एवंकृत्वावरारोहेशीघ्रंपुत्रःप्रजायते ॥ १९ ॥ काकवन्ध्यापुनर्देविकन्य
कामजनत्तथा ॥ पुत्रंप्रसूयतेदेविनचकन्याप्रसूयते ॥ २० ॥ मृतवत्सालभेत्पुत्रंचिरञ्जीविन
मुत्तमम् ॥ व्याधयः संक्षयंयांतिनात्रकार्याविचारणा ॥ २१ ॥ इति कर्मविपाकसंहितायां

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

पार्वतीहरसंवादे पूर्वाषाढानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनंनामैकाशीतितमोऽध्यायः ॥८१॥
॥ शिवउवाच ॥ ॥ अंतर्वेदेविशालाक्षिलोध्रोवसतिपुण्यकृत् ॥ गंधर्वपुरेविख्यातेनगरेयमुना
तटे ॥ १ ॥ सभाग्यवान्गुणज्ञोहिबहुभृत्यैःसुपूजितः ॥ भूपतिस्तस्यदेशस्यदाताभोक्ताविचक्ष
णः ॥ २ ॥ ब्राह्मणस्यहृताभूमिरज्ञानाद्वासुरेश्वरि ॥ ब्राह्मणोऽपिविषंभुक्त्वामृतस्तस्योपरिप्रिये ॥
॥ ३ ॥ ततोबहुगतेकालेतस्यमृत्युरभूत्पुरा ॥ यमदूतैर्महाघोरेकुंभीपाकेनिपातितः ॥ ४ ॥
यमाज्ञयावरारोहेयुगमेकंपपाचवै ॥ महादुःखेनसंतप्तोबहुकष्टंप्रलब्धवान् ॥ ५ ॥ नरकान्निःसृ
तोदेविसूकरत्वंप्रजायते ॥ ऋक्षयोनिंततोभूत्वाशुकयोनिंततोऽलभत् ॥ ६ ॥ पुनर्मानुषयो
निंवैमध्यदेशेवरानने ॥ धनधान्यसमायुक्तोवंशहीनोवरानने ॥ ७ ॥ पूर्वजन्मनिदेवेशिहृताभू
मिर्वरानने ॥ ब्राह्मणोवैमृतःपूर्वंतदुद्देशेनवैशिवे ॥ ८ ॥ अतःपुत्रविहीनोयंबहुकन्याप्रजोऽभव
त् ॥ महारोगेणसंतप्तोमृतवत्सःपुनःपुनः ॥ ९ ॥ अस्यशांतिमहंवक्ष्येपूर्वपापस्यशांतये ॥ गाय
त्रीजातवेदाभ्यांत्र्यम्बकेणवरानने ॥ १० ॥ दशायुतंजपःकार्यःप्रातिमंत्रैःसुरेश्वरि ॥ दशांशंहव
नंतद्वत्तर्पणंमार्जनंतथा ॥ ११ ॥ दशवर्णंततोदानंशतंब्राह्मणभोजनम् ॥ भूमिदानंततःकुर्या
च्छतविग्रहमानकम् ॥ १२ ॥ पलंपंचसुवर्णस्यब्राह्मणस्यतथाकृतिम् ॥ पूजयित्वायथान्यायंत्रा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

ह्मणायप्रदापयेत् ॥ १३ ॥ प्रयागेमकरेमासिपत्न्यासहवरानने ॥ स्नानंकरोतिदेवेशिपूर्वपापंव्य
पोहति ॥ १४ ॥ एवंकृत्वावरारोहेपुत्रोजातःसवैशिवे ॥ वंध्यात्वंनाशमायातिकाकवन्ध्याचगुर्वि
णी ॥ १५ ॥ मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्तमम् ॥ रोगाःसर्वेक्षयंयांतिनात्रकार्याविचारणा ॥
॥ १६ ॥ इति श्रीकर्म० पार्व० पूर्वाषाढनक्षत्रस्यतृ०प्रा० नामद्व्यशीतितमोऽध्यायः ॥ ८२ ॥
॥ श्रीशिवउवाच ॥ ॥ अयोध्यायांविशालाक्षिमालाकारोऽवसत्पुरा ॥ साधुवृत्तिरतःश्रीमान्ब्रा
ह्मणानांचसेवकः ॥ १ ॥ तस्यपत्नीमहादुष्टाकुलटाव्यभिचारिणी ॥ माल्यंकृत्वाविशालाक्षिजी
वयामासबान्धवान् ॥ २ ॥ तस्यमित्रंद्विजोऽप्येकःस्वर्णलक्षद्वयंतथा ॥ स्थापितंस्वगृहेदेविग
ताश्चबहुवासराः ॥ ३ ॥ याचितंतेनस्वंद्रव्यमर्धंप्राप्तंतदाप्रिये ॥ तदर्धंचव्ययंजातंमालाकारस्य
वैगृहे ॥ ४ ॥ एवंबहुगतेकालेमालाकारोमृतःपुरा ॥ अयोध्यायांविशालाक्षिस्वर्गस्तस्याभव
त्किल ॥५॥ लक्षवर्षंवरारोहेभुक्तंस्वर्गफलंशुभम् ॥ ततःपुण्यक्षयेजातेमानुषत्वंभवेत्पुनः ॥ ६ ॥
मध्यदेशेचदेवेशिपुत्रकन्याविवर्जितः ॥ तस्यपत्नीपुनर्देवियास्थितापूर्वजन्मनि ॥ ७ ॥ विवा ॥५८॥
हिताचसादेविव्याधियुक्ताज्वरातुरा ॥ अस्यशांतिंवरारोहेशृणुमेपरमेश्वरि ॥ ८ ॥ षडंगपाठया
मासाशिवपूजनपूर्वकम् ॥ षडक्षरेणमंत्रेणलक्षजाप्यंवरानने ॥ ९ ॥ हवनंतद्दशांशेनमार्जनंतर्पणंत

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

था ॥ श्रवणंमासमेकंतुचंडिकाचरितत्रयम् ॥ १० ॥ ततःषडंशंदेवेशिब्राह्मणायसमर्पयेत् ॥ ततोगांकपिलांदद्यात्तिलधेनुंसुपूजिताम् ॥ ११ ॥ अश्वदानंविशालाक्षिमहिषींदुग्धसंयुताम् ॥ सुवर्णस्य कृतंवृक्षंफलपुष्पसमन्वितम् ॥ १२ ॥ पलदशस्यवैदेविततःपुत्रःप्रजायते ॥ मृतवत्साचयानारीकाकवन्ध्याचरोगिणी ॥ १३ ॥ सर्वासांवाञ्छितंकार्यंजायतेनात्रसंशयः ॥ १४ ॥ ॥ इति श्रीक०सं० पा०पूर्वाषाढानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामत्र्यशीतितमोऽध्यायः ॥८३ ॥

॥ श्रीशिवउवाच ॥ ॥ श्वेतपर्वंमहातीर्थेरामपुर्यांवरानने ॥ कान्यकुब्जोऽवसद्विप्रोव्यापारकरणेरतः ॥ १ ॥ अश्वादिकंवरारोहेवृषचर्माजिनांबरम् ॥ प्रत्यहंगृह्यतेदेविविक्रयंक्रियतेसदा ॥ ॥ २ ॥ द्यूतवेश्यारतोनित्यंपरस्त्रीगमनंतथा ॥ प्रकरोतिसुरापानंगुरुदेवंनमन्यते ॥ ३ ॥ एवंबहुगतेकालेमरणंतस्यजायते ॥ यमदूतैर्महाघोरैबद्धाक्षिप्तः सुदारुणे ॥ ४ ॥ षष्टिवर्षसहस्राणि भुक्त्वानरकयातनाम् ॥ नरकान्निःसृतोदेविवानरस्याभवद्वपुः ॥ ५ ॥ ततोरासभयोनिंवैतुरंगस्तुततोभवत् ॥ मनुष्यत्वंपुनर्लेभेपूर्वजन्मफलाद्यतः ॥ ६ ॥ धनधान्यसमायुक्तोरोगयुक्तोऽप्यपुत्रकः ॥ कदाचिद्दैवयोगेनपुत्रोभवतिभामिनि ॥ ७ ॥ मरणंतस्यवैशीघ्रंततःकन्याप्रजायते ॥ अस्यशांतिंशृणुष्वादौयथापापंनिवर्तते ॥ ८ ॥ गृहवित्तषडंशंचपुण्यकार्यंचकारसः ॥ पू

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

वेजन्मनिदेवेशिकनीयांसंस्वभ्रातरम् ॥ ९ ॥ शस्त्रेणखड्गेनवैहत्वातत्पापाच्चसुतक्षयः ॥ गायत्रीमू
लमंत्रेणपंचलक्षंवरानने ॥ १० ॥ जपंवैकारयामासनित्यंगोविंदकीर्त्तनम् ॥ होमंवैकारयामास
कुंडेषट्कोणसंज्ञके ॥ ११ ॥ पायसेनविशालाक्षितिलसर्पिर्युतेनच ॥ दशवर्णांततोदद्याद्ब्राह्म
णायाशिवात्मने ॥ १२ ॥ भूमिदानंततोदद्याच्छय्यादानंविशेषतः ॥ भ्रातुश्चैवाकृतिंकृत्वारौ
प्येणैववरानने ॥ १३ ॥ पलसप्तप्रमाणेनपूजांकृत्वाप्रसन्नधीः ॥ देवदेवमहादेवचर्मभस्माविभू
षण ॥ १४ ॥ पूर्वजन्मनिदेवेशकृतोभ्रातुर्वधोमया ॥ तत्पापंक्षम्यतांदेवप्रपद्येशरणंतव ॥ १५ ॥
प्रतिमापूजितादेविमंत्रेणानेनवैशिवे ॥ दद्याद्विप्रायविदुषेश्रोत्रियायद्विजन्मने ॥ १६ ॥ ततोवै
भोजयामासब्राह्मणान्वेदपारगान् ॥ एकाधिकशतंदेविपयसामोदकेनच ॥ १७ ॥ एवंकृत्वा
वरारोहेपूर्वपापस्यसंक्षयः ॥ वन्ध्यत्वंप्रशमंयातिपुत्रः खलुप्रजायते ॥ १८ ॥ काकवन्ध्यालभे
त्पुत्रंमृतवत्सासुपुत्रिणी ॥ व्याधयः संक्षयंयांतिनात्रकार्याविचारणा ॥ १९ ॥ इति श्रीकर्मवि
पाकसं० पा० उत्तराषाढानक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामचतुरशीतितमोऽध्यायः ॥८४॥ ॥५१॥
॥ श्रीशिवउवाच ॥ शंकेश्वरपुरेदेविवसत्येकोद्विजोवरः ॥ म्लेच्छवाणींवदन्नित्यंम्लेच्छसेवारतःस
दा ॥ १ ॥ तिष्ठतिम्लेच्छनिकटेम्लेच्छविद्यासुपंडितः ॥ मत्स्यमांसंचमद्यंचभोजनंचाकरोत्स

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

दा ॥ २ ॥ एवंसर्ववयोयातंधनंबहुसुसंचितम् ॥ तद्धनंभूमिमध्येतुस्थापितंतुगृहेशुभे ॥३ ॥ एक
स्मिन्समयेदेविभ्रातुःपुत्रःसमागतः ॥ रत्नव्यापारकरणेसदक्षश्चतुरस्तथा ॥ ४ ॥ तस्यगेहे
स्थितंनित्यंरत्नंबहुसुसंचितम् ॥ रत्नलोभेनभोदेविरात्रौछुरिकयातदा ॥ ५ ॥ पत्नीतस्यवरारो
हेसुप्तेनिशिममारतम् ॥ तत्सर्वंभूमिमध्येतुस्थापितंपतिनासह ॥ ६ ॥ द्वाभ्यांरत्नंतदागृह्यव्ययं
कृत्वादिनेदिने ॥ ततोबहुदिनैर्यातेद्विजस्यमरणंखलु ॥ ७ ॥ पश्चात्पत्नीमृतातस्यतयोर्नरकपा
तनम् ॥ षष्टिवर्षसहस्राणिमहाकष्टेनपीडितौ ॥८॥ नरकान्निःसृतौद्वौतुगजयोनीअजायताम् ॥ पु
नःकच्छपयोनिर्वैगोधायोनिरजायत ॥ ९ ॥ एवंयोनित्रयंभुक्त्वासरय्वाउत्तरेतटे ॥ मानुषत्वं
ततोलेभेभाग्यवान्साधुसंमतः ॥१०॥ सुशीलःसुमतिर्दक्षःस्वल्पविद्यायुतोनरः ॥ अपुत्रोरोगवान्दे
विभूपतिर्नरपूजितः ॥११॥ पूर्वजन्मनिदेवेशिभ्रातृपुत्रस्यवैवधः ॥ कृतोरात्रौमदाद्देवितेनदोषेणवै
मृतः ॥१२॥ म्लेच्छस्यसेवनाद्देविम्लेच्छस्याशुचिभाषणात्॥तेनपापेनभोदेविशरीरेरोगसंभवः ॥
॥ १३ ॥ गजदानंकृतंपूर्वंदत्ताशय्यासुरेश्वरि ॥ तत्फलेनमहादेविधनाढ्यत्वंप्रजायते ॥१४॥ अना
चारःकृतःपूर्वंपुत्रदारेणसंयुतम् ॥ तेनपापेनभोदेविनरःकन्याप्रजोभवेत् ॥१५॥अथशांतिंप्रवक्ष्या
मिशृणुदेविसुशोभने ॥ गायत्रीमूलमंत्रेणपंचलक्षंवरानने ॥ १६ ॥ जपंचकारयामासषडंशंदानमा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

चरेत् ॥ होमंचकारयामासकुंडेदेविसुसंस्कृते ॥१७॥ दशांशंतर्पणंदेवमार्जनंतद्दशांशतः ॥ भ्रातृ
पुत्रस्यप्रतिमांकारयामासभामिनि ॥ १८ ॥ पलदशसुवर्णस्यविधिवत्पूजयेत्ततः ॥ मंत्रेणाने
नदेवेशिगंधधूपादिभिस्तथा ॥ १९ ॥ गणाधिपसुराध्यक्षसर्वसिद्धिप्रदायक ॥ ममपूर्वंकृतंपापं
तत्क्षमस्वदयानिधे ॥२०॥ रौप्यपात्रेस्थितांतांतुप्रतिमांप्रार्थयेत्ततः ॥ अज्ञानाद्वाप्रमादाद्वामयापू
र्वंवधःकृतः ॥२१॥ तत्सर्वंक्षम्यतांदेव प्रपद्येशरणंतव ॥ ॐगणपतयेनमः ॥ॐलक्ष्म्यैनमः ॥ ॐ
सूर्यायनमः ॥ ॐशिवायनमः ॥ ॐविश्वयोनयेनमः ॥ ॐगरुडायनमः ॥ ॐनंदिकेश्वरायन
मः ॥ ॐचक्रायनमः ॥ ॐत्रिशूलायनमः ॥ ॐपद्मायनमः ॥ ॐशंखायनमः ॥ एभिर्मंत्रैस्तु
सर्वाणिवस्तूनिदापयेत्ततः ॥ कलशंपूजयेद्देविगणाधिपस्वरूपिणम् ॥ २२ ॥ गंधपुष्पैश्चतांबू
लैर्वस्त्रैर्नानाविधैरपि ॥ प्रतिमांपूजितांदेविब्राह्मणायप्रदापयेत् ॥ २३ ॥ दशवर्णांततोदद्याद्वृष
मेकंवरानने ॥ पंचपात्रंततोदद्याद्ब्राह्मणान्भोजयेत्ततः ॥ २४ ॥ रविवारेणसंयुक्तांसप्तमींविधिपूर्वं
कम् ॥ उपोषणंनियमतःपत्न्यासहसमाचरेत् ॥ २५ ॥ सप्तमवर्षपर्यंतंप्रकुर्याद्वासुरेश्वरि ॥ ततस्तू
द्यापनंकुर्याद्यथाशक्त्यासुदक्षिणाम् ॥ २६ ॥ दद्याद्विप्रायविदुषेश्रोत्रियायतपस्विने ॥ कूष्मांडं
नारिकेलंचपंचरत्नसमन्वितम् ॥ २७ ॥ गंगामध्येप्रदातव्यंपूर्वपापविशुद्धये ॥ एवंकृतेवरारोहे

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

शीघ्रंपुत्रःप्रजायते ॥ २८ ॥ सर्वेरोगाःक्षयंयांतिनीहारंभास्करोयथा ॥ २९ ॥ इति श्रीकर्मवि
पाकसं० उत्तराषाढानक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामपञ्चाशीतितमोऽध्यायः ॥ ८५ ॥
॥ शिवउवाच ॥ ॥ यवनदेशेमहादेविब्राह्मणोवेदपारगः ॥ जयदेवेतिविख्यातोगुणवानपि
शीलवान् ॥ १ ॥ तस्यभार्याशीलवतांसुशीलाशीलरूपिणी ॥ तस्यांपुत्रत्रयंजातंगुणज्ञंवेदपा
रगम् ॥ २ ॥ पुत्राःसर्वेगुणज्ञाश्चवेदवेदांगपारगाः ॥ ज्येष्ठपुत्रस्यचोद्वाहेस्वसातस्यसमागता ॥
॥ ३ ॥ भगिन्याश्चादरंकृत्वाबहुमानेनपार्वति ॥ विवाहेचसमाप्तेतुज्ञातयःस्वेषुवेश्मसु ॥ ४ ॥
गताः सर्वेविशालाक्षियथाचेभगिनीतदा ॥ ताटंकंस्वर्णरत्नाढ्यंभ्रातृपत्नीप्रकोपिता ॥ ५ ॥ श्रु
त्वैषर्ययासवत्सातुततोयातास्ववेश्मनि ॥ स्त्रीस्वभावाच्चदेवेशिसामृताभगिनीगृहे ॥ ६ ॥ तदु
द्देशेनदेवेशिशरीरंनिशिसात्यजत् ॥ ततोबहुदिनेयातेतस्यमृत्युरभूत्तदा ॥ ७ ॥ पत्नीतस्य
सतीजातासत्यलोकमभूत्तदा ॥ वर्षकोटित्रयंदेविसत्यलोकेवसत्पुनः ॥ ८ ॥ मर्त्यलोकेमनुष्य
त्वंलभेत्पुण्यक्षयेसति ॥ धनधान्यसमायुक्तोविद्यावाञ्छास्त्रपारगः ॥ ९ ॥ कृतंसर्वंपुराऽशुद्धंभ
गिनीवधकारणात् ॥ पुत्रोनजायतेदेविकन्याजन्मनिसंशयः ॥ १० ॥ शरीरेसततंदुःखंमध्येत
स्यप्रजायते ॥ काकवन्ध्याभवेद्भार्यामृतवत्सासुदुःखिता ॥ ११ ॥ अस्यशांतिंप्रवक्ष्यामितत्सर्वं

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

शृणुपार्वति ॥ गृहवित्तषडंशेनपुण्यकार्यंचकारसः ॥ १२ ॥ वापीकूपतडागानांजीर्णोद्धारंप्रय
ततः ॥ वाटिकांपथिमध्येतुततश्चशीतवारिणा ॥ १३ ॥ गायत्रीजातवेदाभ्यांजपंचैकारयेत्त
तः ॥ लक्षद्वयंविशालाक्षिहवनंतद्दशांशतः ॥ १४ ॥ तर्पणंमार्जनंतद्वद्गोदानंविधिवत्ततः ॥ एवं
कृतेवरारोहेतस्यपुत्रः प्रजायते ॥ १५ ॥ गुणज्ञःसर्ववस्तूनांसाधूनांसंमतस्तथा ॥ स्वर्णदानं
विशालाक्षिपलपंचमितंतथा ॥ १६ ॥ ब्राह्मणायततोदद्यात्पूजयेद्युवतींततः ॥ वस्त्रालंकारसिंदूरै
र्गंधाद्यैःसुमनोहरैः ॥ १७ ॥ ताटंकैर्मुद्रिकाभिश्चगंधमाल्यैस्तथैवच ॥ सर्वपापंक्षयंयातिव्याधि
नाशोभवेद्ध्रुवम् ॥ १८ ॥ ब्राह्मणींपार्वतीरूपांब्राह्मणंशिवरूपिणम् ॥ भोजयेद्विविधैश्चान्नैर्मो
दकैःशतसंख्यकैः ॥ १९ ॥ काकवन्ध्यालभेत्पुत्रंमृतवत्साचपुत्रिणी ॥ कन्यकाजननीयातुपु
त्रवत्यपिजायते ॥ २० ॥ एवंनक्रियतेदेविसप्तजन्मस्वपुत्रकाः ॥ २१ ॥ इति श्रीकर्मविपाकसं
हितायामुत्तराषाढानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामषडशीतितमोऽध्यायः ॥ ८६ ॥
॥ शिवउवाच ॥ गुर्जरेनगरेदेविद्विजोवसतिज्ञानवान् ॥ वल्लभद्रःसमाख्यातोवेदान्वैपाठयेत्त
तः ॥ १ ॥ ऋग्वेदंचयजुर्वेदंसामवेदमथर्वणम् ॥ पठनंचैवकुरुतेचतुर्वेदीद्विजोत्तमः ॥ २ ॥ एक
स्मिन्दिवसेदेविकाश्चिद्देशेमृतःखलु ॥ भोजनं तेनवैकृत्वासंस्कारं वैविनाकृतम् ॥३॥ म्लेच्छद्रव्यं

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

चस्वीकृत्यभुक्तंपुत्रेणसंयुतम् ॥ पत्न्यासहवरारोहेततोवृद्धंवयोगतम् ॥ ४ ॥ मरणंतस्यवैजातं शंकेश्वरपुरेतदा ॥ यमाज्ञयातदादेवियमदूतैरितस्ततः ॥ ५ ॥ नरकंदर्शयामासमर्त्यलोकेत तोभवत् ॥ कुक्कुटत्वंविशालाक्षिकाकपारावतंततः ॥ ६ ॥ मानुषत्वंपुनर्लेभेशुभेदेविकुलेमह त् ॥ सपंडितोयदाविद्वाञ्ज्ञातिधर्मविचक्षणः ॥ ७ ॥ पूर्वजन्मनिदेवेशिम्लेच्छान्नंभोजनंकृतम् ॥ तेनपापेनभोदेविपुत्रःकन्यानजायते ॥ ८ ॥ प्रेतान्नंभुज्यतेज्ञानात्संस्कारोनकृतःपुरा ॥ तेनपा पेनभोदेविशरीरेरोगसंभवः ॥ ९ ॥ अस्यशांतिंशृणुष्वादौपूर्वपापप्रणाशिनीम् ॥ गृहवित्ताष्टमं भागंब्राह्मणायप्रकल्पयेत् ॥ १० ॥ गायत्रीमूलमंत्रेणदशायुतजपंततः ॥ हवनंतद्दशांशेनमा र्जनंतर्पणंतथा ॥ ११ ॥ दशवर्णांततोदद्याच्छय्यादानंविशेषतः ॥ कूष्मांडंनारिकेलंचपंचरत्नस मन्वितम् ॥ १२ ॥ गंगामध्येप्रदातव्यंपूर्वपापप्रणाशनम् ॥ एवंकृतेवरारोहेशीघ्रंपुत्रःप्रजायते ॥ ॥ १३ ॥ व्याधयःसंक्षयंयांतिकाकवन्ध्यालभेत्सुतम् ॥ १४ ॥ इति श्रीकर्मविपाकसंहिता यामुत्तराषाढानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामसप्ताशीतितमोऽध्यायः ॥ ८७ ॥

॥ शिवउवाच ॥ ॥ यवनस्यमहद्देशेमारुतेनगरेशुभे ॥ गौतमोनामविख्यातोब्राह्मणोवेदपार गः ॥ १ ॥ तस्यभार्याविशालाक्षिमालिनीमातृपालिनी ॥ धनंचबहुसंगृह्यम्लेच्छसेवारतोहिसः ॥ २ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तस्यामित्रंद्विजःकश्चित्तपस्वीसत्यवाक्छुचिः ॥ आगतस्तस्यनिकटेप्रेम्णातत्रतपःकरोत्
॥ ३ ॥ अब्दमेकंततोजातंपुनःकाश्यांगतोपिसः ॥ स्वर्णरत्नंमहादेविगौतमायसमार्पि
तम् ॥ ४ ॥ रक्षार्थंतेनद्रव्यंचगृहीतंगौतमेनच ॥ वाराणस्यांततोगत्वातपस्वीप्राणमत्यजत् ॥
॥ ५ ॥ गौतमेनस्वद्रव्यंतुस्थापितंभूमिमध्यगम् ॥ तद्द्रव्यंब्राह्मणस्यैवपुत्रदारेणसंयुतम् ॥ ६ ॥
भक्षितंरत्नंविक्रीयबहुवर्षगतंशिवे ॥ गौतमस्यततोमृत्युर्वृद्धेजातेवरानने ॥ ७ ॥ गंधर्वस्यततो
लोकेविंशतिर्वैसहस्रकम् ॥ वर्षंभुक्तंविशालाक्षिगंधर्वैःसहकिन्नरैः ॥ ८ ॥ ततःपुण्यक्षयेजातेहंस
योनिस्ततोऽभवत् ॥ मृगयोनिंततोभुक्त्वामानुषत्वंततोभवत् ॥ ९ ॥ सभाग्यवान्महावीरःपु
ण्याचारेसदामतिः ॥ पूर्वजन्मनिदेवेशिमित्रद्रव्यंचभक्षितम् ॥ १० ॥ अदत्तंयद्विशालाक्षितद्दोषेण
मृतार्भकः ॥ वन्ध्याभवतिवैनारीकाकवंध्याचजायते ॥ ११ ॥ रोगयुक्तोभवद्देहोज्वराश्चविवि
धास्तथा ॥ अस्यशांतिंप्रवक्ष्यामिशृणुदेविसुशोभने ॥ १२ ॥ गृहवित्तषडंशेनपुण्यकार्यंच
कारसः ॥ वापीकूपतडागानांजीर्णोद्धारंचकारयेत् ॥ १३ ॥ गायत्रीमूलमंत्रेणदशायुतजपंततः ॥ ॥६२॥
हवनंतद्दशांशेनतर्पणंमार्जनंतथा ॥ १४ ॥ गामेकांतरुणींशुभ्रांकांस्यदोहांसवत्सकाम् ॥ सतीं
सवस्त्रांविप्रायदद्याद्वेदविदेततः ॥ १५ ॥ ब्राह्मणान्भोजयामासयथाशक्त्यातुदक्षिणाम् ॥ ज्ञा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तिभिःसहभुंजीतततोदानंतुकारयेत् ॥ १६ ॥ पुराणश्रवणंदेविचंडिकाचरितानितु ॥ अन्नदा
नंचभोदेविघटदानंविशेषतः॥ १७॥ एवंकृतेनसंदेहोवंशवृद्धिर्भविष्यति ॥ रोगाःसर्वेक्षयंयांतिसुखा
निविविधानिच ॥१८॥ इ०क०पा० श्र०प्रथमचरणप्रा०कथनंनामाष्टाशीतितमोऽध्यायः ॥८८॥
॥ शिवउवाच ॥ ॥ गांधारदेशेवैसुभ्रूर्गांधारस्यपुरेशुभे ॥ वसंतितत्रबहवोजनाःपण्योपजीवि
नः ॥ १ ॥ तन्मध्येब्राह्मणोप्येकोलक्ष्मीवान्गुणवर्जितः ॥ यवनानांमहत्प्रीतिःसार्धंम्लेच्छेनति
ष्ठति ॥ २ ॥ ऊर्णादिकंवरारोहेविक्रयंकुरुतेसदा ॥ म्लेच्छान्नंभुज्यतेनित्यंम्लेच्छभार्यांसुसेवि
तः ॥ ३ ॥ एवंबहुवयोजातंततोवैमरणंखलु ॥ यमदूतैर्महाघोरेनरकेनामदारुणे ॥ ४ ॥ नि
क्षिप्तःसतुवैदेविषष्टिवर्षसहस्रकम् ॥ भुक्तंसुदुःसहंकर्मविविधंनरकजंफलम् ॥ ५ ॥ नरकान्निः
सृतोदेविवृकयोनिरभूत्पुरा ॥ रासभस्यततोयोनिमृक्षत्वंजायतेपुनः ॥ ६ ॥ मानुषत्वंपुनर्लं
भेमध्यदेशेसुरेश्वरि ॥ पूर्वजन्मनिम्लेच्छान्नंभुक्तंपुत्रेणवैसह ॥ ७ ॥ अतोवंशस्यविच्छेदोव्या
धीनांचोद्भवस्तथा ॥अस्यदोषस्यवैशांतिंशृणुमेपरमेश्वरि ॥ ८ ॥ गायत्रीमूलमंत्रेणलक्षजाप्यं
वरानने ॥ हवनंतद्दशांशेनतर्पणंमार्जनंतथा ॥ ९ ॥ सवृषंपंचगोदानंवस्त्रदानंविशेषतः ॥ सहस्रघ
टदानंचगोदानंचसुरेश्वरि ॥ १० ॥ एवंकृतेनसंदेहोवंशवृद्धिर्भविष्यति ॥ रोगाविनाशमायांति

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

नात्रकार्याविचारणा ॥ ११ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेश्रवणनक्षत्रस्यद्वि
तीयचरणप्रायश्चित्तकथनंनामैकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ छ ॥ ॥ छ ॥
॥ शिवउवाच ॥ काश्मीरनगरेदेविब्राह्मणोवसतिप्रिये ॥ खंडशर्मेतिविख्यातोगंगाभार्याति
कर्कशा ॥ १ ॥ पतिवाक्यंनसाकुर्याद्विक्रयंकुरुतेसदा ॥ घृतं तैलंचदेवेशिदधितक्रंपुनर्गुडम् ॥
॥ २ ॥ अश्वंचवृषभंचैवचामरंधातुसंयुतम् ॥ प्रत्यहंविक्रयंकृत्वाव्ययंकुर्याद्दिनेदिने ॥ ३ ॥
एवंसर्ववयोजातंवृद्धेसातिवरानने ॥ मरणंतस्यवैजातंब्राह्मणस्यतदाशिवे ॥ ४ ॥ यमाज्ञयायम
दूतैर्नरकेकर्दमेतथा ॥ निक्षिप्तःषष्टिसाहस्रंभुक्त्वावैयातनांतथा ॥ ५ ॥ नरकान्निःसृतोदेवि
वृकयोनिस्ततोऽभवत् ॥ रासभस्यपुनर्योनिर्मेषयोनिस्ततोऽभवत् ॥ ६ ॥ मानुषत्वंपुनर्लेभेमध्य
देशेवरानने ॥ धनधान्यसमायुक्तःपुत्रकन्याविवर्जितः ॥ ७ ॥ पुनर्विवाहितासातुपूर्वजन्मफला
च्छुभे ॥ शरीरेसततंरोगोवाधोःसंजायतेशिवे ॥ ८ ॥ ब्राह्मणश्चस्वयंधर्मंयतस्तत्त्वापुराशुभे ॥
अतःपुत्रविहीनोयंमृतवत्सत्वमाप्नुयात् ॥ ९ ॥ अस्यशांतिमहंवक्ष्येशृणुदेविशुभानने ॥ गृहवि
त्तषडंशंचब्राह्मणायसमर्पयेत् ॥ १० ॥ गायत्रींचायुतंजप्त्वामूलमंत्रंशिवस्यतु ॥ षडक्षरंसप्रण
वंलक्षंकंचवरानने ॥ ११ ॥ हवनंतद्दशांशेनमार्जनंतर्पणंतथा ॥ ब्राह्मणान्भोजयामासहविषापा ॥६३॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

यसेनतु ॥ १२ ॥ पंचाशत्संख्ययादेवियथाशक्त्यातुदक्षिणाम् ॥ प्रयागेमाघमासेतुस्नानंभार्यासमन्वितम् ॥ १३ ॥ कूष्मांडंनारिकेलंचपंचरत्नसमन्वितम् ॥ गंगामध्येप्रदातव्यंविधिपूर्वंवरानने ॥ १४ ॥ एवंकृतेनसंदेहोवंशवृद्धिर्भवेदनु ॥ रोगाःसर्वेक्षयंयांतिवन्ध्याभवतिपुत्रिणी ॥ १५ ॥ इति श्रीक०सं०पा०श्रवणनक्षत्रस्यतृतीयचरणप्रायाश्चित्तकथनंनामनवतितमोऽध्यायः ॥ ९० ॥

॥ शिवउवाच ॥ ॥ अटकस्यप्रतीच्यांतुयादवंनामवैपुरम् ॥ वसंतिबहवोदेविजनाःकर्मविचक्षणाः ॥ १ ॥ तन्मध्येब्राह्मणोप्येकःसिद्धलालइतिश्रुतः ॥ तस्यभार्याविशालाक्षिदेवीनामसदाशिवे ॥ २ ॥ पतिव्रतागुणोपेतामिष्टवाक्यप्रवादिनी ॥ सिद्धलालोमहाचोरश्चौर्यवृत्तिरतःसदा ॥ ३ ॥ दारपुत्रादिभृत्यांश्चचौर्यंकृत्वाप्रपोषयत् ॥ एवंसर्ववयोजातंततोवैमरणंभवेत् ॥ ४ ॥ तस्यभार्यासतीजातातस्यलोकोभवत्तदा ॥ सत्यलोकेवरारोहेसततंविविधंसुखम् ॥ ५ ॥ भुक्त्वापूर्वकृतंपुण्यंततःपुण्यक्षयेसति ॥ मानुषत्वंपुनर्जन्मलभतेसर्वदेहिनाम् ॥ ६ ॥ धनधान्येनसंयुक्तः कन्यापुत्रविवर्जितः ॥ ब्राह्मण्यंचततस्त्यक्त्वाशूद्रकर्मसमाचरेत् ॥ ७ ॥ परद्रव्यंहृतंदेवितस्माद्व्याधिश्चजायते ॥ अस्यशांतिंप्रवक्ष्यामियत्कृतंपूर्वजन्मनि ॥ ८ ॥ गृहवित्ताष्टमंभागंपुण्यकार्येचकारसः ॥ दशवर्णांचगोदानंपूर्वपापविशुद्धये ॥ ९ ॥ शय्यादानंततः कुर्याद्व्रतमेकाद

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

शोंशुभाम् ॥ गायत्रीमूलमंत्रेणविष्णुमंत्रंतथैवच ॥१०॥ लक्षजाप्यंप्रयत्नेनमूलेअश्वत्थाबिल्वके ॥
दशांशंहवनंकुर्यात्तर्पणंमार्जनंतथा ॥ ११ ॥ विप्राणांभोजनंदेविघटदानंविशेषतः ॥ एवंकृतेनसं
देहोवंशोभवतिनान्यथा ॥ १२ ॥ व्याधयःसंक्षयंयांतिममवाक्यंनचान्यथा ॥१३॥ इति श्रीक०
संहितायांपा०श्रवणनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनंनामैकनवतितमोऽध्यायः ॥ ९१ ॥
॥ शिवउवाच ॥ ॥ देशेपंचनदेदेविगंगानाम्नीपुरीशुभा ॥ वसंतिसर्ववैवर्णाब्राह्मणाःक्षत्रिया
विशः ॥ १ ॥ स्वकर्मनिरताःसर्ववर्णाचारसमाश्रिताः ॥ तन्मध्येब्राह्मणोऽप्येकःकृषिकर्मरतःस
दा ॥ २ ॥ एकस्मिन्समयेदेविसिद्धमन्नंचतैःकृतम् ॥ रात्रिस्तत्रसमायाताक्षेत्रे चान्नंतदाकृतम् ॥
॥ ३ ॥ भागिनेयस्तदारात्रौचतुर्थांशमचूचुरत् ॥ उषःकालेततोजातेभागिनेयस्यवैतदा ॥ ४ ॥
मातुलेनतदादेविवधंकृत्वातुयष्टिना ॥ ततोबहुगतेकालेतस्यविप्रस्यपंचता ॥ ५ ॥ यमदूतैर्महादे
विनिःक्षितोनरकार्णवे॥अष्टाशीतिसहस्राणिवर्षाणिचसदाशिवे ॥ ६ ॥ भुज्यतेविविधंकष्टंनरकंचैव
दारुणम् ॥ नरकान्निःसृतोदेविमार्जारत्वंभवेत्किल ॥ ७ ॥ व्याघ्रस्यचपुनर्योनिःकुक्कुटत्वंततो ॥६४॥
भवत् ॥ पुनर्मानुषयोनिश्चधनधान्यसमन्विता ॥ ८ ॥ सप्रवीणोमहावक्ताकुलाचाररतःसदा ॥
पूर्वजन्मनिभोदेविभागिनेयस्यवैवधः ॥ ९ ॥ कृतोवैमंदमतिनातत्पापेनैवपातकम् ॥ पुत्रोनजा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

यतेदेविव्याधिश्चैवपुनः पुनः ॥ १० ॥ अस्यशांतिंप्रवक्ष्यामिशृणुमत्तोवरानने ॥ गृहवित्तषडंशे
नपुण्यकार्यंचकारसः ॥ ११ ॥ गायत्रीत्र्यंबकाभ्यांचद्यौःशांतीतिमंत्रत्रयम् ॥ लक्षत्रयंवरारोहे
जपंवैकारयेत्सुधीः ॥ १२ ॥ दशांशंहवनंदेवितर्पणंमार्जनंतथा ॥ ब्राह्मणान्भोजयामासपंचाश
च्चवरानने ॥ १३ ॥ हविषापायसेनापिखंडेनमोदकेनवै ॥ दशवर्णाततोदानंतिलधेनुंप्रदापयेत् ॥
॥ १४ ॥ पंचपात्रंततोदानंपिंडदानंचकारसः ॥ भागिनेयस्यवैमूर्तिःसुवर्णरजतान्विता ॥ १५ ॥
पलदशसुवर्णेनसवत्सांपीठसंयुताम् ॥ पूजयामासविधिवन्मंत्रेणानेनवैशिवे ॥ १६ ॥ सु[illegible]राध्य
जगत्स्वामिंश्चराचरगुरोहरे ॥ ममपूर्वकृतंपापंतत्क्षमस्वदयानिधे ॥ १७ ॥ अज्ञानाद्वाप्रमादा
द्वाभागिनेयवधःकृतः ॥ तत्क्षमस्वदयापूर्णत्र्यंबकत्रिपुरांतक ॥ १८ ॥ ततोवैपूजयामासलो
कपालान्पृथक्पृथक् ॥ पश्चान्माषबलिंदद्यात्प्रतिमांदापयेत्ततः ॥ १९ ॥ ब्राह्मणायतदादे
विपूर्वपापविशुद्धये ॥ एवंकृतेवरारोहेपुत्रःसंजायतेखलु ॥ २० ॥ व्याधयः संक्षयंयांतिनक
न्याजायतेखलु ॥ यदानाक्रियतेदेविसप्तजन्मस्वपुत्रकः ॥ २१ ॥ इति श्रीकर्मविपाकसंहितायां
पार्वतीहरसंवादेधनिष्ठानक्षत्रस्यप्रथमचरणप्रायाश्चित्तकथनंनामद्विनवतितमोऽध्यायः ॥ ९२ ॥
॥ शिवउवाच ॥ ॥ पश्चिमायांमहादेवियवनस्यपुरंमहत् ॥ महानंदइतिख्यातंसर्वदेशेषुरे

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

श्वरि ॥ १ ॥ वसंतिबहवोम्लेच्छाः स्वविद्यायांविचक्षणाः ॥ ब्राह्मणस्तत्रवेदविविद्यावान्निपुण
स्तथा ॥ २ ॥ तिष्ठत्यशंकयानित्यंम्लेच्छान्नंभुज्यतेसदा ॥ ससंध्यारहितोविप्रःपिशुनोदु
र्मतिःशठः ॥ ३ ॥ संचितंबहुसाहस्रंस्वर्णरत्नगजादिकम् ॥ ततोबहुदिनेजातेतस्यमृत्युरभूत्पुरा ॥
॥ ४ ॥ सर्पेणदष्टोदेवेशिपंचकेनिर्जलेपिवा ॥ यमदूतैर्महादेवियमाज्ञांगृह्यवैद्विजम् ॥ ५ ॥ रौ
रवेक्षिप्तवाञ्छीघ्रंमहाकष्टंप्रभुज्यते ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकयातनाम् ॥ ६ ॥ नरकान्निः
सृतोदेविग्राहयोनिरभूत्पुरा ॥ पुनःकच्छपयोनिंचमानुषत्वंततोऽलभत् ॥ ७ ॥ पूर्वजन्मनि
भोदेविब्राह्मणत्वंयतोऽत्यजत् ॥ अपुत्रत्वंततोदेविकन्यकानैवजायते ॥ ८ ॥ म्लेच्छान्नंभुज्य
तेदेविसंध्यांचतर्पणंविना ॥ अतोव्याधियुतोनित्यंनसुखंलभतेक्वचित् ॥ ९ ॥ शांतिंशृणुवरा
रोहेपूर्वपापप्रणाशिनीम् ॥ गृहंशुभ्रंवरारोहेधनधान्यसमन्वितम् ॥ १० ॥ संचितान्नंवरारोहेब्राह्मणा
यप्रदापयेत् ॥ गायत्रीमूलमंत्रेणलक्षजाप्यंतुकारयेत् ॥ ११ ॥ हवनंतद्दशांशेनमार्जनंतर्पणंत
था ॥ त्रैमासिकव्रतंकुर्याद्व्रतंचरविसप्तमीम् ॥ १२ ॥ जातवेदेतिमंत्रेणलक्षजाप्यंतुकारयेत् ॥
ततोगांकपिलांदेविस्वर्णवस्त्रविभूषिताम् ॥ १३ ॥ दद्यात्सवत्सांविधिवद्ब्राह्मणायशिवात्मने ॥
अश्वदानंचकर्तव्यंचामरंछत्रमेवच ॥ १४ ॥ एवंकृतेनसंदेहोव्याधिनाशोभवेद्ध्रुवम् ॥ पुत्रोपि

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE.

जायतेदेविवंध्यत्वंचप्रशाम्यति ॥ १५ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेधनिष्ठा नक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामत्रिनवतितमोऽध्यायः ॥ ९३ ॥ ॥

॥ शिवउवाच ॥ ॥ यत्किंचित्क्रियतेकर्म वैदिकंचापिलौकिकम् ॥ तत्तत्कर्मफलंभोग्यमिह लोकेपरत्रच ॥ १ ॥ सौराष्ट्रनगरेदेविक्षत्रियोवसतिप्रिये ॥ क्षात्रधर्मरतोनित्यंमृगपक्षिप्रहारकः ॥ ॥ २ ॥ एकस्मिन्समयेकालेवनंयातःसदुर्मतिः ॥ मृगींसगर्भांहतवान्बालकद्वयसंयुताम् ॥ ॥ ३ ॥ पुत्रेणभार्ययासार्धंभुक्तंतेनदुरात्मना ॥ ततोवृद्धेतुसंजातेतस्यमृत्युरभूत्किल ॥ ४ ॥ यमदूतैर्महादेविनरकेक्षिप्तवांस्तदा ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकयातनाम् ॥ ५ ॥ नरकान्निः सृतोदेविमहिषोजायतेखलु ॥ वराहत्वंपुनर्जातंमानुषत्वंपुनर्भवेत् ॥ ६ ॥ देशेपुण्यतमेदेवि धनधान्यसमन्वितः ॥ विद्यावान्गुणवान्वक्ताराजसेवासुतत्परः ॥ ७ ॥ पूर्वजन्मनिदेवेशिहत्वा मृगगणान्बहून् ॥ प्रसवोन्मुखींमृगींहत्वामृगवृंदसमन्विताम् ॥ ८ ॥ तत्पापेनमहादेविमृतवत्स त्वमाप्नुयात् ॥ शरीरेबहवोरोगाज्वराश्चातुर्थिकास्तथा ॥ ९ ॥ शांतिंशृणुवरारोहेमृतवत्सत्व शांतये ॥ गृहवित्ताष्टमंभागंपुण्यकार्यंचकारसः ॥ १० ॥ गायत्रीमूलमंत्रेणलक्षजाप्यंतुकार येत् ॥ हवनंतद्दशांशेनमार्जनंतर्पणंततः ॥ ११ ॥ पलपंचसुवर्णस्यमृगींवत्ससमन्विताम् ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

कृत्वासमर्पयामासब्राह्मणायशिवात्मने ॥ १२ ॥ दशवर्णांततोदानंशय्यादानंविशेषतः ॥ वा
टिकांरोपयामासपांथिकूपंतथाशिवे ॥ १३ ॥ ब्राह्मणान्भोजयामासशतसंख्यान्समोदकैः ॥ ए
वंकृतेवरारोहेपुत्रःसंजायतेखलु ॥ १४ ॥ व्याधयःसंक्षयंयांतिवन्ध्यात्वंचप्रशाम्यति ॥ मृतव
त्सातुयानारीसुतंसानुग्रहंलभेत् ॥ १५ ॥ काकवन्ध्यापुनःपुत्रंलभतेनात्रसंशयः ॥ १६ ॥ इ०
क०पार्व०धनिष्ठानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामचतुर्नवतितमोऽध्यायः ॥ ९४ ॥
॥ शिवउवाच ॥ ॥ मथुरादक्षिणेभागेयोजनानांत्रयोपरि ॥ पुरंसिद्धमितिख्यातंवसंतिबहवो
जनाः ॥ १ ॥ छीपकारोवसत्येकोधनधान्यसमन्वितः ॥ बलभद्रइतिख्यातोवैष्णवोज्ञानवल्ल
भः ॥ २ ॥ तस्यपुत्रत्रयंजातंकनीयांस्तस्यचादरम् ॥ नादरंज्येष्ठपुत्रस्यमध्यमस्यतथैवच ॥
॥ ३ ॥ बहुधनंसंचितंतेनमहाशूद्रेणचानघे ॥ भ्रातॄणांविग्रहोजातोविभागार्थंधनस्यतु ॥ ४ ॥
ब्राह्मणस्तस्यवैमित्रंविग्रहस्तस्यवैश्रुतः ॥ आगतस्यास्यनिकटेछीपकारस्यवैशिवे ॥ ५ ॥
ब्राह्मणस्यवधोजातःशूद्राणांविग्रहेसति ॥ सर्वद्रव्यंकनिष्ठायछीपकारोददौस्वयम् ॥ ६ ॥ एवं
बहुगते कालेशूद्रस्यमरणंभवेत् ॥ रौरवंनरकंजातंछीपकारायवैस्वयम् ॥ ७ ॥ लक्षवर्षवरारो ॥६६॥
हेभुक्त्वानरकयातनाम् ॥ नरकान्निःसृतोदेविव्याघ्रयोनिस्ततोभवत् ॥ ८ ॥ ततोगृध्रस्यवैयो
CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

निकाकयोर्निततोभवत् ॥ मानुषत्वंपुनर्जातंमध्यदेशेसुरेश्वरि ॥ ९ ॥ धनधान्यसमायुक्तोरो
गवान्पुत्रवर्जितः ॥ अस्यशांतिंप्रवक्ष्यामिशृणुमेपरमेश्वरि ॥ १० ॥ गृहवित्तषडंशेनपुण्यकार्यं
चकारयेत् ॥ पूर्वपापविशुद्ध्यर्थंदशवर्णांततोददेत् ॥ ११ ॥ गायत्रीसूर्यमंत्राभ्यांलक्षजाप्यंवरा
नने ॥ दशांशंहवनंदेविमार्जनंतर्पणंतथा ॥ १२ ॥ दशांशंभोजयेद्विप्रान्ब्राह्मणान्वेदपारगान् ॥
कूष्मांडंनारिकेरंचपंचरत्नसमन्वितम् ॥ १३ ॥ गंगामध्येप्रदातव्यं देविसत्यव्रतायच ॥ एवं
कृतेवरारोहेसर्वरोगक्षयोभवेत् ॥ १४ ॥ वंशवृद्धिर्भवेत्तस्यनात्रकार्याविचारणा ॥ १५ ॥ इति
श्रीक०सं०पा० धनिष्ठानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामपंचनवतितमोऽध्यायः ॥९५ ॥
॥ शिवउवाच ॥ ॥ मथुरायांविशालाक्षिआभीरस्तत्रतिष्ठति ॥ गोपालेतिसमाख्यातःसदागो
धनजीवितः ॥ १ ॥ तस्यभार्याविशालाक्षीसतीनामातिसुंदरी ॥ गोधनंबहुसाहस्रंगोपालस्यसुरे
श्वरि ॥ २ ॥ वत्सानांवृषभाणांचपालनंक्रियतेसदा ॥ शीतकालेमहादेविवृष्टिर्जातावरानने ॥
॥ ३ ॥ गोःसवत्सामहादेविपीडिताभोजनंविना ॥ गृहाभावेमृताबाह्येवृषवत्ससमन्विता ॥ ४ ॥
ततोबहुगतेकालेगोपालस्यमृतिस्तदा ॥ यमदूतैर्महाघोरेनरकेनामकर्दमे ॥ ५ ॥ क्षिप्तंयमाज्ञ
यादेविषष्टिवर्षसहस्रकम् ॥ नरकान्निःसृतोदेविभेकयोर्निततोभवत् ॥ ६ ॥ सरठस्यततोदेवि

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

मानुपत्वंततोभवत् ॥ धनधान्यसमायुक्तोव्याधाभिःपीडितःसदा ॥ ७ ॥ अपुत्रत्वंततोलेभेक
न्यकाजायतेखलु ॥ निर्बीजंवृषभंतेनकृतंयोगेनवैशिवे ॥ ८ ॥ तेनपापेनभोदेविगर्भपातंपुनःपु
नः ॥ तस्यशांतिमहंवक्ष्येशृणुदेविसुशोभने ॥ ९ ॥ वसंतेमासिवैकुर्याद्धटदानंसहस्रशः ॥ एका
दशीव्रतंनित्यंवेण्यांस्नानंसमाचरेत् ॥ १० ॥ दशवर्णांचगोदानंशय्यादानंतथैवच ॥ आकृष्णे
तिजपंकुर्याल्लक्षसंख्यंवरानने ॥ ११ ॥ दशांशंहवनंतद्वन्मार्जनंतर्पणंतथा ॥ भोजयामासदेवो
वैब्राह्मणंश्रोत्रियंशतम् ॥ १२ ॥ पायसान्नेनखंडेनघृतेनदधिनातथा ॥ एवंकृतेनसंदेहोज्वरमो
क्षःप्रजायते ॥ १३ ॥ वंशवृद्धिर्भवेत्तस्यमृतवत्साचपुत्रिणी ॥ काकवन्ध्यापुनःपुत्रंलभतेनात्र
संशयः ॥ १४ ॥ इति श्रीकर्मविपाकसंहितायांशिवपार्वतीसंवादेशनभिषानक्षत्रस्यप्रथमचरण
प्रायश्चित्तकथनंनामषण्णवतितमोऽध्यायः ॥ ९६ ॥ ॥ ॥ ॥ ॥
॥ शिवउवाच ॥ ॥ मध्यदेशेमहेशानिलुब्धकोवसतिप्रिये ॥ मृगारिर्नामविख्यातोमृगमांसेन
जीवति ॥ १ ॥ प्रत्यहंमृगयांयातिपक्षिणांमारणेरतः ॥ विक्रयंकुरुतेमांसंकलत्रंपोषयेत्सदा ॥
॥ २ ॥ एवंवयोगतंसर्वंवृद्धेसतिवरानने ॥ मरणंतस्यवैजातंयमदूतैर्यमाज्ञया ॥ ३ ॥ रौरवेनर
केक्षिप्तंतत्रकष्टंमुहुर्मुहुः ॥ सप्ततिर्वैसहस्राणिनरकेपरिपच्यते ॥ ४ ॥ नरकान्निःसृतोदेविकृत्ये

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

नयोर्निप्रजायते ॥ उष्ट्रस्यचपुनर्योनिं शृगालत्वंततःपुनः ॥ ५ ॥ मानुषत्वंततोजातंधनधान्ये
नसंयुतम् ॥ पूर्वजन्मनिदेवेशिपक्षिणोबहवोहताः ॥ ६ ॥ तेनपापेनभोदेविव्याधिसंछादितात
नुः ॥ मृगंहत्वावरारोहेहतंचमृगशावकम् ॥ ७ ॥ एतद्दोषेणभोदेविपुत्राणांमरणंखलु ॥ काक
वन्ध्याभवेन्नारीकन्यकाजायतेसदा ॥ ८ ॥ वन्ध्याभवतिवैनारीशांतिंशृणुवरानने ॥ गृहावित्तष
डंशेनपुण्यंकार्यंचकारसः ॥ ९ ॥ गायत्रीजातवेदाभ्यांलक्षजाप्यंवरानने ॥ दशांशंहवनंतद्वन्मा
र्जनंतर्पणंतथा ॥ १० ॥ दशधेनूस्ततोदद्यात्स्वर्णदानंविशेषतः ॥ हरिवंशश्रवणं देविव्रतंचहरि
वासरम् ॥ ११ ॥ ब्राह्मणान्भोजयामासयथाशक्त्यातुदक्षिणाम् ॥ एवंकृतेवरारोहेवंशस्तस्यभ
विष्यति ॥ १२ ॥ वंध्यात्वंप्रशमंयातिकाकवन्ध्यापुनःसुतम् ॥ मृतवत्सासुतंलेभेचिरंजीविन
मुत्तमम् ॥ १३ ॥ व्याधयःसंक्षयंयांतिज्ञानंचलभतेमहत् ॥ १४ ॥ इति श्रीकर्मविपाकसं०
पा०संवादे०शतभिषानक्षत्रस्याद्वितीयचरणप्रायश्चित्तकथनंनामसप्तनवतितमोऽध्यायः ॥ ९७ ॥
॥ शिवउवाच ॥ गोमतीनिकटेदेविपुरंख्यातंधुरंधरम् ॥ वसंतिबहवोदेविजनाधर्मविचक्षणाः ॥
॥ १ ॥ तन्मध्येब्राह्मणोह्येकोब्रह्मकर्मविवर्जितः ॥ द्यूतकर्मरतःसोपिवेश्यासुरततत्परः ॥ २ ॥
मद्यपानरतोनित्यं वेदशास्त्रविनिंदकः ॥ ततोबहुदिनेदेवितस्यमृत्युरभूत्पुरा ॥ ३ ॥ यमदूते

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

महाघोरेनरकेषुनिपातितः ॥ क्षिप्तवान्नरकेघोरेलक्षवर्षमहेश्वरि ॥ ४ ॥ नरकान्निःसृतोदेवि
वृकयोनिरभूत्पुरा ॥ वराहस्यपुनर्योनिंगर्दभत्वंततोभवत् ॥ ५ ॥ मानुषत्वंततोलेभेदेशेपुण्य
तमेशुभे ॥ पूर्वजन्मनिदेवेशिमद्यपानरतःसदा ॥ ६ ॥ तेनपापेनभोदेविशरीरेरोगसंभवः ॥
द्यूतवेश्यारतोनित्यंयत्कृतंपूर्वजन्मनि ॥ ७ ॥ तेनपापेनभोदेविवंशच्छेदश्चजायते ॥ शांतिं
शृणुवरारोहेपूर्वपापप्रणाशिनीम् ॥ ८ ॥ गृहवित्तषडंशेनपुण्यकार्यंचकारसः ॥ विष्णोरराट
मंत्रेणलक्षजाप्यंवरानने ॥ ९ ॥ दशांशंहवनंतद्वन्मार्जनंतर्पणंतथा ॥ ब्राह्मणान्भोजयेत्पश्चात्पं
चाशच्चवरानने ॥ १० ॥ ततोगांकृष्णवर्णांचस्वर्णशृंगींविभूषिताम् ॥ पट्टवस्त्रांसवत्सांचदद्या
द्द्विजवरायच ॥ ११ ॥ प्रतिमांतुततःकुर्याद्विष्णोःसांबस्यवाशिवे ॥ पलदशसुवर्णस्यविष्णो
र्मुक्ताविभूषिताम् ॥ १२ ॥ तद्वद्देवशिवस्यैवरजतस्यवरानने ॥ नानावस्त्रैरलंकारैःपूजयित्वा
यथाविधि ॥ १३ ॥ मंत्रेणानेनदेवेशितद्वद्देवगणंनमेत् ॥ गरुडध्वजदेवेशभूतनाथदयानिधे ॥
॥ १४ ॥ ममपूर्वकृतंपापंतत्क्षमस्वदयानिधे ॥ ॐ सुदर्शनायनमः ॥ ॐ त्रिशूलायनमः ॥ ॥६८॥
ॐ गरुडायनमः ॥ ॐ भैरवायनमः ॥ ॐ जयायनमः ॥ ॐ विजयायनमः ॥ ॐ बटुकाय
नमः ॥ ॐ कालभैरवायनमः ॥ गंधधूपादिभिर्देविपूजयित्वापृथक्पृथक् ॥ १५ ॥ प्रतिमांपू

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

जितांतांतुविप्रायप्रददौस्वयम् ॥ ततोविष्णुंनमस्कृत्याशिवंसर्वसुखप्रदम् ॥ १६ ॥ एवं कृते नसं
देहःसर्वपापक्षयोभवेत् ॥ वंशवृद्धिर्भवेत्तस्यव्याधिनाशोभवेद्ध्रुवम् ॥ १७ ॥ इति श्रीकर्मविपाकसं
हितायांपा० शताभिषानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनं नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥
॥ शिवउवाच ॥ ॥ पंचक्रोशमितेदेविमथुरायास्तथोत्तरे ॥ हेमंतनामकपुरंवसंतिबहवोजनाः ॥
॥ १ ॥ तन्मध्येवैश्यएकोहिक्रयविक्रयतत्परः ॥ ससुकर्मइतिख्यातोधनंचबहुसंचितम् ॥ २ ॥
तस्यस्त्रीपार्वतीनामरूपयौवनसंयुता ॥ वैश्यश्चैवमहादेविप्रौढियातःसुरेश्वरि ॥ ३ ॥ दरिद्रत्वं
भवेद्देविदरिद्रत्वात्सुपीडितः ॥ शतंपंचऋणंनीतंब्राह्मणस्यसुरेश्वरि ॥ ४ ॥ व्यापारार्थंविशा
लाक्षिनदत्तंब्राह्मणायवै ॥ सर्वंभुक्तंमहादेविबहुकालेगतेसति ॥ ५ ॥ वैश्यस्यैवभवेन्मृत्युःसभा
र्यस्यवरानने ॥ मथुरायांविशालाक्षिलब्धंस्वर्गंवरंशुभम् ॥ ६ ॥ दशलक्षमितंस्वर्गफलंभुक्तंवरा
नने ॥ भुक्तंसहकलत्रेणततःपुण्यक्षयेसति ॥ ७ ॥ मानुषत्वंपुनर्लेभेदेशेस्मिन्मनोहरे ॥ धनधान्य
समायुक्तोजायतेवैसुरेश्वरि ॥ ८ ॥ पूर्वजन्मनिदेवेशिब्राह्मणस्यधनंहृतम् ॥ नदत्तंतेनवैदेवित
तःपुत्रोनजायते ॥ ९ ॥ अत्रशांतिंप्रवक्ष्यामियतःपापस्यसंक्षयः ॥ गृहवित्तषडंशेनपुण्यकार्यंच
कारसः ॥ १० ॥ आकृष्णेतिततोमंत्रंलक्षजाप्यंचकारयेत् ॥ दशांशंहवनंकुर्याद्दशांशंतर्पणंत

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

था ॥ ११ ॥ हरिवंशश्रवणंदेविचंडीपाठंशिवार्चनम् ॥ विधिवत्कारयेत्तत्रब्राह्मणान्भोजयेत्त
तः ॥ १२ ॥ दशवर्णांततोदानंशय्यादानंविशेषतः ॥ एवंकृतेवरारोहेवंशोभवतिनान्यथा ॥
॥ १३ व्याधिनाशंसमायातिममवाक्यंचनान्यथा ॥ १४ ॥ ॥ इति श्रीकर्मविपाकसं०
शिवपार्वतीसं० शतभिषानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामैकोनशततमोऽध्यायः ॥ ९९ ॥
॥ शिवउवाच ॥ ॥ मथुरायांपुरीमध्येशूद्रएकोहितिष्ठति ॥ शाकंकरोतिसततंविक्रयंतुसदा
करोत् ॥ १ ॥ विष्णुभक्तिरतःशांतःपुण्यात्मासाधुसंमतः ॥ सेवादासइतिख्यातस्तस्यपती
तुराधिका ॥ २ ॥ कुलाचाररतःसाधुर्द्विजसेवासुतत्परः ॥ वाणिज्यंकुरुतेसाधुःपुरोहितधनेन
च ॥ ३ ॥ बहुवर्षगतंदेविब्राह्मणोपितदागतः ॥ आदरंबहुधाकृत्वाकलत्रेणतदाशिवे ॥४॥ वि
षंदत्तंचतुर्थेन्हिभोजनेसमयेसति ॥ नजानातितदासाधुस्तद्दत्तंब्राह्मणस्यतु ॥ ५ ॥ मरणंवैततो
जातंब्राह्मणस्यसुरेश्वरि ॥ ब्राह्मणस्यवधेजातेहाहाकारंगृहेगृहे ॥ ६ ॥ श्रुत्वासाधुःपुरींत्यक्त्वा
प्रयागेसमुपागतः ॥ देहंत्यक्त्वातदासाधुर्हठंकृत्वावरानने ॥ ७ ॥ पश्चात्तदाततोगत्वापत्नीप्र
णांस्ततोऽत्यजत् ॥ प्रयागेमथुरांत्यक्त्वातदुद्देशेनशोभने ॥ ८ ॥ बहुवर्षसहस्राणिस्वर्गवासंत
तोभवत् ॥ ततःपुण्यक्षयेजातेमानुषत्वंततोभवत् ॥ ९ ॥ शूद्रयोनौविशालाक्षिदेहजस्यकुले

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तदा ॥ पुनर्विवाहितापत्नीपूर्वंजन्मप्रपंचतः ॥ १० ॥ धनधान्यसमायुक्तोविद्यावान्कुलपूज
कः ॥ गौरांगोनीचजातीनांमतज्ञोलब्धवान्स्वयम् ॥ ११ ॥ पूर्वजन्मनिभोदेविब्राह्मणायविषंद
दौ ॥ भार्यातस्यविशालाक्षितत्पापेनैवपातकी ॥ १२ ॥ मासिपुष्पंततस्तस्याःसंतानंनैवजाय
ते ॥ अस्यपापस्यवैशांतिंशृणुदेविसुशोभने ॥ १३ ॥ गृहवित्ताष्टमंभागंपुण्यकार्यंचकारसः ॥
गायत्रीजातवेदाभ्यांत्र्यंबकेणवरानने ॥ १४ ॥ लक्षत्रयंजपंदेविकारयामासयत्नतः ॥ हरिवंश
श्रवणंदेविभार्यया सहितस्तदा ॥ १५ ॥ होमंवैकारयामासकुंडेशुद्धेवरानने ॥ चतुष्कोणेवि
शालाक्षियोनिपल्लवशोभिते ॥ १६ ॥ दशांशंविधिवद्देवितर्पणंमार्जनंततः ॥ ब्राह्मणस्यततोमू
र्तिंपलपंचदशस्यतु ॥ १७ ॥ विधिवत्कारयामासपूजयामासबुद्धिमान् ॥ वस्त्रालंकारशय्याभि
र्भूषणैर्विविधैस्तथा ॥ १८ ॥ मंत्रेणानेनदेवेशिगंधपुष्पैःपृथक्पृथक् ॥ सर्वकारणकर्त्तात्वंसाक्षि
भूतोजगत्रये ॥ १९ ॥ पापंब्रह्मवधंघोरंहरमेभुवनाधिप ॥ ॐचक्रधरायनमः ॥ ॐ त्र्यम्बकायन
मः ॥ ॐगदाधरायनमः ॥ ॐशूलहस्तायनमः ॥ ॐशार्ङ्गहस्तायनमः ॥ ॐशङ्खहस्तायनमः ॥
सनकंसनत्कुमारंसनन्दनंसनातनम् ॥ २० ॥ पूजयामासविविधैर्मोदकैश्चफलैरपि ॥ प्रतिमांपू
जितांतांतुस्वविप्रायप्रदापयेत् ॥ २१ ॥ दशवर्णांसवृषभांपट्टवस्त्रविभूषिताम् ॥ दद्याद्विप्रायवि

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

दुषश्रोत्रियायतपस्विने ॥ २२ ॥ व्रतंचकारयामासरविवारेणसत्तमे ॥ एवंकरोतिदेवेशिपुत्रयुगंप्रजायते ॥ २३ ॥ कन्यामेकांवरारोहेरोगःसर्वोविनश्यति ॥ २४ ॥ ॥ इति श्रीकर्मविपाकसंहितायांपा० पूर्वाभाद्रपदानक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामशततमोऽध्यायः ॥ १०० ॥

॥ शिवउवाच ॥ ॥ धर्मेणजायतेपुत्रोधर्मेणलभतेश्रियम् ॥ धर्मेणव्याधिनाशःस्यात्तस्माद्धर्मपरोभवेत् ॥ १ ॥ कांपिल्येनगरेदेविब्राह्मणस्तत्रतिष्ठति ॥ सवेदपाठनिरतोधनाढ्यश्चबहूद्यमी ॥ ॥ २ ॥ तस्यपत्नीवरारोहेपतिसेवासुतत्परा ॥ एकदाचागताकन्याब्राह्मणस्यकिलानघे ॥ ३ ॥ पुत्रेणसहदेवेशिचादरं तेनवैकृतम् ॥ ततोबहुदिनेजातेतस्यस्वर्णंचचोरितम् ॥ ४ ॥ कन्यापुत्रायसर्वेणस्वर्णंप्रतिसदाशिवे ॥ उक्तंचानेनवैस्वर्णंहृतंतुब्राह्मणंप्रति ॥ ५ ॥ ततोरोषपरीतात्मापौत्रोभवतिवैशिवे ॥ विषंभुक्तंतदातेनबहुरोगाकुलेनतु ॥ ६ ॥ मरणंतस्यवैजातंपौत्रस्यैववरानने ॥ ततोबहुदिनेजातेब्राह्मणस्यतदामृतिः ॥ ७ ॥ तस्यपत्नीसतीजातासत्यलोकेतदावसत् ॥ ततःपुण्यक्षयेजाते मर्त्यलोकेसुरेश्वरि ॥ ८ ॥ मानुषत्वंततोजातमयोध्यानगरेशिवे ॥ धनधान्यसमायुक्तोराजमंत्रेविचक्षणः ॥ ९ ॥ पौत्रस्तस्यमृतोदेवितदुद्देशेनभोःशिवे ॥ अतःपुत्रोनजायेतबहुकन्याप्रजायते ॥ १० ॥ शरीरेसततमुग्रंज्वरंजातंसुदारुणम् ॥ शत्रवोबहवःसंति

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

नसौख्यंलभतेक्कचित् ॥ ११ ॥ पुण्यंशृणुवरारोहेपूर्वपापक्षयोयतः ॥ गृहवित्तषडंशेनपुण्यका
र्यंचकारयेत् ॥ १२ ॥ गायत्रीत्र्यंबकश्चेतिश्रीश्चतेइतिऋक्त्रयम् ॥ इतिमंत्रंजपेल्लक्षंदशांशंहव
नंततः ॥ १३ ॥ दशांशंतर्पणंदेविमार्जनंतद्दशांशतः ॥ गोदानंतद्दशांशंचतद्दशांशंचभोजयेत् ॥
॥ १४ ॥ भोजयामासदेवेशिश्रद्धाभक्तिसमान्वितः ॥ कूष्मांडंनारिकेलंचपंचरत्नसमन्वितम् ॥
॥ १५ ॥ गंगामध्येप्रदातव्यंपूर्वपापविशुद्धये ॥ वृषभंतरुणंशुभ्रंघंटाचामरशोभितम् ॥ १६ ॥
ब्राह्मणायप्रदातव्यंशय्यादानंविशेषतः ॥ एवंकृतेवरारोहेशीघ्रंपुत्रःप्रजायते ॥ रोगस्यैवानिवृत्तिः
स्याज्ज्वरस्तस्यनजायते ॥ १७ ॥ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेपूर्वा
भाद्रपदानक्षत्रस्याद्वितीयचरणप्रायाश्चित्तकथनंनामैकोत्तरशततमोऽध्यायः ॥ १०१ ॥
॥ शिवउवाच ॥ ॥ गांधारनगरेदेविब्राह्मणोवसातिप्रिये ॥ दयाशर्मइतिख्यातोमद्यपानरतःस
दा ॥ १ ॥ वेश्यासुरतसंतृप्तश्चौरकर्मरतःसदा ॥ म्लेच्छाचाररतःसोऽपिम्लेच्छान्नंभुज्यतेसदा ॥
॥ २ ॥ धनंनसंचितंतेनम्लेच्छभार्यासुतत्परः ॥ श्राद्धकर्मविहीनश्चपितुर्मातुश्चनिंदकः ॥ ३ ॥
एवंबहुगतेकालेमरणंतस्यचाभवत् ॥ महाक्रकचनामानंनरकंनामदारुणम् ॥ ४ ॥ निक्षिप्तःशृं
खलांबद्धायमदूतैर्यमाज्ञया ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकयातनाम् ॥ ५ ॥ नरकान्निःसृतो

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

देविगोधायोनिरभूत्पुरा ॥ सरठस्यपुनर्योनिंचटकत्वंततोऽभवत् ॥ ६ ॥ मानुषत्वंततोलेभेशु भेदेशेवरानने ॥ धनधान्यसमायुक्तोवंशहीनोमहेश्वरि ॥ ७ ॥ पूर्वजन्मनिदेवेशिब्राह्मणत्वंयतो ऽत्यजत् ॥ तत्पापेनैवभोदेविपुत्रस्यमरणंमुहुः ॥ ८ ॥ तन्मातापितरौवृद्धौत्यक्तौदुर्मतिनायतः ॥ अतःशरीरेवैरोगःकाकवन्ध्यासहव्रणा ॥ ९ ॥ शांतिंशृणुवरारोहेयतःपुत्रोहिजायते ॥ गृहवित्ता ष्टमंभागंपुण्यकार्यंचकारसः ॥ १० ॥ पलपंचसुवर्णस्यगणाध्यक्षस्यचाकृतिम् ॥ कृत्वावैपूज यामासमंत्रेणानेनसुव्रते ॥ ११ ॥ गणाध्यक्षसुरेशानसर्वोपद्रवनाशन ॥ ममपूर्वकृतंपापंहरदुःख निवारण ॥ १२ ॥ प्रतिमांगंधपुष्पाद्यैःपूजितांविविधैःफलैः ॥ दापयामासविप्रायवेदज्ञायतप स्विने ॥ १३ ॥ ततोगांकपिलांदद्यात्स्वर्णशृंगविभूषिताम् ॥ गणेशस्यतुमंत्रंवैलक्षजाप्यंचका रयेत् ॥ १४ ॥ हवनंतद्दशांशेनमार्जनंतर्पणंतथा ॥ शतंचभोजयामासश्रोत्रियान्वेदपारगान् ॥ ॥ १५ ॥ एवंकृत्वाविधानेनब्राह्मणायसमर्पयेत् ॥ एवंकृतेवरारोहेशीघ्रंपुत्रःप्रजायते ॥ १६ ॥ आ धयःसंक्षयंयांतिसर्वंपापंचनश्यति ॥ ततोभवतिवंशश्चव्याधिनाशश्चजायते ॥ १७ ॥ इति श्री कर्म० पा० पूर्वाभाद्रपदानक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामद्व्यधिकशततमो० ॥ १०२ ॥

॥ श्रीशिवउवाच ॥ ॥ मध्यदेशेसुरेशानिगोमत्यानिकटेशुभे ॥ बलभद्रपुरंख्यातंवसंतिबहवो

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

जनाः ॥ १ ॥ तत्र ब्राह्मण एको हि शुद्धाचाररतः सदा ॥ ब्रह्मकर्म्मपरिभ्रष्टो ब्राह्मणानां च निन्दकः ॥
॥ २ ॥ तस्य भार्याद्वयं चासीदेकां त्यज्य द्विजस्ततः ॥ द्वितीयां भोजयामास वस्त्रामत्रैर्विभूषणैः ॥
॥ ३ ॥ पुत्राश्च बहवो जाता ज्येष्ठायां शिववल्लभे ॥ आखेटकं सदा याति ब्राह्मणो गहने वने ॥ ४ ॥
मृगं हत्वा वरारोहे भोजनं क्रियते सदा ॥ अग्निदाहं वनं कृत्वा पक्षिणां मृगजातिनाम् ॥ ५ ॥ वधं वैका
रयामास निर्दयश्च द्विजाधमः ॥ एवं वयोंतरे जाते तस्य मृत्युरभूत्किल ॥ ६ ॥ पश्चान्मृता ततो भा
र्या पुंश्चली व्यभिचारिणी ॥ यमदूतैर्महाघोरैर्नरके नामदारुणे ॥ ७ ॥ यमाज्ञया तत्र नीता बह्वीं पी
डां तु लब्धवान् ॥ सप्ततिर्वैसहस्राणि वर्षाणि गिरिजे शिवे ॥ ८ ॥ भुक्तं नरकजं दुःखं बहुकष्टं सुदा
रुणम् ॥ नरकान्निःसृतो देवि गर्दभत्वं भवेत्किल ॥ ९ ॥ महिषस्य पुनर्योनिं मानुषत्वं ततो भवत् ॥
धनाढ्यो वैश्यवृत्तिश्च सज्जनानां च सेवकः ॥ १० ॥ मध्यदेशे भवेद्देवि गुणवान्पुत्रवर्जितः ॥ ब्रह्मक
र्मं यतस्त्यक्त्वा कृता वै शस्त्रधारणा ॥ ११ ॥ अतः पुत्रविहीनोऽयं बह्वीः कन्यास्तु जायते ॥ अग्नि
दाहं यतः कृत्वा गृहे वाप्यथवा वने ॥ १२ ॥ मृगपक्षिवृकान्हत्वा तत्पापेन ज्वरी सदा ॥ शांतिं शृणु
वरारोहे यतः पापप्रणाशनम् ॥ १३ ॥ गोपालमंत्रं वै जप्त्वा लक्षसंख्यं वरानने ॥ दशांशं हवनं कु
र्यात्तर्पणं मार्जनं तथा ॥ १४ ॥ गोपालस्य सदा ध्यानं सदा गोपालकीर्त्तनम् ॥ शालिग्रामशिला

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

दानंसुवर्णरजतान्वितम् ॥ १५ ॥ शुभ्रवस्त्रेणसंयुक्तंदद्याद्विप्रायश्रोत्रिणे ॥ भूमिदानंततःकुर्याद्गोदानंचसुरेश्वरि ॥ १६ ॥ तिलधेनुंततोदद्याद्ब्राह्मणान्भोजयेत्ततः ॥ एवंकृतेमहेशानिपुत्रश्चैवप्रजायते ॥ १७ ॥ व्याधयःसंक्षयंयान्तिकाकवन्ध्यालभेत्सुतम् ॥ १८ ॥ इति श्रीक०सं०पा० पूर्वाभाद्रपदानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामत्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

॥ शिवउवाच ॥ उज्जयिन्यांमहेशानिक्षत्रियोवसातिप्रिये ॥ वैश्यकर्मरतस्सोपिकरोतिक्रयाविक्रयम् ॥ १ ॥ तस्यभार्याविशालाक्षिकुलटाव्यभिचारिणी ॥ संचितंतेनमाहिषीधनंरथगजादिकम् ॥ २ ॥ छागमांसंवरारोहेप्रत्यहंभुज्यतेखलु ॥ एकदाश्राद्धसमयेब्राह्मणोदुर्वचोऽवदत् ॥ ३ ॥ पुरोहितस्यमरणंतदुद्देशेनवैशिवे ॥ ततोबहुदिनेयातेतस्यमृत्युरभूत्पुनः ॥ ४ ॥ यमाज्ञयाचतद्दूतैर्नरकेक्षिप्तवांस्तदा ॥ कुंभीपाकेमहाघोरेषष्टिवर्षसहस्रकम् ॥ ५ ॥ महत्कष्टंततोभुक्तंनरकान्निःसृतोयदा ॥ सर्पयोनिंततोभुक्त्वाकुक्कुटत्वंपुनःकृमिः ॥ ६ ॥ मानुषत्वंपुनर्लेभेदेशेपुण्यतमेशुभे ॥ कुलाचाररतःसोपिदेवतागुरुपूजकः ॥ ७ ॥ पुत्राश्चबहवोजातास्तेषांमृत्युश्चजायते ॥ शरीरेरोगमुग्रंवैबहुकष्टंमुहुर्मुहुः ॥ ८ ॥ पूर्वजन्मकृतंपापंभुज्यतेखलुमानवैः ॥ पुण्यंशृणुवरारोहेपूर्वपापप्रणाशनम् ॥ ९ ॥ पलदशसुवर्णस्यप्रतिमांविप्ररूपिणीम् ॥ भूषितांविविधैर्वे

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

स्त्रैरत्नैर्देशसमुद्भवैः ॥ १० ॥ पूजयामासविधिवन्मंत्रेणानेनभोःशिवे ॥ देवदेवमहादेवभुवनानांच
पालक ॥ ११ ॥ ममपूर्वकृतंपापंतत्क्षमस्वदयानिधे ॥ त्वमेवशरणंदेवत्वद्भक्तानांदिनेदिने ॥
॥ १२ ॥ पूजयिष्यामिसततंनमामिचरणौतव ॥ ततोवैवेदिकामध्येसुवितानविभूषिते ॥ १३ ॥
स्थापयेत्प्रतिमांदेविगंधपुष्पैःसुपूजयेत् ॥ १४ ॥ ॐशिवायनमः ॥ ॐहरायनमः ॥ ॐत्र्यंब
कायनमः ॥ ॐकपर्दिनेनमः ॥ ॐभवायनमः ॥ ॐशंकरायनमः ॥ ॐशशिशेखरायनमः ॥
ॐउग्रायनमः ॥ ॐउग्ररूपायनमः ॥ ॐअहिर्बुध्न्यायनमः ॥ ॐमहादेवायनमः ॥ गंधपुष्पादिभि
र्देविपूजयित्वापृथक्पृथक् ॥१५॥ षडक्षरेणमंत्रेणलक्षजाप्यंतुकारयेत् ॥ दशांशंहवनंतद्वत्तर्पणंमा
र्जनंतथा ॥१६॥ ततोगांकपिलांदद्यात्स्वर्णरत्नविभूषिताम् ॥ ब्राह्मणायततोदद्याच्छय्यादानम
नंतरम् ॥१७॥ प्रतिमांपूजितांचैवब्राह्मणायशिवात्मने ॥ प्रदद्याद्वेदविधिनाब्राह्मणान्भोजयेत्ततः
॥ १८ ॥ बंधुभिःसहभुंजीतगुरुंचप्रार्थयेत्ततः ॥ ब्रह्माविष्णुमहेशानंतत्स्वरूपंगुरुंविभुम् ॥१९॥
नमामिचरणौतस्यगुरुदेवस्यवैपुनः ॥ ततःप्रदक्षिणांकृत्वासाष्टांगंप्रणिपत्यच ॥ २० ॥ विसर्ज
येत्तदादेवंसर्वकार्यप्रदंशुभम् ॥ एवंकृतेमहेशानिपुत्रपौत्रैर्विवर्धते ॥ २१ ॥ व्याधयःसंक्षयंयांति
काकवन्ध्यापुनःसुतम् ॥ लभतेनात्रसंदेहोममवाक्यंनचान्यथा ॥ २२ ॥ इति श्रीकर्मविपा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

 कसंहितायां पार्वतीहरसंवादे उत्तराभाद्रपदानक्षत्रस्यप्रथमचरणप्रायश्चित्तकथनंनामचतुरुत्त
Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE
 रशततमोऽध्यायः ॥ १०४ ॥ ॥ ॥ ॥

॥ शिवउवाच ॥ ॥ प्रतिष्ठानेमहादेविकायस्थोवसतिप्रिये ॥ स्वकर्मणिरतोधीरःशांतःशक्तेरुपा
सकः ॥ १ ॥ एकस्तस्यभवेन्मित्रं वैश्योधनसमन्वितः ॥ कायस्थस्यतदादेविगमनंतत्रजायते ॥
॥ २ ॥ आदरंबहुधाकृत्वाकिंचित्कालंतदोषतुः ॥ मासमेकंतदादेविवासं वैश्यगृहेऽभवत् ॥ ३ ॥
वैश्यभार्याविशालाक्षीमृद्वंगीप्रियभाषिणी ॥ प्रीतिरासीत्तदादेविकायस्थेचगुणाकरे ॥ ४ ॥ का
यस्थोऽपिगृहंगत्वात्यक्त्वावैश्यगृहंशिवे ॥ वैश्यपत्नीपुनर्देविकायस्थस्यगृहेगता ॥ ५ ॥ उ
भाभ्यांचभवेद्देविविग्रहं वैश्यशूद्रयोः ॥ एवंबहुगतेकालेवृद्धेसतिवरानने ॥ ६ ॥ कायस्थस्यभ
वेन्मृत्युर्धर्मदूतैर्यमाज्ञया ॥ निःक्षिप्तंनरकेघोरेषष्टिवर्षसहस्रकम् ॥ ७ ॥ भुक्तंबहुविधंदुःखंनरकं
कृमिसंकुलम् ॥ नरकान्निःसृतोदेविबलीवर्दमभूत्पुरा ॥ ८ ॥ ततोऋक्षस्यवैयोनिंछागयोनिम
नन्तरम् ॥ मानुषत्वंपुनर्लेभेधनधान्यसमन्वितम् ॥ ९ ॥ मित्रपत्नींयतोभुक्त्वास्वभार्यांत्यज्यवै
भवेः ॥ तत्पापेनभवेद्देविनपुत्रःखलुवैक्वचित् ॥ १० ॥ प्रथमंकन्यकाजाताविधवापूर्वपापतः ॥
पुनःपुत्रस्यसन्देहःशरीरेसततंज्वरः ॥ ११ ॥ चरणेचभवेत्पीडाजंघेकटिगुदेतथा ॥ मृतवत्सा

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

भवेन्नारीगभपातंपुनःपुनः ॥ १२ ॥ शांतिंशृणुवरारोहेपूर्वपापप्रणाशिनीम् ॥ गृहवित्तषडंशेन पुण्यकार्यंचकारसः ॥ १३ ॥ गायत्रीमूलमंत्रेणलक्षजाप्यंतुकारयेत् ॥ हवनंतद्दशांशेनतर्पणंमार्जनंतथा ॥ १४ ॥ ब्राह्मणान्भोजयेत्षष्टिंसर्पिषापायसेनवा ॥ गोदानंचयथाशक्त्याभूमिदानंततःशिवे ॥ १५ ॥ वापीकूपतडागानिपथिमध्येतुकारयेत् ॥ एवंकृतेनसंदेहोवंशलाभंवरानने ॥ १६ ॥ ज्वराणांसंक्षयःशीघ्रंकाकवन्ध्यालभेत्सुतम् ॥ मृतवत्साचयानारीजीवद्वत्साभवेत्खलु ॥ १७ ॥ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेउत्तराभाद्रपदानक्षत्रस्य द्वितीयचरणप्रायश्चित्तकथनंनामपंचाधिकशततमोऽध्यायः ॥ १०५ ॥

॥ शिवउवाच ॥ ॥ नैमिषारण्यदेशेतुमिश्रिकेचपुरोत्तमे ॥ तत्रदामोदरोराजाराजपुत्रस्तदावसत् ॥ १ ॥ तस्यपत्नीवरारोहेनामवंशमतीतथा ॥ परस्त्रीलंपटोधूर्तोधनाढ्योधनगर्वितः ॥ २ ॥ भार्यांत्यक्त्वावरारोहेपरस्त्रीणांचसंग्रहम् ॥ करोतिप्रत्यहं देविमृगमांसंप्रभुज्यते ॥ ३ ॥ आखेटंचसदायातिमृगांश्चमृगशावकान् ॥ प्रत्यहंघातयामासव्याधरूपोमहाशठः ॥ ४ ॥ एवंसर्ववयोजातंवृद्धेसतिवरानने ॥ मरणंतस्यवैजातंयमदूतैर्यमाज्ञया ॥ ५ ॥ नरकेवैमहाघोरेनिक्षिप्तःशृंखलैर्युतः ॥ सप्ततिर्वैसहस्राणिबहुकष्टंप्रभुज्यते ॥ ६ ॥ नरकान्निः

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

सृतोदेविव्याग्रयोनिषुजायते ॥ कपियोनिततोदेविमानुषत्वंभवेत्पुनः ॥ ७ ॥ धनधान्ययुत
स्साधुस्तस्यभार्या मृतप्रजा ॥ ब्राह्मणीगमनं देविपूर्वजन्मानियत्कृतम् ॥ ८ ॥ तत्पापेनवरारो
हेतनौपीडामुहुर्मुहुः ॥ मृगाहताश्चबहवोहताश्चमृगशावकाः ॥ ९ ॥ तेनपापेनभोदेविमृतवत्स
त्वमाप्नुयात् ॥ तस्योपायंप्रवक्ष्यामिशृणुदेविधृतव्रते ॥ १० ॥ शिवस्यवैदिकंमंत्रंलक्षजाप्यंतु
कारयेत् ॥ लक्षद्वयंवरारोहेषडक्षरजपंतथा ॥ ११ ॥ शिवमूर्तिंततःकुर्यात्सुवर्णस्यपलंदश ॥
ततस्तांपूजयेद्धीमान्गंधपुष्पादिचंदनैः ॥ १२ ॥ धूपैर्दीपैस्सुनैवेद्यैरावाहनविसर्जनैः ॥ होमं
चकारयामासकुण्डेसुशुभ्रुसुशोभने ॥ १३ ॥ दशांशंहवनंतद्वन्मार्जनंतर्पणंततः ॥ स्वर्णशृंगीं
ततोदद्यात्सवत्सांयुवतींतथा ॥ १४ ॥ ततस्तुभोजयेद्विप्रान्पयसामोदकेनवा ॥ एवंकृतेमहे
शानिशीघ्रंपुत्रश्चजायते ॥ १५ ॥ व्याधयःसंक्षयंयांतिनात्रकार्याविचारणा ॥ १६ ॥ इति श्री
कर्मविपाकसंहितायां पार्वतीहरसंवादे उत्तराभाद्रपदानक्षत्रस्यतृतीयचरणप्रायाश्चित्तकथनंना
मषडधिकशततमोऽध्यायः ॥ १०६ ॥ ॥ ॥ ॥

॥ शिवउवाच ॥ ॥ अग्रपुरेनगरेदेविवैश्यएकोहितिष्ठति ॥ दणदासइतिख्यातस्तस्यभार्यासुगो
पिका ॥ १ ॥ चंचलाकुलटासातुपतिवंचनतत्परा ॥ एकस्मिन्समयेदेविद्विजएकःसमागतः ॥ २ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

बहुस्वर्णेनसंयुक्तोधनाढ्योबहुभाग्यवान् ॥ कोटिमुद्रांवरारोहेवैश्यगृहेततोद्विजः ॥ ३ ॥ स्था
पयामासधर्मात्मानयपालेद्विजोगतः ॥ तत्रैवमरणं देविब्राह्मणस्यततोभवत् ॥ ४ ॥ तद्धनेनच
वैश्येनसर्वंभुक्तंवरानने ॥ ततोवयोत्तरेयातेमहामार्याउपद्रवात् ॥ ५ ॥ मरणंतस्यवैश्यस्यपुत्र
भार्यायुतस्यच ॥ यमदूतैर्महाघोरैर्महाघोरेसकर्दमे ॥ ६ ॥ क्षिप्तवान्षष्टिसाहस्रवर्षदेविसुशो
भने ॥ नरकान्निःसृतोदेविशूकरत्वंततोभवत् ॥ ७ ॥ ऋक्षयोनिंततोदेविमहिषत्वंततोभव
त् ॥ मानुषत्वंततोदेविसर्वलोकजिताजितम् ॥ ८ ॥ धनधान्यसमायुक्तंपुत्रकन्याविवर्जितम् ॥
ब्राह्मणस्ययतोदेविधनंभुक्तंसुनिर्भयम् ॥ ९ ॥ पूर्वजन्मनिदेवेशिततःपुत्रोनजायते ॥ अस्य
शांतिंप्रवक्ष्यामिशृणुदेविसुशोभने ॥ १० ॥ गायत्रीमूलमंत्रेणपंचलक्षजपस्ततः ॥ हवनंतद्द
शांशेनमार्जनंतर्पणंततः ॥ ११ ॥ ब्राह्मणस्यततोदेविप्रतिमांकारयेत्ततः ॥ शतपलसुवर्णस्यरत्न
वस्त्रविभूषिताम् ॥ १२ ॥ पूजयामासदेवेशिचन्दनाद्यैःसुपुष्पकैः ॥ धूपैर्दीपैर्महेशानिनैवेद्यै
र्मोदकैस्तथा ॥ १३ ॥ प्रतिमांपूजितांतांतुब्राह्मणायसमर्पयेत् ॥ ततोगांकपिलांदद्यात्स्वर्णशृं
गींसनूपुराम् ॥ १४ ॥ ब्राह्मणान्भोजयेत्पश्चात्सर्पिषापायसेनवा ॥ गोशतंचततोदानंघटदानं
घृतस्यच ॥ १५ ॥ प्रयागेमाघमासेतुस्नानंचभार्ययासह ॥ एवंकृतेभवेत्पुत्रः शीघ्रमेवनसंशयः ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

॥ १६ ॥ व्याधयःसंक्षयंयांतिकाकवन्ध्यालभेत्सुतम् ॥ १७ ॥ इति श्रीकर्म० पार्वतीहरसं०
उत्तराभाद्रपदानक्षत्रस्यचतुर्थचरणप्रायश्चित्तकथनंनामसप्ताधिकशततमोऽध्यायः ॥ १०७ ॥
॥ श्रीशिवउवाच ॥ ॥ वैदण्डेचपुरेदेविलुब्धकोवसतिप्रिये ॥ सेवकेतिसमाख्यातस्तस्यभा
र्यातुनिष्ठुरा ॥ १ ॥ अतीवनिर्दयोदेविविहंगमृगघातकः ॥ प्रत्यहंमृगमांसेनव्ययंकुर्याद्दिनेदिने ॥
॥ २ ॥ एवंसर्ववयोजातंवृद्धेसतिवरानने ॥ मरणंतस्यवैजातंयमदूतैर्यमाज्ञया ॥ ३ ॥ निक्षि
प्तंनरकेघोरेषष्टिवर्षसहस्रकम् ॥ भुक्तंचविविधंदुःखंकृमिसूचीमुखैर्युतम् ॥ ४ ॥ नरकान्निःसृ
तोदेविमृगत्वंजायतेखल ॥ शृगालस्यततोयोनिंछागयोनिंततोभवत् ॥ ५ ॥ मानुषत्वंपुन
र्जातंधनधान्यसमन्वितम् ॥ पूर्वजन्मनिदेवेशिजलदानंचवैकृतम् ॥ ६ ॥ धनाढ्यत्वंततोजातं
नपुत्रोमृगताडनात् ॥ पुत्राश्चबहवोजातामृत्युस्तेषांचजायते ॥ ७ ॥ रोगाणांचतथोत्पत्तिर्ज्व
रश्चैवपुनःपुनः ॥ शांतिंशृणुवरारोहेपूर्वपापप्रणाशनम् ॥ ८ ॥ गृहवित्तषडंशेनपुण्यकार्यंच
कारसः ॥ गायत्रीचशिवायेतिजातवेदेतिवैपुनः ॥ ९ ॥ दशायुतंजपंकुर्याद्दशांशंहवनंततः ॥ ॥७५॥
दशांशंमार्जनंदेवितर्पणंतद्दशांशतः ॥ १० ॥ ततोवैभोजयामासद्विजान्देविदशांशतः ॥ दश
वर्णांततोदद्याद्वृषभंभूषितंशुभम् ॥ ११ ॥ पलपञ्चसुवर्णस्यमालयंमेरुयुतंतुवै ॥ ब्राह्मणायत

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तोदद्याच्छय्यादानमनन्तरम् ॥ १२ ॥ एवंकृतेवरारोहेपुत्रःखलुप्रजायते ॥ व्याधयःसंक्षयंयां
तिकाकवन्ध्यालभेत्सुतम् ॥ १३ ॥ इति श्रीकर्मविपाकसंहितायांपार्वतीहरसंवादेरेवतीनक्षत्र
स्यप्रथमचरणप्रायश्चित्तकथनंनामाष्टोत्तरशततमोऽध्यायः ॥ १०८॥ ॥
॥ शिवउवाच ॥ ॥ श्रीपुरेनगरेदेविद्विजएकोऽवसत्पुरा ॥ पुत्रपौत्रयुतोदेविधनाढ्योवेदवर्जि
तः ॥ १ ॥ वैश्यकर्मरतःसोऽपिविक्रयंक्रियतेसदा ॥ महिषीवृषभंवस्त्रंचापरंगजवाजिनम् ॥ २ ॥
प्रत्यहंविक्रयंकृत्वाधनस्यबहुसंग्रहम् ॥ एकदातद्गृहेदेविगुरुस्तस्यतदागतः ॥ ३ ॥ आदरंबहु
धाकृत्वामासेजातेततःशिवे ॥ गमनंचहरिद्वारेस्नानार्थंचगतस्तदा ॥ ४ ॥ गुरुपुत्रस्तुवैमूर्तिस्व
र्णरत्नयुतांतथा ॥ सद्रव्यांवैततोदेविब्राह्मणायसमर्प्यच ॥ ५ ॥ हरिद्वारेततोगत्वातत्रप्राणमथा
त्यजत् ॥ मूर्तिद्वयंगुरोश्चैवविक्रीयतद्व्ययंकृतम् ॥ ६ ॥ एवंबहुगतेकालेमरणंब्राह्मणस्यच ॥
यमाज्ञयायमदूतैर्नरकेनामकर्दमे ॥ ७ ॥ निक्षिप्तंवैततोदेविषष्टिवर्षसहस्रकम् ॥ नरकान्निःसृतो
देविव्याघ्रयोनिंततोलभत् ॥ ८ ॥ बिडालस्यपुनर्योनिंमानुषत्वंततोलभत् ॥ तीर्थेपुण्यतमेदे
विकोशलायांसुरेश्वरि ॥ ९ ॥ ब्राह्मणस्यकुलेजन्मज्ञानवान्प्रियदर्शनः ॥ देवतायतनेप्रीतिःपर
स्त्रीलंपटस्तथा ॥ १० ॥ तस्यापत्यत्रयंदेविकन्यकापुत्रकौतथा ॥ तेषांवैमरणंजातंपुनःपुत्रोन

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

जायते ॥ ११ ॥ काकवंध्याभवद्भार्यागौरांगीसुंदरीतुसा ॥ तन्वङ्गीदीर्घकेशीचपत्यौचाप्रियभाषिणी ॥ १२ ॥ तस्योपायंप्रवक्ष्येऽहंपुनःपुत्रोयतोभवेत् ॥ हरिवंशश्रवणंदेविगोपालस्यतुकीर्तनम् ॥ १३ ॥ वंशगोपालमंत्रंवैगायत्रीमंत्रमेवच ॥ लक्षद्वयंवरारोहेजपंवैकारयेत्सुधीः ॥ १४ ॥ हवनंतद्दशांशेनतर्पणंमार्जनंतथा ॥ तुलसीवाटिकांकृत्वातन्मूलेविष्णुपूजनम् ॥ १५ ॥ दशवर्णीचगोदानंशय्यादानंततःशिवे ॥ ब्राह्मणान्भोजयेत्पश्चाच्छतसंख्यान्द्विजोत्तमान् ॥ १६ ॥ विष्णोश्चप्रतिमांदेविसुवर्णस्यपलंदश ॥ पूजयित्वाविधानेनब्राह्मणायप्रदापयेत् ॥ १७ ॥ एवंकृतेनसंदेहोवंशोभवतिनान्यथा ॥ काकवंध्यालभेत्पुत्रंजीवत्पुत्रामृतप्रजा ॥ १८ ॥ व्याधयःसंक्षयंयांतिवंध्यत्वञ्चप्रशाम्यति ॥ एवंनकुरुतेदेविसप्तजन्मह्यपुत्रकम् ॥ १९ ॥ इति श्रीक० सं० पार्व०संवादेरेवतीनक्षत्रस्यद्वितीयचरणप्रायश्चित्तकथनंनामनवाधिकशततमोऽध्यायः ॥ १०९ ॥

॥ शिवउवाच ॥ ॥ माणिक्यनगरेदेविवसंतिबहवोजनाः ॥ लवणकारोवसत्येकःप्रत्यहंलवणंकरोत् ॥ १ ॥ लवणस्यविक्रयंनित्यंव्ययंकुर्याद्दिनेदिने ॥ तस्यमित्रंद्विजःकश्चिदागतस्तस्यवैगृहे ॥ २ ॥ धनाढ्योरतसंयुक्तस्तत्रवासमकारयत् ॥ आदरंबहुसन्मानंकृत्वामित्रेणवैशिवे ॥ ३ ॥ पत्नीशूद्रस्यवैदुष्टापुंश्चलीचपलातथा ॥ मासमेकंवरारोहेतस्यविप्रस्यचास्थितौ ॥ ४ ॥

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

मित्रपत्न्याविषंदत्तंब्राह्मणायतदाशिवे ॥ भोजनान्नेनवैमध्येलवणकारोनजानते ॥ ५ ॥ ब्राह्मणस्यभवेन्मृत्युरर्द्धरात्रेगतेसति ॥ नद्यांशवंततस्त्यक्त्वाधनंतस्यगृहीतवान् ॥ ६ ॥ ब्राह्मणस्यधनंगृह्यव्ययंकुर्यादिनेदिने ॥ भार्ययासहपुत्राभ्यांभुक्त्वाद्रव्यंवरानने ॥ ७ ॥ ततोवृद्धेवयोजातेमरणंतस्यपापतः ॥ पश्चान्मृतातुवैभार्याकुलटाव्यभिचारिणी ॥ ८ ॥ यमदूतैर्महाघोरैर्नरकेपाकसंज्ञके ॥ कुम्भीपाकेतदादेविनिक्षिप्तश्चयमाज्ञया ॥ ९ ॥ युगमेकंविशालाक्षिभुक्त्वानरकयातनाम् ॥ नरकान्निःसृतोदेविशूकरत्वंप्रजायते ॥ १० ॥ पुनःकाकस्यवैयोनिंबिडालत्वंततोभवत् ॥ मानुषत्वंततोदेविदेशेशुद्धेततोभवत् ॥ ११ ॥ पूर्वजन्मनिदेवेशिकुरुक्षेत्रेयतोगतः ॥ अतोधनंभवत्यस्यनापत्यत्वंद्विजोहतः ॥ १२ ॥ शरीरेजायतेव्याधिर्भार्यातस्यमृतप्रजा ॥ अस्यपापस्यशमनंशांतिंशृणुवरानने ॥ १३ ॥ गृहवित्ताष्टमंभागंब्राह्मणायसमर्पयेत् ॥ गायत्रीजातवेदाभ्यांत्र्यंबकेतिऋचापुनः ॥ १४ ॥ लक्षत्रयंवरारोहेजपंवैकारयेत्सुधीः ॥ हवनंकारयामासकुण्डेयोनिसुशोभने ॥ १५ ॥ चतुरस्त्रेवरारोहेदशांशंविधिपूर्वकम् ॥ तर्पणंतद्दशांशेनमार्जनंचविशेषतः ॥ १६ ॥ गांसवत्सांततोदद्यात्स्वर्णवस्त्राविभूषिताम् ॥ ब्राह्मणंभोजयेत्पश्चात्कूष्मांडंप्रददेत्सुधीः ॥ १७ ॥ एवंकृतेवरारोहेपुत्रोभवतिनान्यथा ॥ व्याधयःसंक्षयं यांतिकाकवन्ध्यापुनःसु

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तम् ॥ १८ ॥ मृतवत्सालभेत्पुत्रंचिरंजीविनमुत्तमम् ॥ १९ ॥ इति श्रीकर्मविपाकसंहितायांपार्व
तीहरसंवादेरेवतीनक्षत्रस्यतृतीयचरणप्रायश्चित्तकथनंनामदशाधिकशततमोऽध्यायः ॥ ११० ॥
॥ शिवउवाच ॥ ॥ अलर्कस्यपुरेदेविक्षत्रियोवसतिप्रिये ॥ चंद्रशर्मेतिविख्यातःपत्नीदेविततो
भवत् ॥ १ ॥ क्षत्रधर्मरतोनित्यंधनाढ्यःशूरसंमतः ॥ कृष्णदासइतिख्यातोविप्रस्तस्यपुरोहि
तः ॥ २ ॥ विप्रायप्रददौभूमिंगिरिजेविग्रहंशतम् ॥ ततोबहुदिनेयातेदण्डंतस्मैसयाचितम् ॥
॥ ३ ॥ ब्राह्मणोऽप्यवदद्देविनाहंदंडचःकदाचन ॥ ततोरोषपरीतात्माक्षत्रियोब्राह्मणंप्रति ॥ ४ ॥
दुर्वचश्चावदद्देविब्राह्मणेसाधुसंमते ॥ मरणंब्राह्मणस्यैवमृत्यूद्देशेनवैप्रिये ॥ ५ ॥ ततोबहुगतेवर्षे
मरणंक्षत्रियस्यतु ॥ यमदूतैर्महाघोरैर्नरकेनामदारुणे ॥ ६ ॥ कुंभीपाकेमहाघोरेक्षिप्तवान्यम
शासनात् ॥ युगानांचत्रयंसंख्यानरकेवासमेवच ॥ ७ ॥ नरकान्निःसृतोदेविप्रेतत्वंचैवजायते ॥
शूकरस्यपुनर्योनिंततोभवतिमानुषः ॥ ८ ॥ मध्यदेशेविशालाक्षिहिमविंध्योश्चमध्यगे ॥ धन
धान्यसमायुक्तोब्राह्मणानांश्चसेवकः ॥ ९ ॥ पूर्वजन्मनिदेवेशिमरणंब्राह्मणस्यतु ॥ मृत्यूद्देशेनदे
वेशितत्पापेनभवेत्सुतः ॥ १० ॥ प्रमादात्पुत्रस्योत्पत्तिर्मरणंतस्यजायते ॥ काकवंध्याभवेन्ना
रीमृतवत्सापुनः पुनः ॥ ११ ॥ शरीरेव्याधिरुत्पन्नोज्वरंतीव्रंमुहुर्मुहुः ॥ अस्यशांतिमहंवक्ष्येशृ

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

णुदेविसमाप्ततः ॥ १२ ॥ गृहवित्तषडंशंचब्राह्मणायसमर्पयेत् ॥ गायत्रीमूलमंत्रेणपंचलक्षजपं
तथा ॥१३॥ दशांशंकारयामासहवनंविधिपूर्वकम् ॥ तर्पणंमार्जनंतद्वद्द्रोदानंचविशेषतः ॥ १४ ॥
ब्राह्मणस्यततोदेविप्रतिमांकारयेद्बुधः ॥ पलपञ्चसुवर्णस्यवस्त्रैरत्नैर्विभूषिताम् ॥ १५ ॥ ततोनि
र्मायप्रतिमांपूजयित्वायथाविधि ॥ मंत्रेणानेनदेवेशिपाद्यगंधादिभिःपृथक् ॥ १६ ॥ वासुदेवज
गन्नाथशरणागतवत्सल ॥ ब्रह्महत्याकृतापूर्वंतत्सर्वंक्षंतुमर्हसि ॥ १७ ॥ वल्मीकमृत्तिकांगृह्यवे
दिंवैकारयेत्ततः ॥ तन्मध्येसर्वतोभद्रंरचितंद्रव्यमंगलैः ॥ १८ ॥ तन्मध्येप्रतिमांस्थाप्यततःपू
जांतुकारयेत् ॥ १९ ॥ ॐवासुदेवायनमः ॥ ॐजगन्नाथायनमः ॥ ॐहृषीकेशायनमः ॥ ॐ
दामोदरायनमः ॥ ॐअच्युतायनमः ॥ ॐशङ्खचक्रगदाधरायनमः ॥ ॐ विष्णवेनमः ॐ
शार्ङ्गिणेनमः ॥ ॐअनन्तायनमः ॥ ॐगरुडध्वजायनमः ॥ दशमंत्रैर्महेशानिपूजयित्वाततः सु
धीः ॥ प्रतिमांरक्तवस्त्रेणछादितांपुष्पभूषिताम् ॥ २० ॥ ब्राह्मणायततोदद्यान्महाविष्णुस्वरू
पिणे ॥ प्रभोजयेत्ततोविप्रान्दक्षिणांदापयेत्ततः ॥ २१ ॥ ततोविसर्जनंकुर्याद्वाचकंप्रणिपत्यच ॥
एवंकृतेवरारोहेशीघ्रंपुत्रःप्रजायते ॥ २२ ॥ काकवन्ध्यालभेत्पुत्रंसर्वव्याधिप्रणाशनम् ॥ मृत
वत्साचयानारीजीवत्पुत्राचजायते ॥ २३ ॥ यःपठेच्छृणुयाद्वापिसर्वपापैःप्रमुच्यते ॥ अतःपर

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

तरंनास्तिसत्यंसत्यंवरानने ॥ २४ ॥ इति श्रीब्रह्मपुराणेपितृकल्पोत्तरेसनत्कुमारमार्कंडेयप्रश्ने कर्मविपाकसंहितायांपार्वतीहरसंवादेसर्वप्रायश्चित्तकथनेनारदांबरीषकथनेप्रत्युत्तरेरेवतीनक्षत्रस्य चतुर्थचरणप्रायश्चित्तकथनंनामैकादशाधिकशततमोऽध्यायः ॥ १११ ॥ श्रीकृष्णार्पणमस्तु ॥

॥ समाप्तोऽयं ग्रन्थः ॥

इदं पुस्तकं श्रीकृष्णदासात्मजखेमराजेन मुम्बय्यां स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम् । [संवत् १९६०, शके १८२५.]

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

क्रय्यपुस्तकानि–कर्मकाण्डग्रन्थाः ।

नाम.	की० रु० आ०
संस्कारभास्कर (यजुर्वेदी सब संस्कारोंकीविधि प्रयोग और मंत्र सहित)	२-१२
कर्मसिद्धान्तदीपिका (कर्मफल) ...	०–३
रुद्री भाषाटीका	०–८
ग्रहशान्ति	०–८
बृहत्कर्मकाण्डसमुच्चय	०–७
श्राद्धप्रयोगावली	१–०
गयायात्रापद्धति (सब विधिवर्णितहैं)	०–४
वास्तुशांति	०–६

नाम.	की० रु० आ०
विनायकशांति	०–१॥
अष्टशांति	०–२
मूलशांति	०–२
आश्लेषाशांतिज्येष्ठाशांतिश्च	०–१॥
जन्मदिनपूजापद्धति	०–२
गोदानपद्धति	०–१॥
नवग्रहविधानपद्धति	०–४
स्वस्तिवाचन–(पुण्याहवाचन) ...	०–१॥
सकामशिवपूजनविधान भा. टी. ...	०–४

सम्पूर्ण पुस्तकोंका "बड़ासूचीपत्र" अलगहै)॥ आनेका टिकिट भेजकर मुफ्त मँगालीजिये.

पुस्तकोंकामिलनेकाठिकाना–खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" छापाखाना, खेतवाडी–बंबई.

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection

Digitization by Agam Nigam Digital Preservation Trust, Chandigarh. Funding by IKS-MoE

CC-0. All India Ayurvedic Congress (A.I.A.C), Dhanwantri Bhawan New Delhi Collection